
# सन्देशकाव्यं गद्यकाव्यं च

Course Code: B21SN06DC
Discipline Core Course
Undergraduate Programme in
Sanskrit Language and Literature
Self Learning Material



## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# सन्देशकाव्यं गद्यकाव्यं च

Course Code: B21SN06DC

Semester - VI

## Discipline Core Course
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# सन्देशकाव्यं गद्यकाव्यं च

Course Code: B21SN06DC
Semester- VI
Discipline Core Course
BA Sanskrit Language and Literature

SREENARAYANAGURU
OPEN UNIVERSITY


**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.

**Development of the Content**

Dr. G. Sahadevan

**Review and Edit**

Dr. V.R. Muralidharan

**Linguistics**

Dr. V.R. Muralidharan

**Scrutiny**

Dr. Sreeja J., Dr. Vijayarajan K.U.,
Dr. Anju J., Dr. Jothilekshmi M.,
Chitra Baskar

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

**Director, MDDC :**
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition:**
May 2025



**Copyright:**
© Sreenarayanaguru Open University



ISBN 978-81-986822-9-1

9 788198 682291



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.m

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V.P.

01-05-2025

PART-1


**Block -1 कालिदासः मेधदूतं च** **1**

Unit - 1 सन्देशकाव्यस्य स्वरूपम् 2

Unit - 2 यक्षस्य मेघदर्शनम्-स्वाग्तव्यवहारः 14

Unit - 3 अलकापर्यन्तं गमननिर्देशः 22

**Block - 2 मर्गवर्णना - 1** **29**

Unit - 1 मार्गवर्णना 30

Unit - 2 आम्रकूटः-विन्ध्याचलः 45

Unit - 3 नर्मदा-विदिशा 53

Unit - 4 उज्जयिनी-सिन्धुः 65

**Block - 3 मार्गवर्णना - 2** **89**

Unit - 1 गम्भीरा - देवगिरिः 90

Unit - 2 चर्मण्वती 98

Unit - 3 ब्रह्मावर्तम् 105

Unit - 4 सरस्वती - जाह्नवी 109

**Block - 4 मार्गवर्णना - 3** **114**

Unit - 1 गङ्गासमागमः 115

Unit - 2 हिमालयः 119

Unit - 3 कैलासः 130

Unit - 4 अलका


PART-2


139

**Block - 5 कादम्बरीसंग्रहः तत्र शूद्रकराजधानी च** **143**

Unit - 1 संस्कृतगद्यपरिचयः-बाणः-कृतयः-कादम्बरीसंग्रहः-ग्रन्थकारः 144

Unit - 2 शूद्रकः - दिनचर्या - मातङ्गकुमारीप्रवेशः 157

Unit - 3 मातङ्गकुमार्याः राजदर्शनम् 167

Unit - 4 शूद्रकस्य मातङ्गकन्यादर्शनम् - वैशम्पायनः - आर्यापाठः 171

**Block - 6 वैशम्पायनस्य कथाकथनम्** **181**

Unit - 1 शूद्रकस्य विस्मयः -तस्य व्यायामभूमिः- स्नानभूमिः-देवगृहम्-विलेपनभुमिः-भोजनम् 182

Unit - 2 शूद्रकस्य आस्थानमण्डपम्-वैशम्पायनं प्रति प्रश्नः 192

Unit - 3 वैशम्पायनस्य कथाकथनम्-विन्ध्याटवीम् 200

**Model Question Paper (SET – A)** **205**

**Model Question Paper (SET – B)** **208**

BLOCK-1

# कालिदासः मेघदूतं च

# Unit -1
# सन्देशकाव्यस्य स्वरूपम्।

## उद्देश्यानि (Learning Outcomes)

- कविकुलगुरुं कालिदासं परिचिनोति।
- कालिदासस्य ग्रन्थानधिकृत्य सामान्यावबोधं सिद्ध्यति।
- सन्देशकाव्यस्य स्वरूपमवगच्छति।
- यक्षस्य मेघदर्शनं स्वागतव्यवहारं च परिचिनोति।
- यक्षः अलकापर्यन्तं गमनाय मेघं प्रेरयति। तन्मध्ये भारतस्य भौगोलिकसम्पत्तिमधिकृत्य जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

कविकुलतिलकः भवति कालिदासः। साहित्यमण्डले कालिदासस्य योगदानमत्यधिकं महान् प्रभावः वर्तते। तेन मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् चेति नाटकानि रचितानि। अभिज्ञानशाकुन्तलस्य ख्यातिः पाश्चात्यपौरस्त्यभूमण्डलेषु व्यापृता। कालिदासस्य प्रथमकृतौ ऋतुसंहारे ग्रीष्मादारभ्य वसन्तपर्यन्तं षड् ऋतून् सविस्तरं प्रतिपादयति। अस्य कवेः कोमलकल्पनायाः मकुटोदाहरणं भवति कुमारसम्भवम्। रघुवंशम् अस्य कवेः प्रौढतमः ग्रन्थः। निरूपकदृष्ट्या सन्देशकाव्यानामारम्भः कालिदासस्य मेघदूतेन आरभते।

संस्कृतसाहित्ये वर्तमाना दूतकाव्यपरम्परा अतिप्राचीना। मानवचित्तेषु स्थितायाः प्रणयभावस्य मोहनं चित्रं प्रकृतेः चारुतया वर्णनम्, नदी-पर्वत -पक्षि -मृगादीनां वर्णनया मानवस्य प्रकृत्या सह स्थितस्य वैकारिकबन्धस्य दृढता इत्याद्याः सविशेषताः सन्देशकाव्ये अन्तर्भवन्ति।

मन्दाक्रान्तावृत्तेः रचितं भवति मेघसन्देशम्। काव्यशोभायाः चमत्करितां वर्धयितुं कविना प्रायेण सर्वानलङ्काराः प्रयुक्ताः। तथापि उपमाप्रयोगे कवेः अनितरसाधारणं नैपुण्यं काव्ये सर्वत्र वर्तते। 'उपमा कालिदासस्य', 'दीपशिखा कालिदासः' इति युक्ती तम् आचन्द्रतारं प्रशोभेते। कालिदासः वस्तुनिर्देशेन मेघदूतरचनामारभते। यक्षस्य मेघदर्शनं स्वागतकथनं च हृदयङ्गमरूपेण कविरवतरति। यक्षः अलकापर्यन्तं गन्तुम् मेघं प्रेरयति। तन्मध्ये भारतीयस्य भौगोलिकसम्पत्तिः प्रकृतिवर्णना च सर्वान् सहृदयान् तोषयतः।

## मुख्यपदानि (Keywords)

कविकुलगुरुः - कनिष्ठिकाधिष्ठितकालिदासः - उपमालङ्कारप्रयोगचातुर्यम् - 'इन्त्यन् षेक्स्पियर्'- त्रीणि रूपकाणि - द्वे खण्डकाव्ये - द्वे महाकाव्ये - सन्देशकाव्यस्वरुपम्।

## Discussion

### 1.1. कालिदासः

कविकुलगुरुः भवति कालिदासः। संस्कृतसाहित्ये सः जाज्वल्यमानं नक्षत्रं भवति। लोकसाहित्ये विशिष्टानाम् कवीन्द्राणां मध्ये कालिदासः उन्नतपदवीमलङ्करोति।

उक्तञ्च -

"पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावात्
अनामिका सार्थवती बभूव" इति।

कालिदासस्य अनन्तरागामिनः प्रायेण सर्वे प्रसिद्धाः कवयः कालिदासमहिमानं स्तुवन्त्येव। कुमारिलभट्टः, गोवर्धनाचार्यः, जयदेवप्रभृतयः कवयः निरूपकाश्च कालिदासकृतीनाम् वैशिष्ट्यमङ्गी-कुर्वन्तः आसन्। कालिदासस्य अलङ्कारप्रयोगचातुर्यम् अद्भुतावहमेव। विशेषेण तु उपमालङ्कारे।

उपमालङ्कारस्य औचित्यं स्वारस्यं च वीक्ष्य 'उपमा कालिदासस्य' 'दीपशिखा कालिदासः' इत्याद्याः सूक्तयः प्रचारे सन्ति।

न केवलं भारतीयाः किन्तु पाश्चात्यपण्डिताः अपि कालिदासं विश्वकवित्वेन अङ्गीकुर्वन्ति। सर् मोणियर विल्यम्स् तं 'इन्त्यन् षेक्स्पियर्' इति नाम्ना व्याहरत्। सर् विल्यं जोन्सणः शाकुन्तलस्य भाषान्तरीकरणं वाचयित्वा जर्मन् कविः गोथ्थे कालिदासं मुक्तकण्डं प्रशंसति।

विश्वविख्यातस्य कालिदासस्य जीवितकालं विद्यार्जनादिकार्याणि इदानीमपि विवादत्वेन वर्तन्ते। तथापि क्रिस्तोः पूर्वं प्रथमे शतके जन्म लेभे इति केचन अभिप्रयन्ति।

### 1.2. कालिदासस्य कृतयः

कालिदासः त्रीणि रूपकाणि रचितवान्। तानि मालाविकाग्निमित्रं विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं च भवन्ति। ऋतुसंहारः मेघसन्देशः इति खण्डकाव्ये, कुमारसम्भवम्, रघुवंशः चेति द्वे महाकाव्ये च सन्ति।

#### 1.2.1. मालविकाग्निमित्रम्

मालविकाग्निमित्रे नाटके पञ्च अङ्काः सन्ति। अस्मिन् नायकः अग्निमित्रः भवति। सः धीरललितः नायिका तु मालविका च। नायकस्तु शृङ्गवंश्यः नृपः। मालविका विदर्भराजकन्या। इतिवृत्तम् ऐतिहासिकम्। कालिदासस्य प्रथमं नाटकमिति प्रसिद्धिः।

विदर्भराजः यज्ञसेनः मालवराजं माधवसेनं प्रति शत्रुत्वेन अवर्तत। समीपस्थस्य देशस्य विदिशायाः राजा आसीत् अग्निमित्रः। अग्निमित्रेण साकं बन्धं स्थाप्य स्वसोदरीं मालविकाम् अग्निमित्राय पाणिग्रहणं कर्तुं माधवसेनः निश्चिकाय, उचितः सन्नाहः च कृतः। तदर्थं माधवसेनः मालविकया सह विदिशां प्रति प्रस्थितः। किन्तु मार्गमध्ये यज्ञसेनस्य सैन्यं तान् आक्रम्य माधवसेनं बबन्ध। किन्तु मालविका सख्या सह रक्षां प्राप। किन्तु पुनरपि चोरैराक्रान्ताः ते परस्परं वियुक्ताः। अन्ते मालविका अग्निमित्रस्य भार्यायाः धारिणीदेव्याः सकाशं प्राप।

लावण्यवतीं मालविकां धारिणी नृत्यपठनाय गुरोः सकाशं प्रेषितवती। राज्ञः दृष्टिपथात् तां निवारयितुं धारिणिदेवी अयतत। तथापि नृत्यवेदिकायां आगतां तां दृष्ट्वा नायकः अग्निमित्रः

तस्यामुत्सुकमना बभूव। विदूषकस्य साहाय्येन नायिकानायकयोरन्ते परिणयः संजातः। नाटकमिदम् अनन्तरवर्तिनां श्रीहर्षादीनामपि उपजीव्यं भवति। वैदर्भीरीतिरेव कविनात्र उपयुक्ता। प्रसादगुणः अधिकतया दृश्यते। आचार्ययोः गणदासचारुदत्तयोः विवादप्रसङ्गः नाटकीयतां जनयति।

### 1.2.2. विक्रमोर्वशीयम्

वेदपुराणेभ्यः इतिवृत्तं स्वीकृत्य रचितमिदं नाटकम्। अस्मिन् नाटके पञ्च अङ्काः सन्ति। रूपकेषु त्रोटकविभागे अस्यान्तर्भावः। अत्र पुरूरवसः उर्वश्याश्च प्रेमव्यापाराः वर्णिताः। शाकुन्तले इव कालिदासः मूलकथातः व्यतियानं कृत्वा त्रोटकरचनामकरोत्। पुरूरवाः केशिना अपहृताम् उर्वशीं स्वपराक्रमेण ररक्ष। परस्परावलोकनेन तौ अनुरक्तौ बभूवतुः। स्वर्गलोके नाटकाभिनयसमये पुरुषोत्तमेन इति वक्तव्ये सा हृदयनिर्भरं पुरूरवसमित्युवाच। भरतमुनिः तदा तां 'भुवं गच्छ' इति शशाप।

एवं भुवमागता सा पुरूरवसा परिणीता। एकदा अन्यां स्त्रियमवलयत् इत्यपराधेन प्रणयकुपिता उर्वशी निषिद्धस्त्रीप्रवेशं वनं प्रविष्टा लतारूपेण परिणता। महता प्रयासेन पुरूरवाः तां पूर्वभावं प्रत्यावर्तयत। अत्रान्तरे यावज्जीवमेव तयोः संयोगाय इन्द्रः अनुमतिं चादात्।

औचित्यपूर्वं पदानां प्रयोगे कालिदासस्य वैदग्ध्यं अस्मिन् त्रोटके द्रष्टुं शक्यते। पुरूरवसः विप्रलम्भशृङ्गारं कल्पनावैभवेन कालिदासः चतुर्थेऽङ्के वर्णयति।

### 1.2.3. अभिज्ञानशाकुन्तलम्

कालिदासस्य प्रौढा कृतिः भवति अभिज्ञानशाकुन्तलम्। शकुन्तलादुष्यन्तप्रणयकथा अस्मिन् रूपके वर्णिता। सप्ताङ्कसहिते अस्मिन् रूपके मृगयाव्यसनी दुष्यन्तः कञ्चन मृगमनुधावन् कण्वतपोवनं प्रविशति। नायिकां शकुन्तलां दृष्ट्वा नायकः राजा तस्याम् अनुरक्तो बभूव। गान्धर्वविधिना परिणीतां शकुन्तलां त्रिदिनाभ्यन्तरे राजधानीं नयेत् इत्युक्त्वा राजा नगरीं अगच्छत्। दुष्यन्ते निविष्टचित्ता शकुन्तला आश्रममागतं दुर्वासमहर्षिं नापश्यत्। शापवचनं च नाश्रुणोत्। यं पुरुषं त्वं चिन्तयसि सः त्वां विस्मरतु इति शापं श्रुत्वा अनसूयाप्रियंवदाभ्याम् अनुनीतः दुर्वासाः –'अभिज्ञानदर्शनेन स्मरिष्यतीति शापप्रतीकारं सम्पादितम्'। तीर्थयात्रातः प्रत्यागतः कण्वः सगर्भां

पुत्रीं ज्ञात्वा तां पतिगृहं प्रेषयति। तदानीं कण्वेन उच्चार्यमाणं श्लोकचतुष्टयं शाकुन्तले अतीव श्रेष्ठं भवति। उक्तञ्च-

'कविता कालिदासस्य तत्र शाकुन्तलं मतम् ।
शाकुन्तले चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्' इति ॥

पतिगृहगमनवेलायां शचीतीर्थे स्नानसमये शकुन्तलायाः अङ्गुलीतः अङ्गुलीयकं विनष्टम्। शापप्रभावात् दुष्यन्तः प्रियां शकुन्तलां तत्याज। अशरणां तां शकुन्तलायाः माता मेनका मारीचमहर्षेः आश्रममनयत्। सा तत्र भरतमसूत। धीवरात् अङ्गुलीयकलाभेन लब्धस्मृतिः राजा सर्वाणि कार्याणि स्मृत्वा पश्चात्तापविवशः बभूव। तादृशं राजानं मातलिः इन्द्रसाहाय्यार्थं देवलोकमनयत्। ततः विजयीभूत्वा प्रतिनिवृत्तमानः राजा मारीचाश्रमे सपुत्रां शकुन्तलाम् अपश्यत्। मारीचः तौ आशिषा अनुग्रुहीतवान्। सर्वे दुष्यन्तराजधानीं प्राविशन्।

### 1.2.4 ऋतुसंहारम्

ऋतुसंहारे षट् सर्गाः सन्ति। कालिदासस्य प्रथमा कृतिरिति मन्यन्ते विद्वांसः। अस्मिन् ग्रीष्मादारम्भ्य वसन्तपर्यन्तं षड् ऋतून् सविस्तरं प्रतिपादयति। ऋतु-क्रमः - ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरः, वसन्तः। प्रकृतौ मानवे जीवजालेषु च ऋत्वनुसारं जायमानान् विकारान् अस्मिन् कविः वर्णयति। अस्मिन् १५३ श्लोकाः सन्ति।

कालिदासस्य ग्रन्थेषु लघुग्रन्थोऽयम् । कवेः सूक्ष्मदर्शनं प्रकृतिस्नेहं चादारणीयमेव। इतरान् ग्रन्थानपेक्ष्य श्रृङ्गाररसः अस्मिन् काव्ये प्रतिसर्गं द्रष्टुं शक्यते। काव्यमिदं प्रसादगुणस्य मूर्तिमद्रूपमेव। भावनासम्पन्नः कामुकः स्वप्रेयसीं प्रति ऋतौ जायमानं परिणामं विशदीकुर्वन्निव भवति काव्यस्यास्य रचना। प्रकृतिशोभां विकारानुभूतिं च सुष्ठु मिलितं काव्यमिदं सहृदयहृदयावर्जकमेव भवति।

### 1.2.5 कुमारसंभवम्

कालिदासस्य कोमलकल्पनायाः मकुटोदाहरणं भवति कुमारसंभवम्। पुराणेभ्यः इतिवृत्तं स्वीकृत्य रचितमिदं काव्यम्। सप्तदशसर्गात्मकस्य अस्य महाकाव्यस्य अन्त्यनवसर्गाः कालिदास रचनाः नेति केचित् मन्यन्ते। अपि च कृतिरियं कालिदासस्य अन्तिमा कृतिरिति च विचारयन्ति केचन।

काव्यमिदम् ऋतुसंहारमिव वस्तुनिर्देशेन आरभते। शिवपार्वत्योः परस्परप्रणयः तस्य मधुरतरां आस्वाद्यता चास्मिन् प्रतिपाद्यविषयः भवति। काव्येषु सुन्दरे काव्येऽस्मिन् जीवनसंबद्धाः सर्वाः कलाः समायोजयति। दक्षयागे देहत्यागं कृता सतीदेवी पुनः हिमवतः पुत्रीरूपेण अजायत। बाल्यात्परे वयसि प्राप्ता पार्वती शिवं वर रुपेण लब्धुम् इच्छति। तपश्चरन्तं शिवं सा पूजादिभिः पूजयति। तथात्वे तारकासुरेण पीडिताः देवाः असुरनाशकं परमेष्ठिनं शरणं प्राप्नुवन्ति। वसन्तकाले कामदेवः देवानां निर्देशानुसारं शिवसन्निधिं प्राप्नोति। शिवसमाधिभङ्गाय कामदेवः यतते। कामस्य प्रणयशरेण शिवः समाधिस्थः प्रबुद्धो भूत्वा तृतीयनेत्रेण कामं भस्मीचकार। शिवं स्वसौन्दर्येण वशीकर्तुं न शक्यते इति ज्ञात्वा पार्वती तपः कर्तुं निश्चितवती। पार्वत्याः कठिनतपसि संतुष्टः शिवः तस्याः अभिलषितं स्वीकरोति। विवाहानन्तरं नवदम्पती यथेच्छं विहरतः। कालिदासस्य शिवः पार्वती च कैलासे हिमालये च वर्तमाने देवते न स्तः किन्तु मज्जया, मांसेन, विकारेण च युक्तौ मानवौ एव। अपि च त्यागे एव आर्द्रतायाः परिपूर्णता न तु सुखभोगे इति कालिदासः विश्वसिति।

### 1.2.6 रघुवंशम्

रघुवंशं कालिदासस्य गौरवतमः ग्रन्थः। कालिदासस्य प्रतिभाविलासस्य मकुटोदाहरणमिदं काव्यम्। अस्य इदानीम् एकोनविंशतिः सर्गाः लभ्यन्ते। अस्मिन् महाकाव्ये कविः दिलीपादारभ्य अग्निवर्णपर्यन्तं वर्तमानां एकोनविंशतिः रघुवंशराजानां चरित्रं वर्णयति। काव्यमिदं "वागर्थाविव सम्पृक्तौ वागार्थप्रतिपत्तये जगतः पितरौ पार्वतीपरमेश्वरौ" इत्येवं रीत्या स्तुतिं करोति।

कलायाः चरित्रस्य काव्यस्य च सुष्ठु मिश्रणत्वेन वर्तमाने अस्मिन् काव्ये प्रथमे सर्गे अनपत्यतया दूयमानः दिलीपः पुत्रलाभमभिलषन् उपदेशाय गुरोः वसिष्ठस्याश्रमं गच्छति। वसिष्ठस्तं सुरभीशापकारणं विज्ञाप्य नन्दिनीसेवनाय आदिशति। राज्ञः दिलीपस्य नन्दिनीपरिचर्यवर्णनमेव द्वितीये सर्गे। राज्ञः सेवया सन्तुष्टा नन्दिनी राज्ञे पुत्रप्राप्तिरूपं वरं ददाति। तृतीये सर्गे सदोहदायाः सुदक्षिणायाः वर्णनं वर्तते। सुदक्षिणा रघुं प्रसूते। चतुर्थे सर्गे रघुदिग्विजययात्रा कविना वर्णितास्ति। कालिदासस्य सूक्ष्मनिरीक्षणपाटवस्य निदर्शनं भवत्ययं सर्गः। द्विग्विजययात्रा पौरस्त्यं-

कलिङ्ग-महेन्द्र-मलय-ताम्रवर्णा-केरल-मुरल-यवन-हूणादिप्रदेशेषु भवति। तन्मध्ये केरलस्त्रीणां जन्मना वर्तमानं लज्जामिश्रितं भीरुत्वमपि कविना सूचितमेव।

रघोः पुत्रः भवति अजः। अजः इन्दुमतीं स्वयंवरे स्वीकृतवान्। षष्ठे सर्गे इन्दुमतीस्वयंवरसभावर्णना वर्तते। सप्तमे अजस्य इन्दुमत्या सह स्वयंवरवर्णनं वर्तते। पुनः अजात् दशरथः संजातः। इन्दुमत्याः वियोगे विलपन्तं अजम् अष्टमे सर्गे वर्णयति। दशरथस्य प्रजापरिपालनरीतिः नवमे सर्गे प्रतिपादयति। अपि च वसन्तवर्णनं मृगयावर्णनं च अस्मिन् सर्गे स्तः। दशमे सर्गे रामायणकथा आरभते। भगवत्स्तुतिः श्रीरामादीनां जन्मवृत्तान्तश्च सन्ति।

श्रीरामस्य सीतापरिणयं परशुरामस्य गर्वभङ्गश्च एकादशे सर्गे वर्णयति। श्रीरामाभिषेकविघ्नः सीतया साकं वनगमनञ्च द्वादशे सर्गे चित्रितास्ति। त्रयोदशे सर्गे लङ्कातः श्रीरामस्य अयोध्यां प्रत्यागमनं भूगोलवर्णनं च स्तः। चतुर्दशे सर्गे सीतापरित्यागः वर्तते। पञ्चदशे सर्गे श्रीरामस्य पुष्पकविमाने स्वर्गगमनं वर्णयति। षोडशे सर्गे कुशस्य जलविहारवर्णना तथा कुमुदितीविवाहं च वर्णयति। सप्तदशे सर्गे कालिदासे वर्तमानां राष्ट्रतन्त्रज्ञतां तथा अर्थशास्त्रनीतिशास्त्रनिपुणतां च सूचयति। तस्मिन् सर्गे अतिथेः राज्याभिषेकं वर्णयति। अष्टादशे सर्गे निषध-नल-नभ पुण्डरीकप्रभृति सुदर्शनपर्यन्तानां राज्ञां भरणं वर्णयति। एकोनविंशे सर्गे अग्निवर्णस्य कामकेलीवर्णनं वर्णयति। यदि राजानः धर्मात् व्यतिचलन्ति तर्हि राज्ये मूल्यच्युतिः जायते, अगाधे गर्ते राज्यं निपतिष्यति इति कार्यं भरणाधिकारिभ्यः प्रदर्शितुमेव कालिदासः रघुवंशं रचितवान् इति पण्डितमतम्।

### 1.2.7 मेघदूतम्

सन्देशकाव्यप्रस्थाने श्रेष्ठत्वेन प्रशोभमानं कालिदासस्य मेघसन्देशं पूर्वोत्तरभागत्वेन विभक्तम्। निरूपकदृष्ट्या सन्देशकाव्यानामारम्भः कालिदासेन इति भवति। अस्मिन् काव्ये अष्टादशाधिकशतं पद्यानि सन्ति इति मल्लिनाथः। इष्टजनवियोगेन वर्तमानो जनः स्वाभिलाषं केनचित् सन्देशवाहकेन स्वप्रेयस्याः इष्टजनस्य वा समीपं नेतुं प्रार्थयते।

स्वामिनः वर्षभोग्येण शापेन स्वदेशं विहाय रामगिरिमधिवसन् कश्चन यक्षः आषाढमासे आकाशं मेघैरावृतं दृष्ट्वा दु:खाकुलः सन् वप्रक्रीडां कुर्वन्तं मेघं स्वप्रेयस्यै स्वकुशलमयीं वार्तां प्रेषयितुमिच्छन् रामगिरेः अलकापर्यन्तं गन्तुं प्रार्थयते। प्रायेण विप्रलम्भशृङ्गाररसे रचितेषु सन्देशकाव्येषु कदाचित् सन्देशकाव्यवाहकाः निर्जीवाः वस्तुनः पक्षिमृगादयो वा स्युः।

मेधदूतेऽस्मिन् रामगिरितः अलकापर्यन्तं वर्तमानं मार्गं कविः वर्णयति। पुनः सन्देशं बोधयति।

श्यामलादण्डकम्, नवरत्नमाला, स्फुटरचना च कालिदासकृतित्वेन गृह्यन्ते। किन्तु पण्डिताः अस्मिन् कार्ये भिन्नाभिमता भवन्ति।

## 1.3 सन्देशकाव्यस्य स्वरूपम्

संस्कृतसाहित्ये वर्तमानस्य दूतकाव्यपरम्परा अतिप्रचीना। संस्कृते सन्देशकाव्यस्य पन्थानं अनुसृत्य कैरल्यामपि बहवः ग्रन्थाः संजाताः। तेषु प्रसिद्धः भवति ए आर् राजराजवर्मणः मयूरसन्देशः।

काव्यशास्त्रे प्रथमाचार्यरूपेण वर्तमानस्य भामहस्य मते अचेतनवस्तुभिः कथं सन्देश वाहकत्वं साध्यमित्याशङ्का अवर्तत। तेन सूचितं यत्

अयुक्तिमद्यथा दूता जलभृन्मासरुतेन्दवः
तथा भ्रमरहारीतचक्रवाकशुकादयः॥
अवाचोऽयुक्तवाचश्च दूरदेशविचारिणः
कथं दूत्यं प्रपद्येरन् इति युक्त्या न युज्यते॥

तथापि काव्ये लोकेऽपि परावतदौत्यघटना काव्यसन्देशहारिता च वर्णपरम्परया श्रूयते एव। प्रायेण सर्वासु भारतीयभाषासु सन्देशकाव्यग्रन्थाः सन्ति। चमत्कारिण्या वाण्या लोकवृत्तं चित्राकर्तुं सन्देशकाव्यैः साध्यमेव। इतरकाव्यापेक्षया अधिकहृदयद्रवीकरणशक्तिः सन्देशकाव्येषु वर्तते। वैदिकमन्त्रेष्वपि सन्देशवाहकसूचनाः सन्ति। अप्रतिस्थसूक्ते अगसैनिकत्वेन प्रयुक्तोऽस्ति। वायुः इन्द्रस्य दूतः इति वेदे। विभिः इमां परम्परामनुसृत्य काव्यरचनाः कृताः। रामायणे हनुमन्तं श्रीरामः

दौत्यत्वेन सीतासमीपं प्रेषयति। रावणः शुकं दौत्यत्येन नियोजयति। कुमारसम्भवे देवाः अग्निं दौत्येन प्रेषयन्ति रुद्रस्य पार्श्वम्। महाभारते पाण्डवानां दौत्यं श्रीकृष्णः करोति।

कालिदासस्य मेघदूतरचनानन्तरं लौकिकदूतकाव्यपरम्परा आरब्धा। अनेकैः कविभिः मेघदूतम् इन्दुदूतं मनोदूतं पवनदूतं हंसदूतं पिकदूतमित्यादिकाव्यानि प्रणीतानि सन्ति।

साधारणतया सन्देशकाव्यानां भागद्वयम् -पूर्वभागः उत्तरभागः च। पूर्वभागे सन्देशवाहकं प्रति अभ्यर्थना, मार्गनिर्देशः च। उत्तरभागे नायिकायाः (नायकस्य वा) वासस्थलं नायिकावर्णना सन्देशश्च प्रतिपाद्यन्ते।

**पुनरावृत्तिः (Recap)**

- संस्कृतसाहित्ये जाज्वल्यमानं नक्षत्रं भवति कालिदासकविः।
- कालिदासेन त्रीणि नाटकानि द्वे महाकाव्ये द्वे खण्डकाव्ये च रचितानि।
- मालविकाग्निमित्रं नाटकविभागे, विक्रमोर्वशीयं त्रोटकविभागे चान्तर्भवतः।
- विश्वविख्यातस्य शाकुन्तलस्य प्रसक्तिः देशदेशान्तरेषु व्यापृता।
- कालिदासस्य लघुग्रन्थे ऋतुसंहारे कवेः सूक्ष्मदर्शनं, प्रकृतिस्नेहः, प्रसादगुणगुम्भनं च निरतिशयशोभया वर्तन्ते।
- शिवपार्वत्योः परस्परप्रणयः तस्य मधुरतरामास्वाद्यतां चास्मिन् प्रतिपाद्यविषयः भवति।
- कलायाः चरित्रस्य काव्यस्य च सुष्ठु मिश्रणेन रघुवंशकाव्ये रघुवंशजातानां चरित्रमुपवर्णयति।
- स्वामिनः वर्षभोग्येण शापेन स्वदेशं विहाय रामगिर्याश्रममधिवसन् कश्चन यक्षः आषाढमासे आकाशं मेघैरावृतं दृष्ट्वा दुःखाकुलः संवृत्तः।
- इतरकाव्यानि अपेक्ष्या अधिकहृदयद्रवीकरणशक्तिः मेघदूते वर्तते।
- कामार्ता हि प्रकृतिकृपणा चेतनाचेतनेषु सूचयन् कविः रामगिरितः अलकापर्यन्तं गन्तुं मार्गं मेघं निर्दिशति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. ‘इन्त्यन् षेक्स्पियर्’ इति नाम्ना प्रसिद्धः कः ?
2. रूपकेषु त्रोटकविभागे वर्तमानं कालिदासस्य नाटकं किम् ?
3. अभिज्ञानशाकुन्तलं कस्य कृतिरस्ति ?
4. दुष्यन्तशकुन्तलयोः विवाहः कीदृशः ?
5. शकुन्लायै कः शापं ददाति ?
6. अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्के कियन्तः प्रसिद्धाः श्लोकाः सन्ति ?
7. दुष्यन्तप्रदत्तं शकुन्तलायाः अंङ्गुलीयकं कुत्र स्खलितम् ?
8. ऋतुसंहारे कति सर्गाः सन्ति ?
9. ऋतुसंहारम् इति ग्रन्थे कति श्लोकाः सन्ति ?
10. ऋतुसंहारे ऋतुवर्णनक्रमे प्रथमः ऋतुः कः ?
11. पार्वत्याः तपश्चरणं कस्मिन् काव्ये ?
12. रघुवंशे कति सर्गाः सन्ति ?
13. दिलीपस्य नन्दिनीपरिचर्यवर्णनं रघुवंशस्य कस्मिन् सर्गे वर्णितमस्ति ?
14. “वागर्थाविव सम्पृक्तौ वागार्थप्रतिपत्तये” कस्मिन् ग्रन्थे इयमुक्तिः ?
15. अजविलापः रघुवंशस्य कस्मिन् सर्गे समुपलभ्यते ?
16. मेघदूते प्रधानः रसः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. कस्मिन् अलङ्कारे कालिदासः स्वप्रतिभां नितरां प्रकाशयति?
2. कवीनां गणनाप्रसङ्गे कनिष्ठकाधिष्ठितः कविः कः ?
3. कालिदासस्य कियन्ति नाटकानि ? तानि कानि ?
4. ऋतुसंहारे ऋतु-क्रमः कोऽस्ति ?
5. सन्देशकाव्यानां भागद्वयं किम् ?
6. इतरकाव्यान्यपेक्षया अधिकद्रवीकरणशक्तिः कीदृशेषु काव्येषु वर्तते?

## एकैकया खण्डिकया उत्तरं लिखत
**(Answer the following questions in a paragraph)**

1. कालिदासस्य द्वे खण्डकाव्ये।
2. मेघदूतम्।
3. विक्रमोर्वशीयम् अधिकृत्य लघुटिप्पणिं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. कालिदासस्य रचनावैशिष्ट्यम्।
2. अभिज्ञानशाकुन्तलस्य महत्त्वं प्रतिपादयत।
3. सन्देशकाव्यस्य स्वरूपं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. कालिदासः।
2. विक्रमोर्वशीयम्
3. कालिदासस्य।
4. गान्धर्वविवाहः।
5. दुर्वासः।
6. चत्वारः।
7. शचीतीर्थे।
8. षट्।
9. १५३ श्लोकाः।
10. ग्रीष्मः।
11. कुमारसम्भवे।
12. एकोनविंशतिः।
13. द्वितीये सर्गे।

SGOU

14. रघुवंशे।
15. अष्टमे सर्गे।
16. विप्रलम्भश्रृङ्गारः।

**सूचनाग्रन्थाः (References)**


1. महाकविकालिदासः - डा. रामजी उपाध्याय, चौखम्बा संस्कृतसीरीस्, वाराणसी।
2. कालिदाससर्वस्वम् - सुधांशुचतुर्वेदी(मलयालम्), टी.सी.बुक्स्, कोट्टयम्।
3. मेधदूतम् - (पूर्वमेघः) कालिदासः, कृष्णदास् अक्कादमी, वारामसी, 1998
4. A Short History of Sanskrit Literature T.K.Ramachandra Iyer, R.S.Vadyar& Sons, Palakkad.

# Unit - 2
## यक्षस्य मेघदर्शनम्-स्वागतव्यवहारः।

**उद्देश्यानि (Learning Outcomes)**

- यक्षस्य मेघदर्शनं स्वागतव्यवहारं च परिचिनोति।
- यक्षः अलकापर्यन्तं गमनाय मेघं प्रेरयति। तन्मध्ये भारतस्य भौगोलिकसम्पत्तिमधिकृत्य जानाति
- श्लोकानाम् अन्वयान्वयार्थरीत्या आशयं विशदयति।

**प्राग्व्यपेक्षाः (Prerequisites)**

गीतिकाव्यं मेघदूतं द्वयोः भागयोः विभक्तम्। पूर्वमेघः उत्तरमेघः च। मेघदूते यक्षस्य वर्णनमस्ति। कुबेरस्य अनुचरः यक्षः कुबेरेण शप्तः। मेघदर्शने यक्षस्य मनसि महान् विकारतरङ्गः समाजायत। मेघदर्शने कामिनीसंयुक्तस्य जनस्यापि चित्तं विकृतिं प्राप्नोति। विरहिणां मेघसन्दर्शनमुद्दीपनं भवति।

**मुख्यपदानि (Keywords)**

रामगिर्याश्रमेषु - कामी - वप्रक्रीडापरिणतगजप्रेक्षाणीयं - अन्तर्बाष्पश्चिररमनुचरः - राजराजस्य - प्रीतिप्रमुखवचनं - स्वागतम्।

**Discussion**

**1.2.1** प्रकृतम् -कालिदासः वस्तुनिर्देशेन मेघदूतरचनामारभते।

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**

**शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**

**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।१॥**

**पदच्छेदः** - शापेनास्तंगमितमहिमा - शापेन + अस्तंगमितमहिमा । यक्षश्चक्रे -यक्षः +चक्रे ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| स्वाधिकारात्प्रमत्तः कश्चित् यक्षः | - | स्वनियोगात् अनवहितः कश्चन गुह्यकः |
| कान्ताविरहगुरुणा | - | दुस्तरेण कान्ताविरहेण । |
| वर्षभोग्येण भर्तुः शापेन | - | संवत्सरभोग्येन स्वामिनः शापेन |
| अस्तंगमितमहिमा | - | अस्तमितसामर्थ्यः सन् |
| जनकतनयास्नानपुण्योदकेषु | - | सीतायाः स्नानैः पावनीभूतोदकेषु |
| स्निग्धच्छायातरुषु | - | छायाप्रधानेषु वृक्षेषु |
| रामगिर्याश्रमेषु वसतिं चक्रे | - | चित्रकूटस्याश्रमेषु अवसत् । |

**सारः -** कश्चन यक्षः स्वप्रियाप्रेमपाशबद्धतया स्वाधिकारे कृतप्रमादः स्वामिना एकवर्षपर्यन्तं भार्यावियोगं सोढुं शप्तः। सः सीतायाः स्नानैः पवित्रीभूतजलेषु निबिडच्छायातरुषु रामगिर्याश्रमेषु वासं चक्रे।

**क्रिया** - चक्रे, डुकृञ् करणे। आत्मनेपदि -लिट् -प्रपु -ए -व।

चक्रे -चक्राते -चक्रिरे।

**विग्रहः** - अस्तं गमितो महिमा यस्य सः अस्तंगमितमहिमा।

**व्याकरणकार्यम्** - स्वाधिकारात्प्रमत्तः इत्यस्य प्रमादार्थसूचकस्य प्रमत्तपदप्रयोगात् 'जुगुप्साविरामप्रमादा- र्थानामुपसंख्याम् इत्यपादानत्वात् पञ्चमीविभक्तिः।

**पर्यायपदानि** - शापः, आक्रोशः, दूरेषणा, आक्रोशनम्।

**वृत्तम्** - मन्दाक्रान्ता। 'मन्दाक्रान्ता जलधिषडगैःम्भौ नतौ ताद् गुरू चेत् इति लक्षणम्'।

**1.2.2** प्रकृतम्- यक्षः मेघं ददर्श।

**तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**

**नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।**

**आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं**

**वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।।२।।**

**पदच्छेदः** - तस्मिन्नद्रौ -तस्मिन् +अद्रौ।

कतिचिदबलाविप्रयुक्तः - कतिचित् + अबलाविप्रयुक्तः।

स कामी - सः + कामी।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तस्मिन्नद्रौ अबलाविप्रयुक्तः | - | चित्रकूटपर्वते कान्ताविरही |
| कनकवलयभ्रंशरिक्तप्रकोष्ठः | - | सुवर्णवलयस्य भ्रंशेन शून्यप्रकोष्ठवान् (विरहदुःखात्कृशः) |
| कामी सः | - | कामुकः स यक्षः |
| कतिचित् मासान् नीत्वा | - | अष्टौ मासान् यापयित्वा |
| आषाढस्य प्रथमदिवसे | - | आषाढमासस्य आद्यदिने |
| आश्लिष्टसानुं | - | पर्वतशिखरमारूढम्। |
| वप्रक्रीडापरिणतगजप्रेक्षणीयं | - | तिर्यग्दन्तप्रहारकारिणं गजमिव प्रेषियति योग्यम्। |
| मेघं ददर्श | - | जलधरमपश्यत्। |

**सारः -** भार्याविरही स यक्षः तस्मिन् पर्वते अष्टौ मासान् कथञ्चित् यापयित्वा प्रक्षीणशरीरः सन् आषाढस्य प्रथमदिवसे पर्वतशिखरे संप्राप्तं शृङ्गाद्यैः वप्रक्रीडां कुर्वन्तं गजानुकारिणं मेघमपश्यत्।

**क्रिया** - ददर्श - दृशिर् प्रेक्षणे पर -लिट् -प्र.पु -ए.व।

ददर्श - ददर्शतुः -ददर्शुः।

**अलङ्कारः -** वप्रक्रीडां कुर्वन्तं गजमिव वर्तमानः मेघः इति वर्णनया उपमालङ्कारः।

'उपमा यत्र साद्दश्यलक्ष्मीरुल्लसति द्वयोः' इति लक्षणम्।

**विग्रहः -** वप्रक्रीडापरिणतगजप्रेक्षणीयं -वप्रस्य क्रीडा वप्रक्रीडा तत्र परिणतः गज इति प्रेक्षितुं योग्यं वप्रक्रीडापरिणतगजप्रेक्षणीयम्।

**1.2.3** प्रकृतं - मेघदर्शनानन्तरं यक्षः किमकरोत्?

**तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-**

**रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।**

**मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः**

**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।।३।।**

**पदच्छेदः** - कौतुकाधानहेतोरन्तर्बाष्पश्चिरम् - कौतुकाधानहेतोः + अन्तर्बाष्पः + चिरम्।

सुखिनोऽप्यन्यथावृत्तिः - सुखिनः + अपि +अन्यथावृत्ति।

पुनर्दूरसंस्थे - पुनः + दूरसंस्थे।

अनुचरो राजराजस्य - अनुचरः + राजराजस्य।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| राजराजस्यानुचरः अन्तर्बाष्पः | - | कुबेरस्य किङ्करः यक्षः स्तम्भितासु |
| कौतुकाधानहेतोः तस्य पुरः | - | अभिलाषोत्पादककारणस्य मेघस्य अग्रे |
| कथमपि स्थित्वा | - | महता प्रयासेन स्थित्वा। |
| चिरं दध्यौ | - | चिरकालं चिन्तयामास। |
| मेघालोके सुखिनोऽपि | - | मेघस्य दर्शने प्रियादिजनसङ्गतस्यापि। |
| चेतः अन्यथावृत्तिः | - | चित्तं विकृतिमापद्यते। (मेघालोके सुखिनोऽपि चित्तं विकृतिं प्राप्नोति।) |

कण्ठाश्लेषप्रणयिनि जने - कण्ठालिङ्गनार्थिने जने (वल्लभालक्षणे जने)

दूरसंस्थे किं पुनः ? - दूरे स्थिते इति किं वक्तव्यम् (विरहिणः कार्यं किमु वक्तव्यम् )।

**सारः** - कुबेरसेवकः स यक्षः कामोत्पादकस्य तस्य मेघस्य पुरः महता प्रयासेन स्थित्वा अन्तःस्तंभितासुः सन् चिन्तयामास। मेघदर्शने प्रियादिजनसङ्गतस्यापि चित्तं विकृतिं प्राप्नोति, किं पुनः प्रेयसीविरहिणो विषये वक्तव्यम्।

**क्रिया** - दध्यौ। ध्यै चिन्तायाम्, पर-लिट् -प्र.पु -ए.व।

**अलङ्कारः** - अर्थान्तरन्यासः। 'उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः'।

**व्याकरणकार्यम्** - राजराजस्य। राज्ञः राजा राजराजः , तस्य राजराजस्य।

समासान्तस्थितस्य 'राजन्' शब्दस्य 'राजाहःसखिभ्यष्टच्' इति सूत्रेण टच्प्रत्यये अकारान्तवद्रूपं लभते।

**पर्यायपदानि** - चेतः। चित्तं तु चेतोहृदयं हृद् हृदमानसं मनः इति।

**1.2.4** प्रकृतम् **-** अन्तस्तंभितासु**:** यक्षः किमकरोदिति सूचयति।

**प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**

**जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।**

**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै**

**प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।।४।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| नभसि प्रत्यासन्ने | - | आषाढानन्तरं श्रावणे प्राप्ते। |
| दयिताजीवितालम्बनार्थी | - | स्वप्रेयस्याः जीवनरक्षाभिलाषी। |
| जीमूतेन स्वकुशलमयीं प्रवृत्तिं | - | मेघेन स्वक्षेमप्रधानां वार्तां |
| हारयिष्यन् सः प्रत्यग्रैः | - | प्रापयिष्यन् यक्षः नूतनैः |

कुटजकुसुमैः कल्पितार्घाय - गिरिमल्लिकाभिः अनुष्ठितपूजाविधिभिः

तस्मै प्रीतिप्रमुखवचनं - मेघाय प्रीतियुक्तं वचनं।

प्रीतः स्वागतं व्याजहार - सन्तुष्टः सन् स्वागतं अकथयत्।

**सारः** - श्रावणमासे संप्राप्ते विरहातुरायाः स्वप्रेयस्याः जीवनरक्षाभिलाषी मेघेन स्वकुशलवार्तां प्रेषयितुकामः स यक्षः नूतनैः मल्लिकाकुसुमैः मेघाय पूजां प्रकल्प्य प्रियया वाचा स्वागतोक्तिम् अवदत्।

**क्रिया**- व्याजहार। वि + आङ् - हृञ् हरणे -पर-लिट् -प्र.पु -ए.व।

व्याजहार - व्याजह्रतुः - व्याजह्रुः।

**व्याकरणकार्यम्** - तस्मै स्वागतं व्याजहार इत्यत्र 'क्रियाग्रहणमपि कर्तव्यं' इति सम्प्रदानत्वात् चतुर्थी। तस्मै इति चतुर्थी।

**पर्यायपदानि** - प्रवृत्तिः। वार्ता प्रवृत्तिर्वृत्तान्तः इत्यमरः।

**विग्रहः** - कल्पितार्घाय - कल्पितः अर्घः यस्मै तस्मै कल्पितार्घाय।

**पुनरावृत्तिः (Recap)**

- कालिदासमहाकविः मेघदूते खण्डकाव्ये विरहिणं यक्षं वर्णयति।
- कान्ताविरही सः आषाढमासस्य प्रथमदिवसे चित्रकूटपर्वते वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं दृष्ट्वा एवमचिन्तयत्।
- स्वप्रेयस्याः जीवनरक्षाभिलाषी सन् मेघेन स्वकुशलमयीं वार्तां प्रेषयितुकामः कुटजकुसुमैः मेघं पूजितवान्।

**वस्तुनिष्ठप्रश्नाः (Objective type questions)**

1. 'मेघदूतम्' इत्यस्य कर्ता कः ?
2. मेघसन्देशकाव्ये नायकः कः ?
3. यक्षः शापकालं कुत्र यापयति ?
4. चित्रकूटपर्वते कः वप्रक्रीडाम् करोतीव यक्षः पश्यति ?
5. राजराजस्यानुचरः कः ?
6. मेघालोके सुखिनोऽपि चित्तं कथं स्यात् ?

**एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत**
**(Answer the following questions in one or two sentences)**

1. मेघालोके सुखिनोऽपि चित्तं कथं स्यात् ?
2. मेघदर्शनान्तरं यक्षः किमकरोत् ?

**एकैकया खण्डिकया उत्तरं लिखत**
**(Answer the following questions in a paragraph)**

1. कश्चित्कान्ता इत्यारभ्यमाणस्य श्लोकस्यान्वयं लिखत।
2. प्रत्यासन्ने नभसि इति श्लोकस्य सारांशं लिखत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. कालिदासः।
2. कश्चित् यक्षः।
3. रामगिरौ।
4. मेघः।
5. यक्षः।
6. विकृतिमत्।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दयालः, संसकृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वारणासि २०१६, पुटानि २२३-२४०
2. विश्वमहाकवि कालीदासन्, व्याख्या मेल्कुलङ्गर अजिकुमार, अक्षरपब्लिकेषन्स्, अनन्तपुरि 2001
3. कालिदासः, मेघदूतम् व्याख्या, श्री केदारनाथ शर्मा चौखम्बा सान्स्क्रिट् संस्थान, वारणासि, 2017 पुटानि १-६
4. कालिदासः, मेघदूतं (पूर्वमेघः) कृष्णदास अकादमी वारणासि 1998

# Unit - 3
## अलकापर्यन्तं गमननिर्देशः

### उद्देश्यानि (Learning Outcomes)

- सन्देशकाव्यप्रस्थाने मेघदूतस्य प्राधान्यम् अवगच्छति।
- विरहतप्तस्य यक्षस्य अवस्थाम् अवगच्छति।
- मेघस्य यात्रावर्णनद्वारा प्रकृतिशोभाम् आस्वदते।

### प्राग्व्यपेक्षाः (Prerequisites)

कालिदासमहाकविः मेघदूते खण्डकाव्ये विरहिणं यक्षं वर्णयति। कान्ताविरही सः आषाढमासस्य प्रथमदिवसे चित्रकूटपर्वते वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं दृष्ट्वा एवमचिन्तयत्। स्वप्रेयस्याः जीवनरक्षाभिलाषी सन् मेघेन स्वकुशलमयीं वार्तां प्रेषयितुकामः कुटजकुसुमैः मेघं पूजितवान्। मेघस्य सन्देशवाहकार्हता अस्ति वा नवेति सः न चिन्तितवान्। तस्य कारणं कविरत्र सूचयति। कामार्ता चेतनाचेतनेषु प्रकृत्या स्वभावहीना भवन्ति। सन्देशवाहकत्वाय चेतनवद्भिरेव शक्यते इति कार्यं ते कामपीडया विस्मरन्ति।

### मुख्यपदानि (Keywords)

पटुकरणैः - गुह्यकः - प्रकृतिकृपणाः - मघोनः- पुष्करावर्तकानां - धनपतिक्रोधविश्लेषितस्य - वसतिरलका।

**Discussion**

**अलकापर्यन्तं गन्तुं मेघं यक्षः प्रार्थयति।**

**1.4.1** प्रकृतम् - चेतनासाद्ध्यं सन्देशवाहकत्वं कथमचेतनेन साध्यते इत्याशङ्कायां कविः समाधत्ते।

**धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः**
**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥ ५॥**

**पदच्छेदः** - इत्यौत्सुक्यादपरिगणयन् - इति + औत्सुक्यात् + अपरिगणयन्।

गृह्यकस्तं - गुह्यकः + तम्।

प्रकृतिकृपणाश्चेतनाचेतनेषु - प्रकृतिकृपणाः + चेतनाचेतनेषु।

कामार्ता हि - कामार्ताः + हि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| धूमज्योतिसलिलमरुतां सन्निपातः | - | धूमानलजलवायूनां सङ्घातः |
| मेघः क्व | - | जलदः कुत्र ?(अचेतनत्वात् सन्देशाय अनर्हः इत्यर्थः ) |
| पटुकरणैः प्राणिभिः प्रापणीयाः | - | समर्थेन्द्रियैः चेतनैः प्राप्याः। (सन्देशार्थाः पटुकरणैः प्राणिभिः प्रापणीयाः।) |
| सन्देशार्थाः क्व | - | सन्देशाः ते अर्थाश्च कुत्र |
| इत्यौत्सुक्यादपरिगणयन् | - | इत्येवं विरहपीडया अविचारयन् |
| गुह्यकः तं ययाच | - | यक्षः तं मेघं याचितवान् |
| हि कामार्ताः चेतनाचेतनेषु | - | यस्मात् मदनातुराद् चेतनेषु अचेतनेषु |
| प्रकृतिकृपणाः (भवन्ति) | - | स्वभावेन दीनाः भवन्ति। |

**सारः** - धूमानलजलवायूनां समष्टिरूपोऽचेतनः मेघः क्व। चेतनैः चतुरैः नरैः प्रापणार्हाः सन्देशाः क्व ? एतत्सर्वं औत्सुक्यादविचारयन् सः यक्षः मेघं याचितवान्। हि मदनातुराः स्वभावतः चेतनाचेतनविचारशून्याः भवन्ति।

**क्रिया** - ययाचे। याचृ याच्ञायाम्, आत्म-लिट् -प्र.पु -ए.व।

ययाचे - ययाचाते - ययाचिरे।

**अलङ्कारौ** - अर्थान्तरन्यासः, विषमः च। अयोग्ययोः द्वयोः विरुद्धयोः उत्पत्तिसंभवात् विषमालङ्कारः।

**विग्रहः** - पटुकरणैः। पटूनि (स्पष्टानि) करणानि (इन्द्रियाणि)येषां तैः पटुकरणैः।

**पर्यायपदानि** - प्राणी - प्राणी तु चेतनो जन्मी इत्यमरः।

**1.3.2** प्रकृतम् - मेघं यक्षः किं याचितवान्।

**जातं वंशे भुवनविदिते पुष्करावर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥**

**पदच्छेदः** - तेनार्थित्वम् -तेन + अर्थित्वम्।

दूरबन्धुर्गतोऽहम् - दूरबन्धुः + गतः + अहम्।

नाधमे - न + अधमे।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| (मेघ) भुवनविदिते | - | हे मेघ, भुवनेषु विख्याते |
| पुष्करावर्तकानां वंशे | - | कल्पान्तकालप्रसिद्धानां पुष्करावर्तकाह्वयानां कुले |
| कामरूपं मघोनः | - | इच्छाधीनविग्रहं इन्द्रस्य |
| प्रकृतिपुरुषं त्वां जानामि | - | प्रधानपुरुषं भवन्तम् अवगच्छामि |
| तेन दूरबन्धुः अहं | - | तेन करणेन विमुक्तभार्योऽहं (यक्षः) |

| | | |
|---|---|---|
| त्वयि अर्थित्वं गतः | - | यां याचकरूपेण प्राप्तः। |
| अधिगुणे याञ्चा मोघा वरम् | - | मेघे सत्कुले पुंसि प्रार्थना निष्फला अपि वरम् |
| अधमे लब्धकामा (अपि) | - | निर्गुणे प्रार्थना सफला अपि |
| न वरम्। | - | न श्रेष्ठम्। |

**सारः** - हे मेघ, कल्पान्तप्रसिद्धानां पुष्करावर्तकानां वंशे जातोऽसि। अपि च इन्द्रस्य प्रधानपुरुषश्च। तेन कारणेन भार्यावियुक्तः दूरबन्धुरहं त्वां प्रार्थये। हि सत्कुलजे पुरुषे कृता प्रार्थना निष्फला सत्यपि वरं भवति, निर्गुणे कृता प्रार्थना सफला सत्यपि, न श्रेष्ठम्।

**क्रिया-** जानामि। ज्ञा अवबोधने -पर - लट् - उ.पु। ए.व।

जानामि - जानीव -जानीमः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**विग्रहः**- भुवनेषु विदितं भुवनविदितं तस्मिन् भुवनविदिते।

**पर्यायः** - मघवा। इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः।

**1.3.3** प्रकृतम् - अलकापर्यन्तं यातुं यक्षः मेघं प्रार्थयति।

**संतप्तानां त्वमसि शरणं तत्पयोधः प्रियायाः**
**सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां**
**बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ।।७।।**

**पदच्छेदः** **-** वसतिरलका - वसतिः + अलका।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| पयोद, त्वं संतप्तानां | - | हे मेघ, त्वं आतपेन प्रवासविरहेण वा पीडितानां |
| शरणमसि | - | पयोदानेन स्वस्थानप्रेरणया च रक्षकोऽसि |
| तत् धनपतिक्रोधविश्लेषितस्य | - | तस्मात् कुबेरस्य क्रोधेन प्रियया वियुक्तस्य |
| मे सन्देशं हर | - | मम वार्तां प्रियां प्रति नय |

| | | |
|---|---|---|
| बाह्योद्यानस्थितहरशिरश्चन्द्रिका-धौतहर्म्या | - | कैलासोपवनस्थितस्य हरस्य शिरसि वर्तमानायाः चन्द्रिकायाः प्रकाशेन धवलितहर्म्यतला |
| अलका नाम यक्षेश्वराणां | - | अलकेति प्रसिद्धा धनदसाम्यानां यक्षेश्वराणां |
| वसतिः ते गन्तव्या | - | स्थानं तव गन्तव्या (त्वया गन्तव्या) |

**सारः -** हे मेघ, भवान् संतप्तहृदयानां सन्तापनिवारयोग्यः भवति। तत्कारणात् कुबेरशापात् प्रियावियुक्तस्य मम सन्देशं प्रियां प्रति नय। कैलासोपवनस्थितस्य शिवस्य शिरसि वर्तमानायाः ज्योत्स्नायाः प्रकाशेन धवलितहर्म्यतला अलका नाम पुरी तव गन्तव्यास्ति।

**क्रिया** - हर। हृञ् हरणे पर-लोट् -म.पु -ए.व।

हर - हरतात्, हरतं, हरत।

**विग्रहः** - बर्हिभवं बाह्यम्।

**व्याकरणकार्यम्** - गन्तव्या ते वसतिरलका इत्यत्र 'कृत्यानां कर्तरि वा' इति सूत्रेण षष्ठी। ते इति षष्ठी।

**पर्यायपदानि** - वसतिः। वसतिः, वासः, निकेतनं, यामिनी।

## पुनरावृत्तिः (Recap)

- मेघस्य सन्देशवाहकार्हता अस्ति वा नवेति सः न चिन्तितवान्।
- कामार्ता चेतनाचेतनेषु प्रकृत्या स्वभावहीना भवन्ति।
- सन्देशवाहकत्वं चेतनवद्भिरेव शक्यते इति कार्यं ते कामपीडया विस्मरन्ति।
- अलकापर्यन्तं यातुं यक्षः मेघं प्रार्थयति।
- कैलासोपवनस्थितस्य शिवस्य शिरसि वर्तमानायः ज्योत्स्नायाः प्रकाशेन धवलितहर्म्यतला अलका पुरी भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. मेघदूते चेतनाचेतनेषु प्रकृतिकृपणः कः ?

2. मेघेषु भुवनविदितः वंशः कः ?
3. त्वं संतप्तानां शरणमसि - कः ?
4. धनपतिक्रोधविश्लेषितस्य मे सन्देशं हर। धनपतिः कः ?
5. यक्षेश्वराणां वसतिः का ?
6. अलकापुराधीशः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. पटुकरणैः प्राणिभिः प्रापणीयाः के भवन्ति ?
2. अलकापुरी कीदृशी भवति ?
3. “कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु” अयं सूक्तिः कुतः उद्धृतः ?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. कामार्ता हि प्रकृतिकृपणचेतनाचेतनेषु - ससन्दर्भं आशयं विशदयत।
2. मेघं यक्षः किं याचितवान्।

## निर्दिष्टाभ्यासः (Assignments)

1. रघुवंशस्य प्रथमसर्गात् प्रथमा नां पञ्चश्लोकानां कथासारं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. यक्षः।
2. पुष्करावर्तकानां वंशः।
3. मेघः।
4. कुबेरः।
5. अलकापुरी।
6. कुबेरः।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दायालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वारणासि २०१६, पुटानि २२३-२४०
2. विश्वमहाकवि कालीदासन्, व्याख्या मेल्कुलङ्गर अजिकुमार, अक्षरपब्लिकेषन्स्, अनन्तपुरि 2001
3. कालिदासः, मेघदूतम् व्याख्या, श्री केदारनाथ शर्मा चौखम्बा सान्स्क्रिट् संस्थान, वारणासि, 2017 पुटानि १-६
4. कालिदासः मेघदूतं (पूर्वमेघः) कृष्णदास अकादमी वारणासि 1998

BLOCK-2

# मार्गवर्णना -1

SGOU

# Unit - 1
## मार्गवर्णना

### उद्देश्यानि (Learning Outcomes)

- कालिदासस्य काव्यप्रतिभां जानाति।
- सन्देशकाव्यप्रस्थाने मेघदूतस्य प्राधान्यम् अवगच्छति।
- विरहतप्तस्य यक्षस्य अवस्थाम् अवगच्छति।
- मेघस्य यात्रावर्णनद्वारा प्रकृतिशोभाम् आस्वदते।

### प्राग्व्यपेक्षाः (Prerequisites)

महाकवेः कालिदासस्य अतुल्यं खण्डकाव्यं भवति मेघदूतम्। विरही यक्षः रामगिर्याश्रमेषु शापेन अस्तंगमितमहिमा सन् दुःखमनुभूय वसति। आषाढमासस्य प्रथमदिवसे चित्रकूटपर्वते वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं दृष्ट्वा स यक्षः चिन्तितवान्। मेघालोके सुखिनः अपि चित्तं विकृतिं प्राप्नोति। एवं चेत् प्रणयिनि जने दूरसंस्थे चेत् किं वक्तव्यम्। दयिताजीवनालम्बनार्थी स यक्षः नूतनैः कुटजकुसुमैः मेघं संपूज्य प्रीतः सन् स्वागतं व्याजहार। सन्देशवाहकपाटवं मेघे अस्ति वा न वा इति अपरिगणयन् स प्रियायै सन्देशं वोढुं मेघं प्रार्थितवान्। हे मेघ! अत्युन्नते श्रेष्ठे कुले त्वं जातोऽसि। देवेन्द्रस्य प्रधानपुरुषः अस्ति। कान्तावियुक्तोऽहं सत्कुलजं त्वां प्रार्थये। त्वं संतप्तहृदयानां दुःखनिवारणक्षमोऽसि। अतः कुबेरशापात् प्रियाविमुक्तस्य मे सन्देशं प्रियां प्रति नय। यक्षेश्वराणाम् आवासभूमिः अलका नाम पुरी अस्ति। तत्र भवता गन्तव्यम्। रामगिर्याश्रमात् अलकापर्यन्तं वर्तमानं मार्गं कथमिति पठामः।

## मुख्यपदानि (Keywords)

आश्वसत्यः पथिकवनिताः त्वां प्रेक्षिष्यन्ते - आशाबन्धः प्रणयिहृदयं विप्रयोगे रुणद्धि - तुङ्गममुं शैलमालिङ्ग्य आपृच्छस्व - श्रोष्यसि श्रोत्रपेयं सन्देशं श्रोष्यसि - दिङ्नागानां स्थूलहस्तावलेपान् परिहरन् - बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः - भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैर्जनपद-वधूलोचनैः पीयमानः।

## Discussion

**2.1.1.** प्रकृतम्- आकाशमारूढं मेघं दृष्ट्वा प्रोषितभर्तृकाः स्त्रियः त्वामवलोकयन्ति।

**त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।**
**कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां**
**न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ।।८।।**

**पदच्छेदः-** प्रत्ययादाश्वसत्यः - प्रत्ययात् + आश्वसत्यः।
त्वय्युपेक्षेत- त्वयि + उपेक्षेत।
स्यादन्योऽप्यहम् - स्यात् + अन्यः + अपि +अहम्।
जनो यः - जनः + यः।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| पवनपदवीमारूढं त्वाम् | - | आकाशमारूढं भवन्तम् |
| पथिकवनिताः प्रत्ययात् आश्वसत्यः | - | प्रोषितभर्तृकाः स्त्रियःप्रियागमनविश्वासात् विश्वसिताः |
| उद्गृहीतालकान्ताः | - | दृष्टिप्रसारार्थमुन्नम्य धृतालकाग्राः सत्यः (स्वचूर्णकुन्तलान्तमुद्गृह्य) |
| प्रेक्षिष्यन्ते | - | उत्कण्ठया द्रक्ष्यन्ते। |
| त्वयि सन्नद्धे विरहविधुराम् | - | त्वयि समागते वियोगेन विधुराम् |
| जायां कः उपेक्षेत | - | पत्नीं कः उपेक्ष्य गच्छेत् |
| अन्योऽपि यो जनः | - | अन्यः कोऽपि जनः |

| | | |
|---|---|---|
| अहमिव पराधीनवृत्तिः न स्यात् | - | अहमिव परायत्तजीवनः न स्यात् (स्वतन्त्रस्तु न कोऽप्युपेक्षेत)। |

**सारः -** हे मेघ, आकाशस्थितम् त्वां प्रोषितभर्तृकाः स्त्रियः वर्षर्तुसंभवात् द्रुतं भर्तारः आगमिष्यन्तीति आश्वसत्यः स्वचूर्णकुन्तलान्तमुद्गृह्य अत्युत्कण्ठया विलोकयिष्यन्ति। त्वयि समागते सति विरहकातरां स्वप्रियां कः उपेक्षेत। परतन्त्रं मां त्यक्त्वा कः अन्यः स्यात्।

**क्रिया-** प्रेक्षिष्यन्ते। प्र + ईक्ष् दर्शने – आत्म-लृट्-प्र.पु-ब-व।

प्रेक्षिष्यते - प्रेक्षिष्येते - प्रेक्षिष्यन्ते।

**अलङ्कारः** – अर्थान्तरन्यासः।

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।

पन्थानं गच्छन्ति ते पथिकाः। पथिकानां वनिताः पथिकवनिताः।

**पर्यायपदानि** – प्रत्ययेऽधीनशपथज्ञानविश्वासहेतुषु इत्यमरः।

**2.1.2** - प्रकृतम् – निमित्तानि मेघस्य शुभसूचकानि भवन्ति।

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**
**गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।।९।।**

**पदच्छेदः** - पवनश्चानुकूलो यथा – पवनः + च + अनुकूलः + यथा।

वामश्चायं – वामः + च + अयम्। चातकस्ते – चातकः + ते।

गर्भाधानक्षणपरिचयान्नूनम् – गर्भाधानक्षणपरिचयात् + नूनम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अनुकूलः पवनः त्वाम् | - | पृष्टदेशादागतः अनुकूलः वायुः त्वाम्। |
| मन्दं मन्दं नुदति | - | नितरां मन्दं प्रेरयति। |

| | | |
|---|---|---|
| अयं सगन्धः ते वामः | - | अयम् साभिमानः तव वामभागस्थः। |
| चातकः मधुरं नदति | - | चातकपक्षी मधुरशब्दं व्याहरति। |
| गर्भाधानक्षणपरिचयात् | - | कुक्षिस्थितासु जन्तोः धारणरूपोत्सवसुखस्य क्षणेन परिचयत्वात्। |
| नयनसुभगं भवन्तं नूनं सेविष्यन्ते | - | दृष्टिप्रियं भवन्तं निश्चयेन सेवां करिष्यन्ति। |

**सारः** - हे मेघ, तव यात्रायाः शुभसमयः अयमेव। हि अनुकूलः पवनः अतिमन्दं त्वां प्रेरयति। वामभागस्थः चातकः मधुरशब्दं करोति। अतिरमणीयं भवति यत् गर्भाधानोत्सवसङ्गताः बलाकाङ्गनाः भवन्तम् आबद्धमालाः सेविष्यन्ते।

(यक्षः मेघं शुभयात्रासमयं निर्दिशति। अनुकूलः पवनः अतीवमन्दं भवन्तं प्रेरयति। वामभागस्थः चातकः मधुरशब्दं करोति । अतिरमणीयं भवति यत् गर्भाधानोत्सवसङ्गताः बलाकाङ्गनाः भवन्तम् आबद्धमालाः भूत्वा सेविष्यन्ते। )

**क्रियाः** - नुदति, नदति, सेविष्यन्ते।

नुदति- नुद् प्रेरणे – पर.लट्-प्रपु.ए-व।

नुदति - नुदतः - नुदन्ति।

**पर्यायपदानि** – चातकः। चातकः स्तोककोऽम्बीहः सारङ्गो नभोम्बुकम्।

मन्दं मन्दम् इत्यत्र प्रकारार्थे द्विर्भावः।

नयनयोः सुभगं नयनसुभगम्।

**2.1.3.** प्रकृतम् - द्रुतमेव यक्षस्य प्रेयस्याः समीपं मेघेन गन्तव्यम् इति सूचयति।

**तां चावश्यं दिवसगणनातत्परामेकपत्नी-**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।**
**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम्**
**सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ।।१०।।**

**पदच्छेदः** – चावश्यं - च + आवश्यं।

अविहतगतिर्द्रक्ष्यसि - अविहतगतिः + द्रक्ष्यसि।

प्रायशो ह्यङ्गनानाम् - प्रायशः + हि + अङ्गनानाम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| दिवसगणनातत्पराम् अव्यापन्नाम् | - | अवशिष्टदिनानां सङ्ख्याने आसक्ताम् अमृतां (शापावसाने मदागमनप्राप्त्याशया जीवन्तीम्) |
| एकपत्नीं भ्रातृजायां | - | पतिव्रतां भ्रातृजायां (भ्रातृवत् निश्शङ्कं दर्शनीयाम्) |
| ताम् अविहतगतिः द्रक्ष्यसि | - | ताम् अवच्छिन्नगतिः आलोकयिष्यसि। |
| हि आशाबन्धः प्रणयि | - | तस्मात् आशैव बन्धः प्रेमयुक्तम्। |
| विप्रयोगे सद्यःपाति | - | विरहे सद्यो भ्रंशनशीलम्। |
| अङ्गनानां हृदयं प्रायशः | - | स्त्रीणां जीवितं प्रायेण। |
| रुणद्धि | - | प्रतिबध्नाति। |

**सारः –** मम विरहावशिष्टदिनानि गणयन्तीं पतिव्रतां जीवन्तीं मे प्रियामविच्छिन्नगतिः त्वं द्रक्ष्यसि। हि विरहे तत्क्षणभङ्गुरमपि स्त्रीणां चित्तं प्रियस्य पुनस्समागमनरूपया आशया बन्धितः भूत्वा रुणद्धि।

**क्रिये** – द्रक्ष्यसि,रुणद्धि।

रुणद्धि – रुधिर आवरणे - पर-लट्-प्रपु-ए.व।

रुणद्धि – रुन्धः, रुन्द्धः - रुन्धन्ति।

द्रक्ष्यसि-दृश्-पर-लट्-म.पु-ए.व।

द्रक्ष्यसि - द्रक्ष्यथः - द्रक्ष्यथ।

**अलङ्कारः** - अर्थान्तरन्यासः। 'उक्तिरर्थान्तरन्यासः स्यात् सामन्यविशेषयोः'।

**पर्यायपदानि** - हृदयम्। चित्तम्, चेतः, हृदयम्, स्वान्तम्।

**2.1.4** प्रकृतम् - राजहंसाः भवतः सहायिनो भविष्यन्ति।

**कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां**

**तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।**

**आकैलासाद्बिसकिसलयच्छेदपाथेयवन्तः**

**सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ।।११।।**

**पदच्छेदः**- यच्च-यत् + च। तच्छ्रुत्वा - तद् + श्रुत्वा। भवतो राजहंसाः- भवतः + राजहंसाः।

आकैलासाद्बिसकिसलयच्छेदपाथेयवन्तः - आकैलासात् +बिसकिसलयच्छेदपाथेयवन्तः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यद् गर्जितं महीमुच्छिलीन्ध्राम् | - | यत् स्तनितं भूमौ उद्भूतकन्दलिकां (शिलीन्द्रपुष्पोदकम्) |
| अवन्ध्यां कर्तुं प्रभवति | - | सफलां कर्तुं शक्नोति। |
| तत् श्रवणसुभगं | - | तद् श्रोत्रसुखम् |
| ते गर्जितं श्रुत्वा | - | तव गर्जनमाकर्ण्य |
| मानसोत्काः | - | मानसे सरसि उत्सुकाः भूत्वा |
| बिसकिसलयच्छेदपाथेयवन्तः | - | मृणालकन्दशकलं भक्षणरूपेण कुर्वतः। |
| राजहंसाः नभसि भवतः | - | विमलविहङ्गहंसाः व्योम्नि तव |
| आकैलासत् सहायाः सम्पत्स्यन्ते | - | कैलासपर्यन्तं सहयात्रिकाः भविष्यन्ति। |

**सारः** - हे मेघ, शिलीन्ध्रपुष्पोदकं भाविसम्पत्तिसूचकं ते श्रुतिमधुरं गर्जनं श्रुत्वा कैलासपर्यन्तं मृणालकन्दशकलपाथेययुक्ताः मानससरोवरयायिनो राजहंसाः ते सहयात्रिणः भविष्यन्ति।

**क्रिये** – प्रभवति, सम्पत्स्यन्ते।

सम्पत्स्यन्ते - सम्पूर्व पत्लृ गतौ - आत्म - लट्-प्रपु.-ब.व।

सम्पत्स्यते - सम्पत्स्येते - सम्पत्स्यन्ते।

**व्याकरणकार्यम्** – आ कैलासात्। 'आङ् योगे पञ्चम्यपाङ्गरिभिः' इति सूत्रेण चतुर्थी।

पथि साधु पाथेयम् (भोज्यम्)। हंसानां राजा राजहंसः।

**पर्यायपदानि** - हंसः - श्वेतगरुत्, चक्राङ्गः, मानसोकाः।

**2.1.5** प्रकृतम् – चित्रकूटाचलं प्रति यात्रानुमतिं पृच्छतु।

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।**
**काले काले भवति भवतो तस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ।।१२।।**

**पदच्छेदः** - रघुपतिपदैरङ्कितम् – रघुपतिपदैः + अङ्कितम्।

भवतो यस्य – भवतः + यस्य। मुञ्चतो बाष्पम् - मुञ्चतः + बाष्पम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| प्रियसखं तुङ्गं पुंसां | - | प्रियसुहृदं उन्नतं प्राणिनाम् |
| रघुपतिपदैरङ्कितं मेखलासु | - | श्रीरामपादन्यासैः आराधनीयैः पर्वतमेखलासु |
| अङ्कितम् अमुं शैलं | - | चिह्नितम् अमुं चित्रकूटाद्रिं |
| आलिङ्ग्य आपृच्छस्व | - | आश्लेषं कृत्वा यात्रानुमतिं पृच्छ |
| काले काले भवतः | - | परिप्रावृट्कालं तव |
| संयोगमेत्य चिरविरहजं | - | प्राप्य चिरं विरहजात् जातम् |
| उष्णं बाष्पं मुञ्चतः यस्य | - | उष्णं नेत्रजलं मोचयतः यस्य शैलस्य |
| स्नेहव्यक्तिः भवति | - | प्रेमविभावो भवति। |

**सारः** - हे मेघ, सर्वलोकवन्द्यस्य श्रीरामचन्द्रस्य पादन्यासैः चिह्नितमध्यभागं प्रतिवर्षं प्रावृट्काले भवतः संपर्के चिरविरहसूचकं उष्णं नेत्रजं मुञ्चन्तं च तं प्रियमित्रं चित्रकूटाचलं समालिङ्ग्य गमनायानुज्ञां पृच्छ।

**चित्रकूटाचलः** - कान्तावियुक्तः यक्षः मेघं प्रति अलकापर्यन्तं गन्तुं प्रार्थयते। तदर्थं मार्गं वर्णयति। मार्गमध्ये चित्रकूटाचलः वर्तते। सर्वलोकवन्द्यस्य पादन्यासैः पावनीभूतं भवति अयमचलः। प्रतिवर्षं

प्रावृट्काले भवतः सम्पर्के चिरविरहसूचकम् उष्णं  नेत्रजलं पर्वतोऽयं मुञ्चति। तादृशं प्रियसुहृदं अचलं त्वं समालिङ्ग्य गमनायानुज्ञां पृच्छ।

**क्रिये** – आपृच्छस्व, भवति।

आपृच्छस्व -आङ् + प्रच्छ् ज्ञीप्सायां – आत्म-लोट्-मपु-ए.व।

आपृच्छस्व - आपृच्छेथां  -  आपृच्छध्वम्

**व्याकरणकार्यम्** - आपृच्छस्व इत्यत्र आङ् पूर्वस्य पृच्छ् धातोः 'आङिनुप्रच्छ्योरुपसंख्यानम्' इत्यात्मनेपदम्।

प्रियं सखायं प्रियसखम्।

**पर्यायपदानि** - शैलः। अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः।

**2.1.6** प्रकृतम् - अलकागमनमार्गं कथयति।

**मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं**
**सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ।।१३।।**

**पदच्छेदः** - तावच्छृणु - तावत् + श्रुणु।

कथयतस्त्वत्प्रयाणानुरूपं - कथयतः + त्वत्प्रयाणानुरूपं।

चोपभुज्य - च + उपभुज्य।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| मार्गं श्रृणु | - | अध्वानं श्रृणु |
| तदनु श्रोत्रपेयं | - | मार्गश्रवणानन्तरं पानार्हं (अतितृष्णया श्रोतव्यम्) |
| मे सन्देशं श्रोष्यसि | - | मम सन्देशवाचकं श्रोतुमर्हः भविष्यसि |
| यत्र खिन्नः खिन्नः शिखरिषु | - | यस्मिन् मार्गे क्षीणबलः सन् पर्वतेषु |

| | | |
|---|---|---|
| पदं न्यस्य क्षीणः क्षीणः | - | पदं निक्षिप्य अभीक्ष्णं कृशाङ्गः सन् |
| स्रोतसां परिलघु | - | सरित्प्रवाहाणां गुरुत्वदोषरहितं (पथ्यम्) |
| पयः च उपभुज्य | - | पानीयं च शरीरपोषणार्थं उपभुज्य |
| गन्तासि | - | गमिष्यसि |

**सारः** - हे मेघ, त्वम् इदानीं मत्तः प्रयाणानुकूलं मार्गं शृणु। तदनन्तरं प्रियायै श्रोतुं योग्यं मे सन्देशं श्रोष्यसि। यात्रामध्ये अध्वखेदयुक्तः त्वं पर्वतेषु विश्रामं कृत्वा जलवर्षणात् कृशाङ्गः सन् सरित्प्रवाहाणां च पथ्यं जलं पीत्वा यास्यसि, तं मार्गम् आकर्णय।

**क्रियाः** – शृणु, श्रोष्यसि, गन्तासि।

गन्तासि - गम्लृ गतौ - पर - लुट् - म.पु-ए.व।

गन्तासि - गन्तास्थः - गन्तास्थ।

श्रोत्रपेयम् - पातुं योग्यं पेयं, श्रोत्राभ्यां पेयं श्रोत्रपेयम्।

**पर्यायपदानि** – सन्देशवाग्वाचिकं स्यात् इत्यमरः।

खिन्नः खिन्नः क्षीणः क्षीणः इत्यादौ नित्यवीप्सयोः इति नित्यार्थे द्विर्भावः।

**2.1.7** प्रकृतम् - सुन्दर्यः सिद्धवनिताः त्वां वीक्षिष्यन्ते।

**अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभि-**
**र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।**
**स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं**
**दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ।।१४।।**

**पदच्छेदः** - किंस्विदित्युन्मुखिभिर्दृष्टोत्साहः - किंस्वित् + इति + उन्मुखिभिः + दृष्टोत्साहः।

दृष्टोत्साहश्चकितचकितं - दृष्टोत्साहः + चकितचकितं।

सरसनिचुलादुत्पतोदङ्मुखः - सरसनिचुलात् + उत्पत + उदङ्मुखः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| पवन अद्रेः शृङ्गं | - | वायुः चित्रकूटपर्वतस्य शिखरं |
| हरति किंस्वित् इति | - | अपहरति किमिति शङ्कया |
| उन्मुखीभिः मुग्धसिद्धाङ्गनाभिः | - | उन्नताननाभिः सुन्दरसिद्धवनिताभिः |
| दृष्टोत्साहः सरसनिचुलात् | - | दृष्टोद्वेगः सन् अद्रिस्थलवेतसशालिनः |
| अस्मात्स्थानात् पथि | - | अस्मादाश्रमात् नभोमार्गे |
| दिङ्नागानां स्थूलहस्तावलेपान् | - | दिग्गजानां स्थूलदण्डाक्षेपान् |
| परिहरन् उदङ्मुखः | - | दूरीकुर्वन् उत्तराभिमुखः सन् |
| खम् उत्पत | - | आकाशं गच्छ। |

**सारः** - आकाशमार्गेण यान्तं त्वां वीक्ष्य 'वायुः पर्वतशिखरमपहरति किम्' इति उत्कण्डया मुग्धाः स्निग्धवनिताः अवलोकयिष्यन्ति। मार्गे दिग्गजानां स्थूलशुण्डाक्षेपान् दूरतः परिहरन् आर्द्रस्थलवेतसशालिनोऽस्मात् स्थानात् उत्तराभिमुखः सन् आकाशं गच्छ।

('अद्रेः शृङ्गं पवनः हरति किम्' इति संशयः मुग्धसिद्धाङ्गनानां मनसि संजातः।)

**क्रिये** – हरति, उत्पत।

हरति – हृञ् हरणे – पर-लट्-प्र.पु-ए.व।

हरति-हरतः-हरन्ति।

**पर्यायपदानि** - अध्वा, अयनं, वर्त्मा, मार्गः, इत्यादयः।

निचुलः - निचुलः नाम महाकविः कलिदासस्य सहाध्यायी च। सः कालिदासप्रबन्धदूषकः। दिङ्नागाचार्यस्य कालिदासप्रतिपक्षस्य हस्तविन्यासदूषणानि परिहरतु इत्यर्थोऽप्यत्र वर्तते।

**2.1.8.** प्रकृतम् – भवतः शरीरं श्रीकृष्णस्य इव परमां कान्तिं प्राप्स्येत इति यक्षः मेघं वदति।

**रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-**

**द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।**

**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**

**बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ।।१५।।**

**पदच्छेदः** – रत्नच्छायाव्यतिकर इव – रत्नच्छायाव्यतिकरः + इव।

पुरस्ताद्वल्मीकाग्रात् – पुरस्तात् + वल्मीकाग्रात्।

वपुरतितरां – वपुः + अतितरां।

बर्हेणेव - बर्हेण +इव।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| रत्नच्छायाव्यतिकरः | - | पद्मरागादिमणीप्रभाणां मिश्रणं |
| प्रेक्ष्यं | - | दर्शनीयं |
| आखण्डलस्य एतत् | - | इन्द्रस्य पुरतो वर्तमानं |
| धनुःखण्डं पुरस्तात् | - | कार्मुकशकलम् अग्रे |
| वल्मीकाग्रात् प्रभवति | - | वामलूरविवरात् आविर्भवति। |
| येन ते श्यामं | - | धनुखण्डेन तव श्यामवर्णं |
| वपुः स्फुरितरुचिना | - | शरीरम् उज्वलकान्तिना |
| बर्हेण गोपवेषस्य | - | पिञ्छेन गोपालस्य |
| विष्णोः इव | - | कृष्णस्य श्यामं वपुरिव |
| अतितरां कान्तिम् आपत्स्यते | - | अधिकां शोभां प्राप्स्यते। |

**सारः** – पद्मरागादिमणिमिश्रणात् कौलासपुरे वामलूरविवरात् आविर्भूवदिन्द्रधनुः दर्शनीयमेव। येन तव श्यामे शरीरे तत् प्रभासंपर्कात् बर्हिणः पिञ्छेन उज्वलकान्तिना शोभमानस्य गोपवेषस्य श्रीकृष्णस्येव परमा शोभा जायते।

**क्रिये** - प्रभवति, आपत्स्यते ।

प्रभवति – प्र+भू सत्तायां पर-लट्-प्र.पु- ए.व।

प्रभवति - प्रभवतः - प्रभवन्ति ।

प्रेक्षितुं योग्यम् - प्रेक्ष्यम्।

**अलङ्कारः** – उपमा, उत्प्रेक्षा।

सम्भावना स्यादुत्प्रेक्षा। उत्कटैककोटिकः संशयः स्म्भावना।

**पर्यायपदानि** – वपुः- कलेवरं, गात्रम्, वपुः, संहननं, शरीरम्।

**2.1.9** प्रकृतम् - अकृत्रिमप्रेमार्द्रैः वल्लीयोषितः त्वां वीक्ष्यन्ते।

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।**
**सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं**
**किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ।।१६।।**

**पदच्छेदः** - त्वय्यायत्तं – त्वयि + आयत्तं।

प्रीतिस्निग्धैर्जनपदवधूलोचनैः - प्रीतिस्निग्धैः + जनपदवधूलोचनैः।

लघुगतिर्भूय एव - लघुगतिः + भूयः + एव।

एवोत्तरेण - एव + उत्तरेण।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कृषिफलं त्वयि आयत्तं | - | कृषे फलं सस्यं भवति तव अधीनं। |
| इति प्रीतिस्निग्धैः | - | इति हेतोः प्रीत्या स्नेहयुक्तैः |
| भ्रूविलासानभिज्ञैः | - | भ्रूविकाराणामनभिज्ञैः |
| जनपदवधूनां लोचनैः पीयमानः | - | वल्लीयोषितां नेत्रैः सादरं वीक्षमाणः सन् |
| मालं क्षेत्रं | - | मालस्थं शैलप्रायमुन्नतस्थलम् |
| सद्यः सीरोत्कषणसुरभि | - | तत्कालमेव हलकर्षणेन सौरभ्यमयं |
| आरुह्य किञ्चित्पश्चात् | - | अभिवृष्य अल्पसमयानन्तरं |
| लघुगतिः | - | निर्वृष्टत्वात् क्षिप्रगमनः सन् |
| भूयः उत्तरेण व्रज | - | पुनरपि उत्तरेण मार्गेण गच्छ |

**सारः** - हे मेघ, तवाधीने भवति कृषिफलमिति मत्वा अकृत्रिमप्रेमार्द्रैः जनपदवधूलोचनैः वीक्षमाणः त्वं तात्कालिकप्रेममयमुन्नतभूतलमभिवर्ष्य पुनः त्वरितगतिः सन् भूय उत्तरेण मार्गेण गच्छ।

**क्रिया** – व्रज – व्रज गतौ - पर-लोट्-म.पु-ए.व।

व्रज व्रजतात् - व्रजतं- व्रजत।

कृषेः फलं - कृषिफलम्।

**पर्यायपदानि** - कृषिः - पाशुपाल्यं, वाणिज्यं।

## पुनरावृत्तिः (Recap)

- आकाशमारूढं मेघं दृष्ट्वा प्रोषितभर्तृकाः स्त्रियः भवन्तं प्रेक्षयिष्यन्ति।
- दिवसगणनातत्परामेकपत्नीं त्वं द्रक्ष्यसि।
- मानससरोवरयायिनो राजहंसाः मेघस्य सहयात्रिकाः भविष्यन्ति।
- श्रोत्रपेयं सन्देशं हे जलद, त्वं श्रोष्यसि।
- बर्हणेव स्फुरितरुचिना गोपवेषस्य विष्णोः।
- कृषिफलमिति भ्रूविलासानभिज्ञैः जनपदवधूलोचनैः त्वं पीयमानः भवेत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः' - कं प्रेक्षिष्यन्ते ?
2. प्रायशः स्त्रीणां हृदयं कीदृशं भवति ?
3. 'तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः'-मानसोत्काः के ?
4. 'मार्गं तावच्छृणु' - कः मार्गः ?
5. आखण्डलः कः ?
6. "सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि" अत्र "प्रणयि हृदयं" कया सम्बद्धा ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. मेघस्य यात्रायै शुभसूचकः सन्दर्भः कः ?
2. मेघसञ्चरणसमये मुग्धसिद्धाङ्गनानां मनसि कः संशयः संजातः ?

## एकैकया खण्डिकया उत्तरं लिखत
**(Answer the following questions in a paragraph)**

1. त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः इति श्लोकस्य सन्दर्भं आशयं च लिखत।
2. चित्रकूटाचलः।

## निर्दिष्टाभ्यासः (Assignments)

1. रघूवंशस्य प्रथमसर्गे अष्टश्लोकादारभ्य षट्विंशतिः श्लोकपर्यन्तं कथासारं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. प्रत्ययादाश्वसत्यः पथिकवनिताः मेघं प्रेक्षिष्यन्ते।
2. प्रायशः स्त्रीणां हृदयं कुसुमसदृशं भवति।
3. राजहंसाः श्रवणसुभगं ते गर्जितं श्रुत्वा मानसोत्काः बभूवुः।
4. अलकापर्यन्तं वर्तमानं मार्गं तावच्छृणु।
5. इन्द्रः।
6. यक्षिण्या।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्रीकेदारनाथ् शर्मा,चौखम्बा सान्स्क्रीट् सन्तान्, वाराणासी, २०१६ पुटानि ८-६०
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वारणासी।
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 2
# आम्रकूटः - विन्ध्याचलः।

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य काव्यप्रतिभां जानाति।
- सन्देशकाव्यप्रस्थाने मेघदूतस्य प्राधान्यम् अवगच्छति।
- विरहतप्तस्य यक्षस्य अवस्थाम् अवगच्छति।
- मेघस्य यात्रावर्णनद्वारा प्रकृतिशोभाम् आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

प्रकृत्युपासकः कालिदासः मेघदूते कैलासपर्यन्तं सञ्चरणाय मेघं यक्षभावेन प्रार्थयते। सञ्चारणवेलायां मेघः आम्रकूटाचलं प्राप्स्यति। तदा तस्य पर्वतस्य अनन्यसाधारणीं कान्तिं कविरत्र वर्णयति। अनन्तरं विन्ध्यगिरितटे वर्तमानां नर्मदां वर्णयति।

## मुख्यपदानि (Keywords)

सानुमानाम्रकूटः साधुमूर्ध्ना वक्ष्यति - अमरमिथुनप्रेक्षणीयामवस्थां यास्यति - सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु

## Discussion

**2.2.1** प्रकृतम् – आम्रकूटाचलः मेघं नमस्करिष्यति।

**त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना**

**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।**

**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय**

**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ।।१७।।**

**पदच्छेदः** - वक्ष्यत्यध्वश्रमपरिगतं - वक्ष्यति + अध्वश्रमपरिगतं। सानुमानाम्रकूटः – सानुमान् + आम्रकूटः। क्षुद्रोऽपि – क्षुद्रः + अपि। पुनर्यस्तथोच्चैः – पुनः + यः + तथा + उच्चैः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| आम्रकूटः सानुमान् | - | आम्रकूट नाम पर्वतः |
| आसारप्रशमितवनोपप्लवं | - | धारावृष्टिप्रशमितवनवह्निं (कृतोपकारम्) |
| अध्वश्रमपरिगतं त्वां साधु | - | मार्गश्रमयुक्तं भवन्तं सम्यक् |
| मूर्ध्ना वक्ष्यति | - | शिरसा धारयिष्यति |
| क्षुद्रोऽपि संश्रयाय मित्रे | - | कृपणोऽपि आश्रयाय सुहृदि |
| प्राप्ते प्रथमसुकृतापेक्षया | - | आगते सति पूर्वोपकारचिन्तया |
| विमुखः न भवति | - | पराङ्मुखो न भवति |
| किं पुनः तथा उच्चैः सः | - | किमु पुनः तथाविधः उन्नतः सः पर्वतः |

**सारः -** अयम् आम्रकूटपर्वतः धारावृष्टिप्रशमितवह्निं मार्गश्रमयुक्तं भवन्तं शिरसा धारयिष्यति। आश्रयार्थिनं सम्प्राप्तं मित्रं पूर्वोपकारपर्यालोचनया क्षुद्रोऽपि जनः न पराङ्मुखः भविष्यति। किं पुनः तथाविधः उन्नतः सः गिरिः।

**अलङ्कारः** – अर्थापत्तिः। कैमुत्येनार्थसंसिद्धिः काव्ये अर्थापत्तिरिष्यते।

क्रिये – वक्ष्यति, भवति।

भवति – भू सत्तायां-पर-लट्-प्र.पु-ए.व।

भवति – भवतः- भवन्ति।

आम्राः कूटेषु यस्य सः आम्रकूटः।

**पर्यायपदानि** – मित्रम्, सखा, सुहृत्। मित्रः सूर्यः।

**2.2.2.** प्रकृतम् – भुवः स्तन इव वर्तमानं त्वां अमरमिथुनाः प्रेक्षिष्यन्ति।

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-**

**स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**

**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**

**मध्ये श्याम स्तन इव भुव शेषविस्तारपाण्डुः ।।१८।।**

पदच्छेदः – काननाम्रैस्त्वय्यारूढैः - काननाम्रैः + त्वयि + आरूढैः। यास्यत्यमरमिथुनप्रेक्षणीयां – यास्यति + अमरमिथुनप्रेक्षणीयां। स्तन इव - स्तनः + इव।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| परिणतफलद्योतिभिः | - | परिपक्वफलद्योतिभिः |
| काननाम्रैः छन्नोपान्तः | - | वनचूतैः आवृतपार्श्वः |
| अचलः स्निग्धवेणीसवर्णे | - | आम्रकूटाद्रिः मसृणकेशबन्धछाये (श्यामवर्णः) |
| त्वयि शिखरम् आरूढे सति | - | भवति श्रृङ्गं स्थिते सति |
| मध्ये श्यामः शेषविस्तारपाण्डुः | - | मध्ये श्यामवर्णः, मध्यादन्यत्र परितः हरितवर्णः |
| भुवः स्तन इव | - | पृथिव्याः पयोधरः इव (स्तनस्थानीयाः पर्वतः, श्यामिकास्थानीयः मेघः) |
| अमरमिथुनप्रेक्षणीयामवस्थाम् | - | खेचराणां दर्शनीयां दशां |
| नूनं यास्यति | - | निश्चयेन प्राप्स्यति |

**सारः** – हे मेघ, परिपक्वपाण्डुराम्रविपिनैः आवृतपार्श्वे अयं आम्रकूटाचलः मध्ये श्यामवर्णेन त्वया सह शोभमानः पृथिव्याः स्तन इव देवमिथुनैः उत्प्रेक्ष्यमाणो भविष्यति।

प्रकृत्युपासकः कालिदासः मेघदूते कैलासपर्यन्तं सञ्चरणाय मेघं यक्षभावेन प्रार्थयते। सञ्चारणवेलायां मेघः आम्रकूटाचलं प्राप्स्यति। तदा तस्य पर्वतस्य अनन्यसाधारणीं कान्तिं कविरत्र वर्णयति।

हे मेघ, परिपक्कपाण्डुः आम्रविपिनैः आवृतपार्श्वः भवति अयं आम्रकूटाचलः। त्वं यदा तत्पर्वतमायाति तदा श्यामवर्णेन त्वया शोभमानः अयं आम्रकूटाचलः पृथिव्याः स्तन इव देवमिथुनाः पश्यन्ति।

**क्रिया** – यास्यति -या प्रापणे, पर-लृट्-प्र.पु-ए.व।

यास्यति- यास्यतः – यास्यन्ति।

**अलङ्कारः** - उत्प्रेक्षा।

परिश्रान्तः कश्चित्कामी कामिन्याः कुचकलशे विश्रान्तः सन् स्वपिति, तदा भवान्

भुवः नायिकायाः स्तन इति ध्वनिः।

परिणतैः फलैः द्योतन्ते इति – परिणतफलद्योतिनः, तैः परिणतफलद्योतिभिः।

**व्याकरणकार्यम्** – त्वयि शिखरमारूढे सति। यदा त्वं शिखरम् आरूढवान् तदा इत्यर्थः।

यस्य च भावेन भावलक्षणम् इति सूत्रेण सतिसप्तमिप्रयोगः।

**पर्यायपदानि** – भूः - भूमिः, अचला, भूः, अनन्ता, रसा।

**2.2.3** प्रकृतम् – सत्कारेण सन्तुष्टः त्वम् आम्रकूटाचलस्य दावाग्निं वृष्टिना प्रशान्त्य प्रत्युपकारं कुरु।

**अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-**
**स्तुङ्गेन त्वां जलद, शिरसा वक्ष्यति श्लाघ्यमानः।**
**आसारेण त्वमपि शमयेस्तस्य नैदाखमग्निं**
**सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ।।१९।।**

**पदच्छेदः** – सानुमानाम्रकूटस्तुङ्गेन – सानुमान् + आम्रकूटः + तुङ्गेन।
शमयेस्तस्य – शमयेः + तस्य। चिरेणोपकारो महत्सु – चिरेण + उपकारः + महत्सु।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| जलद, श्लाघ्यमानः आम्रकूटः | - | हे मेघ, प्रशस्यमानः आम्रकूटाख्यः |
| सानुमान् प्रतिमुखगतम् अध्वक्लान्तं | - | पर्वतः सम्मुखस्तं मार्गखिन्नं |
| त्वां तुङ्गेन शिरसा | - | भवन्तम् अत्युच्चेन मूर्ध्ना (शिखरेण) |

| | | |
|---|---|---|
| वक्ष्यति, त्वमपि | - | धारयिष्यति, भवानपि |
| तस्य नैदाखमग्निं | - | आम्रकूटाचलस्य ग्रीष्मर्तुभवमग्निं |
| आसारेण शमयेः | - | धारासम्पादेन शान्तं कुर्याः |
| महत्सु सद्भावार्द्रः | - | श्रेष्ठेषु जनेषु समीचीनभावसहकृतः |
| उपकारः न चिरेण | - | उपकृतिः न कालविलम्बेन |
| फलति | - | फलितो भवति। |

**सारः** – हे जलद, आम्रकूटपर्वतः अध्वक्लान्तं त्वां दृष्ट्वा शिखरेण सत्कारयिष्यति। भवानपि तदीयं दावाग्निं शमयेत्। हि महान्तो जनाः सोपकारिणां सद्य एव प्रत्युपकारं कुर्वन्ति।

**क्रियाः** – वक्ष्यति, शमये, फलति।
वक्ष्यति – वह् प्रापणे,वृद्धौ – पर-लृट्-प्र.पु- ए.व।
वक्ष्यति – वक्ष्यतः – वक्ष्यन्ति।
**विग्रहः** – सन् चासौ भावः च सद्भावः, तेनार्द्रः सद्भावार्द्रः।
**समानार्थकपदानि** –विद्वान्, विपश्चित्, दोषज्ञः।

2.2.4 प्रकृतम् - विन्ध्यागिरितटे वर्तमानां नर्मदां वर्णयति कविः।

**स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं**
**तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।**
**रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां**
**भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ।।२०।।**

**पदच्छेदः** - तोयोत्सर्गद्रुततरगतिस्तत्परं - तोयोत्सर्गद्रुततरगतिः + तत्परं।

द्रक्ष्यस्युपलविषमे – द्रक्ष्यसि + उपलविषमे। भक्तिच्छेदैरिव – भक्तिच्छेदैः + इव।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| वनचरवधूभुक्तकुञ्जे | - | वनचरस्त्रीभिरुपभुक्ते लतागृहे। |
| तस्मिन् मुहूर्तं स्थित्वा | - | आम्रकूटे अल्पकालं विश्रम्य। |
| तोयोत्सर्गद्रुततरगतिः | - | जलवृष्ट्या द्रुततरगतिः सन् |

| | | |
|---|---|---|
| तत्परं वर्त्म तीर्णः | - | अनन्तरं मार्गम् अतिक्रान्तः |
| उपलविषमे विन्ध्यपादे | - | पाषाणैः विषमे विन्ध्यस्याद्रेः तटे |
| विशीर्णां रेवां गजस्याङ्गे | - | समन्ततो प्रसृतां नर्मदां करिणः शरीरे। |
| भक्तिच्छेदैः भूतिमिव | - | रचनाभङ्गिभिः शृङ्गारमिव |
| द्रक्ष्यसि | - | अवलोकयसि |

**सारः** – हे मेघ, आम्रकूटाचले वनेचरस्त्रीभिरुपभुक्ते तटे अल्पसमयं श्रममपनीय जलवृष्ट्या द्रुततरगतिः सन् ततः परं अध्वानमतिक्रम्य विन्ध्यगिरितटे प्रसृतां नर्मदां अवलोकयसि। सा नर्मदा तु गजस्य शरीरे रचनाविशेषैः विरचिता भूतिरिव प्रशोभते।

**नर्मदा** - महाकविः कालिदासः मेघदूते विन्ध्यगिरितटे वर्तमानां नर्मदां वर्णयति। कान्ताविप्रयुक्तः कामी यक्षः मेघं दृष्ट्वा स्वप्रियायै सन्देशं प्रेषितुमैच्छत्। चित्रकूटाचलद्वारा गच्छन् भवान् आम्राचलस्य वनेचरस्त्रीभिरुपभुक्ते तटे अल्पसमयं श्रममपनीय वृष्ट्या द्रुततरगतिः सन् विन्ध्यागिरितटे प्रसृताम् नर्मदाम् अवलोकयिष्यति। सा नर्मदा गजस्य शरीरे रचनाविशेषैः विरचितं भूतिमिव प्रशोभते। नर्मदायां कृतवृष्टिः त्वं करिमदवासितं लतानिकुञ्जैः प्रतिहतवेगं जलं पीत्वा याहि।

**क्रिया** – द्रक्ष्यसि। दृशिर् प्रेक्षणे – पर-लृट्- म.पु-ए.व।

द्रक्ष्यसि - द्रक्ष्यथः - द्रक्ष्यथ।

वने चरन्तीति वनेचराः, तेषां वधूभिः भुक्ताः कुञ्जा वनेचरवधूभुक्तकुञ्जः, तस्मिन् वनेचरवधूभुक्तकुञ्जे।

**पर्यायपदानि** – तोयम्। आपः, वारि, सलिलं, कमलं, जलम्।

**अलङ्कारः** – उपमा।

'उपमा यत्रसादृश्यलक्ष्मीरुल्लसति द्वयोः' इति लक्षणम्।

## पुनरावृत्तिः (Recap)

- आम्रकूटाचलः मेघं नमस्करिष्यति
- भुवः स्तन इव वर्तमानं त्वाम् अमरमिथुनाः प्रेक्षिष्यन्ते।
- पुनः विन्ध्यगिरितटे वर्तमानां नर्मदां पश्यसि।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. “प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः” अत्र यत् शब्देन कस्य ग्रहणम् ?
2. ‘नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थाम्’ - कीदृशीमवस्थाम् ?
3. ‘भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य’ - अत्र गजस्य तुलना केन सह वर्तते ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
(Answer the following questions in one or two sentences)

1. नर्मदा कथं शोभते ?

## एकैकया खण्डिकया उत्तरं लिखत
(Answer the following questions in a paragraph)

1. “मध्ये श्याम स्तन इव भुवः शेषविस्तारपाण्डुः” - आशयं विशदयत।
2. नर्मदा (रेवा)

## निर्दिष्टाभ्यासः (Assignments)

1. नर्मदापर्यन्तं मेघस्य यात्रा कीदृशी भवेदिति यक्षस्य वचनं लिखत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. आम्रकूटम्।
2. मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुरूपामवस्थाम्।
3. आम्रकूटेन।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्रीकेदारनाथ् शर्मा,चौखम्बा सान्स्क्रीट् सन्तान्, वारणासी, २०१६ पुटानि ८-६०
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वारणासी।
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018


SGOU

# Unit - 3
# नर्मदा - विदिशा

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य काव्यप्रतिभां जानाति।
- सन्देशकाव्यप्रस्थाने मेघदूतस्य प्राधान्यम् अवगच्छति।
- विरहतप्तस्य यक्षस्य अवस्थाम् अवगच्छति।
- मेघस्य यात्रावर्णनद्वारा प्रकृतिशोभाम् आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

मार्गमध्ये नर्मदानद्याः विवरणं, दशार्णदेशस्यावस्थां, दशार्णदेशेषु विख्याता भवति विदिशा नाम राजधानी, नीचैराख्यं गिर्याः विवरणं इत्यादीन् मेघं प्रति यक्षः वदति। तानि कार्याणि पठामः।

## मुख्यपदानि (Keywords)

पूर्णता गौरवाय - सारङ्गा सूचयिष्यन्ति मार्गान् - स्तनितसमये मानयिष्यन्ति सिद्धाः - मत्प्रियार्थं प्रियायाः कालक्षेपं उत्पश्यामि - त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः- तीरोपान्तस्तनितसुभगं पास्यसि स्वादु पयः - उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि - वननदीतीरजातानि सिञ्चन् व्रज।

## Discussion

**2.3.1** प्रकृतम् – नर्मदायाः जलं पीत्वा गन्तुं कविः मेघं निर्दिशति।

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**

**र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।**
**अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।।२१।।**

**पदच्छेदः** - तस्यास्तिक्तैर्वनगजमदैर्वासितं – तस्याः + तिक्तैः + वनगजमदैः + वासितं। वान्तदृष्टिर्जम्बूकुञ्जप्रतिहतरयं - वान्तदृष्टिः + जम्बूकुञ्जप्रतिहतरयम्।

नानिलः- न + अनिलः। सर्वो भवति - सर्वः + भवति।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| घन वान्तवृष्टिः तिक्तैः | - | हे मेघ, उद्गीर्णवर्षः सन् सुगन्धिभिः तिक्तरसवद्भिः |
| वनगजमदैः वासितं | - | करिमदवासितैः सुरभिलं |
| जम्बूकुञ्जप्रतिहतरयं | - | लतानिकुञ्जैः रसवलितवेगं (सुखपेयं) |
| तोयमादाय गच्छेः | - | नर्मदायाः जलं गृहीत्वा यायाः। |
| अन्तःसारं त्वाम् अनिलः | - | वारिपूर्णतया प्राप्तगुरुत्वं भवन्तम् आकाशवायुः |
| तुलयितुं न शक्ष्यति | - | तुलयितुं शक्तो न भविष्यति |
| हि रिक्तः सर्वः | - | यस्मात् अन्तःसारशून्यः सर्वोऽपि |
| लघुः भवति | - | प्रकम्प्यो भवति |
| पूर्णता गौरवाय | - | सारवत्ता गौरवमावहति। |

**सारः** – हे मेघ, नर्मदायां कृतवृष्टिः त्वं करिमदवासितं लतानिकुञ्जैः प्रतिहतवेगं जलं नीत्वा याहि। वारिपूर्णतया प्राप्तगुरुत्वं त्वां वायुः तुलयितुं शक्तः न भवेत्। यतः सर्वोऽपि रिक्तः लघुत्वमेव याति। पूर्णस्तु गौरवमावहति।

**क्रिये** - गच्छेः, शक्ष्यति।

शक्ष्यति-श्क्लृ-शक्तौ-पर-लृट्-प्र.पु-ए.व।

शक्ष्यति - शक्ष्यतः - शक्ष्यन्ति।

अन्तः सारो बलो यस्य सः अन्तःसारः।

**अलङ्कारः** – अर्थान्तरन्यासः। 'उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः' इति लक्षणम्।

**पर्यायपदानि** – गजः। दन्ती,दन्तावलः, हस्ती, द्विरदः।

2.3.2 प्रकृतम् – हे मेघ, भृङ्गाः, मृगाः मातङ्गाः वा ते मार्गं सूचयिष्यन्ति।

**नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-**
**राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।**
**जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धामाघ्राय चोर्व्याः**
**सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥ २२॥**

**पदच्छेदः** – केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः – केसरैः + अर्धरूढैः + आविर्भूतप्रथममुकुलाः।

कन्दलीश्चानुकच्छम् – कन्दलीः + च + अनुकच्छम्।

अरण्येष्वधिकसुरभिं – अरण्येषु + अधिकसुरभिं। चोर्व्याः – च + उर्व्याः।

सारङ्गास्ते - सारङ्गाः + ते।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सारङ्गाः अर्धरूढैः | - | भृङ्गाः, मृगाः मातङ्गाः वा एकदेशोद्गतैः |
| केसरैः हरितकपिशं नीपं | - | किञ्जल्कैः श्यामवर्णं स्थलकदम्बकुसुमं |
| दृष्ट्वा अनुकच्छम् | - | संप्रेक्ष्य (विदित्वा) कच्छसमीपे |
| आविर्भूतप्रथममुकुलाः | - | संजाताद्यमुकुलाः |
| कन्दलीः जग्ध्वा अरण्येषु | - | भूमिकन्दलीः भक्षयित्वा वनेषु |
| अधिकसुरभिं उर्व्याः गन्धं | - | अधिकसुगन्धयुक्तं वसुधायाः सुगन्धम् |
| आघ्राय च जललवमुचः ते | - | घ्रात्वा च मेघस्य तव |
| मार्गम् सूचयिष्यन्ति | - | पन्थानं मानयिष्यन्ति। |

**सारः** - हे मेघ, पुनः स्थलकदम्बपुष्पोद्गमं वीक्ष्य भूकन्दलीः भक्षणं विधाय काननेषु अतिसुरभिं भूमिगन्धं चाघ्राय भृङ्गाः मृगाः मातङ्गाः वा वृष्टिं कुर्वतः तव मार्गं सूचयिष्यन्ति।

**क्रिया** - सूचयिष्यन्ति – सूच् णिचि, पर-लृट्-प्र.पु- ब.व।

सूचयिष्यति - सूचयिष्यतः - सूचयिष्यन्ति।

**व्याकरणकार्यम्** – अनुकच्छम् इत्यस्य कच्छसमीपे इत्यर्थः।

अव्ययंविभक्तिसमीपसमृद्धि...... इत्यादिना अव्ययीभावसमासः।

**समानार्थकः** – नीपः- नीपः, प्रियकः, कदम्बः, हलिप्रियः।

आविर्भूताः प्रथमाः मुकुलाः यास्तां ताः आविर्भूतप्रथममुकुलाः।

2.3.3 प्रकृतम् - भवतः गर्जनसमये प्रियालिङ्गनसुखमनुभवन्तः सिद्धाः सादरं त्वां द्रक्ष्यन्ति।

**अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः**
**श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।**
**त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः**
**सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि॥ २३।।**

**पदच्छेदः** - अम्भोबिन्दुग्रहणचतुरांश्चातकान् - अम्भोबिन्दुग्रहणचतुरान् + चातकान्।

निर्दिशन्तो बलाकाः - निर्दिशन्तः + बलाकाः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अम्भोबिन्दुग्रहणचतुरान् | - | वर्षोदबिन्दूनां ग्रहणे समर्थान् |
| चातकान् वीक्षमाणाः श्रेणीभूताः | - | चातकपक्षिणः विलोकयन्तः बद्धपङ्क्तीः |
| बलाकाः परिगणनया निर्दिशन्तः | - | बकपङ्क्तीः संख्यानेन दर्शयन्तः |
| सिद्धाः स्तनितसमये सोत्कम्पानि | - | सिद्धाः गर्जितकाले उत्कम्पपूर्वकाणि |
| प्रियसहचरीसंभ्रमालिङ्गितानि | - | प्रियाकृतस्वयंग्रहणाश्लेषसुखानि |
| आस्वाद्य त्वां मानयिष्यन्ति | - | अनुभूय भवन्तं सादरं मानयिष्यन्ति |

**सारः** – हे मेघ, चातकान् पश्यन्तो बलाकानां गणनां कुर्वन्तः सिद्धगणः तव गर्जितमाकर्ण्य भयवशात् प्रियाकृतस्वयंग्रहणाश्लेषसुखानि अनुभवन्तः भवन्तं सादरं द्रक्ष्यन्ति ।

(कान्ताविरही यक्षः मेघं प्रति स्वप्रेयस्याः सकाशं सन्देशमेकं प्रापयितुम् अलकापर्यन्तं मार्गं निर्दिशति। नर्मदामतिक्रम्य गच्छन्तं भवन्तं चातकादयः अनुगच्छन्ति। बलाकाः श्रेणीभूताः

आकाशमार्गेण सञ्चरन्ति। सिद्धाः अङ्गनाभिः मनोहरं प्रेक्षणीयं दृश्यं आस्वाद्यमानाः वर्तन्ते। तत्समये स्वस्वप्रियान् आलिङ्गन्ति। प्रियाकृतस्वयंग्रहणश्लेषसुखानि अनुभूय सिद्धाः सादरम् मेघं मानयिष्यन्ति।)

**क्रिया** – मानयिष्यन्ति। मान् पूजायां , पर-लृट्-प्र.पु-ब.व।

मानयिष्यति - मानयिष्यतः - मानयिष्यन्ति।

**पर्यायपदानि** – सिद्धः- विद्याधरः, अप्सराः, यक्षः, रक्षः, गन्धर्वः।

प्रियसहचरीणां संभ्रमालिङ्गितानि - प्रियसहचरीसंभ्रमालिङ्गितानि।

2.3.4 प्रकृतम् - केकालापिनः बर्हिणः तुभ्यं स्वागतं आशंसन्ति।

**उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः**
**कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।**
**शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः**
**प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत्॥ २४।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सखे मत्प्रियार्थं द्रुतं | - | हे मित्र मेघ, मम प्रियार्थं क्षिप्रं |
| यियासोः ते ककुभैः | - | यातुमिच्छोः तव कुटजकुसुमैः |
| सुरभौ पर्वते पर्वते | - | सुगन्धिनि पर्वते |
| कालक्षेपं उत्पश्यामि | - | कालविलम्बम् अहं मनसा पश्यामि |
| सजलनयनैः शुक्लापाङ्गैः केकाः | - | सानन्दबाष्पनयनैः मयूरैः केकाशब्दाः |
| स्वागतीकृत्य प्रत्युद्यातः | - | स्वागतवचनीकृत्य प्रत्युद्गतः |
| | | (मयूरवर्णा कृतातिथ्यः) |
| भवान् कथमपि गन्तुं | - | भवान् यथाकथञ्चित् यातुं |
| व्यवस्येत् | - | उद्युञ्जीत (उद्योगं कुर्यात्) |

**सारः** – हे मेघ, मम सन्देशवाहकरूपं प्रियकार्यं कर्तुं गन्तुमिच्छोः तव मध्येमार्गं कुटजकुसुमैः सुगन्धिनि पर्वते कालविलम्बं उत्प्रेक्ष्यामि । अपि च प्रतिशैलं मयूराः सानन्दबाष्पनयनैः भवन्तं केकालापेन स्वागतवचनमर्पयन्ति। तथापि भवान् कथञ्चित् ततः गन्तुमुत्सुकः भवेत्।

**क्रिये** – उत्पश्यामि, व्यवस्येत्।

उत्पश्यामि – उत् – दृशिर् - प्रेक्षणे। पर-लट्-उ.पु.-ए.व।

उत्पश्यामि - उत्पश्यावः – उत्पश्यामः।

**अलङ्कारः** – परिणामः। 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति अलङ्कारसर्वस्वे।

यातुम् इच्छुः यियासुः, तस्य यियासोः।

**पर्यायपदानि** – द्रुतं- शीघ्रम्, त्वरितं, लघु, क्षिप्रम्, द्रुतम्।

**2.3.5.** प्रकृतम् - भवतामागमनेन दशार्णदेशस्यावस्थां सूचयति।

**पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-**
**र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।**
**त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः**
**संपत्स्यन्ते कतिपयदिनस्थायिहंसाः दशार्णाः ।।२५।।**

**पदच्छेदः** – सूचिभिन्नैर्नीडारम्भैर्गृहबलिभुजाम् - सूचिभिन्नैः + नीडारम्भैः + गृहबलिभुजां।

त्वय्यासन्ने – त्वयि + आसन्ने ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| त्वय्यासन्ने दशार्णाः | - | यदा भवान् निकटस्थितःतदा दशार्णाः |
| सूचिभिन्नैः केतकैः | - | मुकुलाग्रेषु विकसितैः केतकीकुसुमैः |
| पाण्डुच्छायोपवनवृतयः | - | पीतवर्णरूपोद्यानावेष्टिताः |
| गृहबलिभुजां नीडारम्भैः | - | काकादिपक्षिणां कुलायनिर्माणैः |
| आकुलग्रामचैत्याः | - | सङ्कीर्णग्रामरथ्यावृक्षाः |
| परिणतफलश्यामजम्बूवनान्ताः | - | परिपक्वजम्बूफलैः श्यामाः काननमध्यभागाः |

कतिपयदिनस्थायिहंसाः - कतिपयेषु दिनेषु स्थातुं तत्पराः हंसाः

संपत्स्यन्ते - भविष्यन्ति।

**सारः** – हे मेघ, भवतः आगमनेन दशार्णादेशस्य आरामाः विकसितकेतकीकुसुमैः प्रशोभमानाः रथ्यावृक्षाः काकादिग्रामपक्षिणां कुलायनिर्माणैः सङ्कीर्णाः काननमध्यभागाः परिपक्वजम्बूफलैः श्यामाः हंसाः मानससरोवरगमनौत्सुक्येन कतिपयदिनसंस्थायिनः च भविष्यन्ति।

**क्रिया** – सम्पत्स्यन्ते। सम् + पत् लृ गतौ, आत्म.लृट्- प्र.पु-ब.व।

**अलङ्कारः** – स्वभावोक्तिः। स्वभावोक्तिः स्वभावस्य जात्यादिस्तस्य वर्णनम्।

सम्पत्स्यते – सम्पत्स्येते – सम्पत्स्यन्ते।

समानपदानि - केतकी - सूचिपुष्पः, हलीनः, जम्बुलः, केतकः।

सूचिषु (मुकुलाग्रेषु) भिन्नैः (विकसितैः)सूचिभिन्नैः ।

**2.3.6** प्रकृतम् - दशार्णदेशेषु विख्याता भवति विदिशा नाम राजधानी, तां वर्णयति।

**तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं**
**गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।**
**तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मा-**
**त्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ।।२६।।**

**पदच्छेदः** - यस्मात्सभ्रूभङगम् – यस्मात् + सभ्रूभङगम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| दिक्षु प्रथितविदिशालक्षणां | - | दिग्विभागेषु प्रसिद्धं विदिशा इति नामयुक्तां |
| तेषां राजधानीं | - | दशार्णानां सम्बन्धिनीं प्रधाननगरीं |
| गत्वा सद्यः कामुकत्वस्य | - | प्राप्य क्षिप्रं विलसितायाः |
| अविकलं फलं लब्धा | - | समग्रं प्रयोजनं लप्स्यते |
| यस्माद् स्वादु चलोर्मि | - | यस्मात् कारणात् मधुरं तरङ्गितं |
| वेत्रवत्याः पयः सभ्रूभङ्गं | - | वेत्रवती नाम नद्याः जलं चलनयुक्तं (दशनपीडया) |

| | | |
|---|---|---|
| मुखमिव | - | अधरमिव |
| तीरोपान्तस्तनितसुभगं | - | सरिस्तीरप्रान्ते गर्जितेन सुभगं |
| पास्यति | - | पानं करिष्यति। |

**सारः** – हे मेघ, दशार्णदेशस्य विख्यातां राजधान्यां विदिशां गत्वा तत्रत्याः वेत्रवतीनद्याः तीरप्रान्ते स्तनितसुभगं कलकलशब्दं दधत् सुस्वादुजलं भ्रूभङ्गयुतनायिकामुखमिव पीत्वा कामुकतायाः संपूर्णफलं प्राप्स्यसि।

**क्रिये** – लब्धा, पास्यसि।

लब्धा- डुलभष् लाभे- आत्म-लुट्-कर्मणि-प्र.पु-ए.व।

लब्धा – लब्धारौ – लब्धारः।

प्रथितं विदिशेति लक्षणं यस्याः सा प्रथितविदिशालक्षणा , तां प्रथितविशालक्षणाम्।

**पर्यायपदानि** – दिक्- ककुभः,काष्ठा, आशा,हरित्।

**2.3.7** प्रकृतम् - नीचगिरौ विश्रामयितुं यक्षः मेघम् उपदिशति।

**नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो –**
**स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैःकदम्बैः।**
**यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-**
**मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ।।२७।।**

**पदच्छेदः** - नीचैराख्यं – नीचैः + आख्यं। अधिवसेस्तत्र - अधिवसेः + तत्र।

विश्रामहेतोस्त्वत्संपर्कात् - विश्रामहेतोः + त्वत्संपर्कात्।

पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणाम् - पण्यस्त्रीरतिपरिमलोद्गारिभिः + नागराणाम्।

शिलावेश्मभिर्यौवनानि - शिलावेश्मभिः + यौवनानि।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| तत्र विश्रामहेतोः प्रौढपुष्पैः कदम्बैः | - | विदिशासमीपे विश्रामार्थं प्रबुद्धकुसुमैः नीपवृक्षैः |
| त्वत्संपर्कात् पुलकितमिव | - | तव सङ्गात् सञ्जातपुलकमिव |

| | | |
|---|---|---|
| नीचैराख्यं गिरिमधिवसेः | - | नीचैराख्यं गिरौ वसेः |
| यः पण्यस्त्रीरतिपरिमलोद्गारिभिः | - | नीचैराख्यः वेश्यास्त्रीरतिपरिमलाविष्कारतया |
| शिलावेश्मभिः नागराणां उद्दामानि | - | कन्दरैः पौराणाम् उत्कटानि |
| यौवनानि प्रथयति | - | तारुण्यानि प्रख्यापयति। |

**सारः** – हे मेघ, विश्रामहेतोः तत्र नीचैराख्यं गिरिमधिवसेः। यः नीचैराख्यगिरिः त्वत्संपर्कात् विकसितकदम्बपुष्पैः सञ्जातपुलकः इवि स्थितः स्यात्। यस्य शिलाभवनानि वारवधूरतिपरि मलाविष्कारतया तत्रत्यानां नगरवासिनां यौवनान्युद्दामानि द्योतयन्ति।

**क्रिये** – अधिवसेः, प्रथयति।

प्रथयति – प्रथ प्रख्याने -णिचि-पर-लट्-प्र.पु-ए.व।

प्रथयति – प्रथयतः – प्रथयन्ति।

**व्याकरणकार्यम्** – नीचैराख्यं गिरिमधिवसेः। अधि + वस् धातोः उपान्वध्वाङ् वसः इति सूत्रेण आधारस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति द्वितीया। गिरिमिति रूपम्।

पुलका अस्य संजातः इति पुलकितः। नीचैः इत्याख्या यस्य सः नीचैराख्यः, तं नीचैराख्यम्।

**पर्यायपदानि** – पण्यस्त्री। वारस्त्री, गणिकस्त्री, वेश्या, पण्यस्त्री, रूपजीविनी इत्यमरः।

**2.3.8** प्रकृतम् - नीचगिरौ कुसुमचलनार्थिनीनां विलासिनीनां मुखोपरि छायादानेन ताभिः साकं कृतपरिचयः भवतु।

**विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च-**
**न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।**
**गण्डस्वेदापनयनरुचाक्लान्तकर्णोत्पलानां**
**छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ।।२८।।**

**पदच्छेदः** - सिञ्चन्नुद्यानानां – सिञ्चन् + उद्यानानां।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| विश्रान्तः सन् तत्र | - | विश्राममनुभूय नीचगिरौ (विनीयाध्वश्रमः) |

| | | |
|---|---|---|
| वननदीतीरजातानि | - | वननदीतीरोत्पन्नानि(स्वयं रूढानि) |
| उद्यानानां यूथिकाजालकानि | - | आरामाणां मागधीकुसुममुकुलानि |
| नवजलकणैः सिञ्चन् | - | नवीनसिकरैः आर्द्रीकुर्वन् |
| गण्डस्वेदापनयनरुचाक्लान्तकर्णोत्पलानां | - | कपोलयोः य स्वेदः तस्य दूरीकरणेन च भङ्गः तेन क्लान्तकर्णोत्पलानां |
| पुष्पलावीमुखानाम् | - | पुष्पापचायिकानां स्त्रीणां मुखानि |
| छायादानात् क्षणपरिचितः सन् | - | अनातपस्य दानात् कृतपरिचयः सन् |
| व्रज | - | गच्छ। |

**सारः** - नीचगिरौ कृतविश्रामः सन् वननदीतीरोत्पन्नानि अकृत्रिमाणि मागधीकुसुममुकुलानि सिञ्चतु। अपि च तत्रोद्यानेषु कुसुमचयनार्थिनीनां चयनश्रमखिन्नानां स्त्रीणां मुखोपरि छायादानेन ताभिः सह क्षणं कृतपरिचयः सन् गच्छ।

**क्रिया** – व्रज। व्रज गतौ -पर-लोट्-म.पु-ए.व।

व्रज, व्रजतात् – व्रजतं – व्रजत।

छायायाः दानात् – छायादानात्।

**पर्यायपदानि** – छाया - सूर्यप्रिया, छाया, कान्तिः, प्रतिबिम्बमनातपः इत्यमरः।

## पुनरावृत्तिः (Recap)

- सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्।
- केकालापिनः बर्हिणः त्वाम् स्वागतीकुर्वन्ति।
- दशार्णदेशेषु विख्यातां विदिशां राजधानीं प्राप्स्यसि।
- नगराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि।
- छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. "रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय" इयं सूक्तिः कुतः उद्धृता ?
2. गौरवाय कारणं किम् ?
3. शुक्लापाङ्गाः सजलनयनाः के मेघं स्वागतं कुर्वन्ति ?
4. दशार्णदेशेषु विख्याता राजधानी का ?
5. यात्राकाले मेघं कामुकत्वस्य तत्कालफलं कुत्र प्राप्यते ?
6. उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि- इदं केन पर्वतेन सम्बन्धः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
(Answer the following questions in one or two sentences)

1. मेघं कामुकतायाः संपूर्णफलं कदा प्राप्यते ?
2. दशार्णदेशे हंसाः कतिपयदिनेषु किं कुर्वन्ति?

## एकैकया खण्डिकया उत्तरं लिखत।
(Answer the following questions in a paragraph)

1. दशार्णदेशस्यावस्था कीदृशी ?
2. "सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि"- आशयं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. रघूवंशस्य प्रथमसर्गे एकविंशतिः श्लेकादारभ्य अष्टविंशतिः श्लोकपर्यन्तं कथासारं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मेघदूतात्।
2. पूर्णता गौरवाय कारणं भवति।
3. शुक्लापाङ्गाः सजलनयनाः केकालापिनः मयूराः मेघं स्वागतं कुर्वन्ति।
4. विदिशा।
5. विदिशायाम्।
6. नीचैराख्यम् इति पर्वतेन।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्रीकेदारनाथ् शर्मा,चौखम्बा सान्स्क्रीट् सन्तान्, वारणासी, २०१६ पुटानि ८-६०
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वारणासी।
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 4
# उज्जयिनी - सिन्धुः

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य काव्यप्रतिभां जानाति।
- सन्देशकाव्यप्रस्थाने मेघदूतस्य प्राधान्यम् अवगच्छति।
- विरहतप्तस्य यक्षस्य अवस्थाम् अवगच्छति।
- मेघस्य यात्रावर्णनद्वारा प्रकृतिशोभाम् आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

कविः कालिदासः मेघदूते निर्विन्ध्याम् अधिकृत्य सूचयति। यक्षः मेघं प्रति कैलासपर्यन्तं वर्तमानं मार्गं निर्दिशति। उज्जयिनीं गच्छन् मेघः मध्येमार्गं निर्विन्ध्यानदीं पश्यति। विन्ध्यात् निर्गता भवति निर्विन्ध्या। अनन्तरं उज्जयिनीं वर्णयति। कालिदासस्य जन्मस्थलम् उज्जयिनी इति केचन पण्डिताः। हि कविः अत्यधिकेन तात्पर्येण प्रेम्णा साहित्यगरिम्ना वाचा उज्जयिनीं वर्णयति मेघदूते। पश्यामस्तावत्।

## मुख्यपदानि (Keywords)

लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि - स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु - शेषैः पुण्यैर्हृदमिव दिवः कान्तिमत्खण्डमेकं - संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः - पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः - कुसुमसुरभिष्वध्वखेदं नयेथाः - पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य - आमन्त्राणां फलमविकलं लप्स्यसे गर्जितानाम् - आमोक्ष्यन्ते त्वयि मधुकरश्रेणि-

दीर्घान् कटाक्षान् - हर पशुपतेरार्द्रनागाजिनेच्छाम् - सौदामिन्या कनकनिकषास्निग्धया दर्शयोर्वीम् - मन्दायन्ते न खलुसुहृदामभ्युपेतार्थकृत्याः - अतो वर्त्म भानोस्त्यजाशु।

## Discussion

**2.4.1** प्रकृतम् - अवश्यं त्वया उज्जयिनी गन्तव्या।

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।।**
**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां**
**लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ।।२९।।**

**पदच्छेदः** - पन्था यदपि – पन्थाः + यत् + अपि। प्रस्थितस्योत्तराशां - प्रस्थितस्य + उत्तराशां।

सौधोत्सङ्गप्रणयिविमुखो मा - सौधोत्सङ्गप्रणयिविमुखः + मा।

भूरुज्जयिन्याः – भूः + उज्जयिन्याः। लोलापाङ्गैर्यदि - लोलापाङ्गैः + यदि।

लोचनैर्वञ्चितोऽसि - लोचनैः + वञ्चितः + असि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| उत्तराशां प्रस्थितस्य भवतः | - | उदीचीं दिशां प्रति गच्छतः मेघस्य |
| पन्थाः वक्रः यदपि | - | कुञ्चितमार्गः सत्यपि |
| उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखः | - | उज्जयिन्याः हर्म्याणाम् उपरिभागेषु परिचयपराङ्मुखः |
| मा स्म भूः | - | न भव |
| तत्र विद्युद्दामस्फुरितचकितैः | - | उज्जयिन्यां विद्युल्लतानां स्फुरणेभ्यः चकितैः |
| लोलापाङ्गैः पौराङ्गनानां लोचनैः | - | चञ्चलकटाक्षैः नागरिकयोषितां नेत्रैः |
| न रमसे यदि | - | न क्रीडसि यदि |
| वञ्चितोऽसि | - | न जन्मवैफल्यं प्राप्तोऽसि। |

**सारः** – हे मेघ, उदीचीं दिशं प्रति प्रस्थितस्य यद्यपि ते मार्गः वक्रः तथाऽपि उज्जयिनीमवश्यमेव गच्छ। तत्र नागरिकस्त्रीणां विद्युत्स्फुरणवशात् चकितैः चञ्चलकटाक्षैः त्वं वीक्षितः न स्यात् तर्हि ते जन्मवैफल्यं स्यात्। अतः तासां स्त्रीणां सौन्दर्यं पश्येः।

**क्रियाः** - भूः, रमसे, असि।

रमसे। रमु क्रीडायां - आत्म-लट्-म.पु-ए.व।

रमसे - रमेथे - रमध्वे।

**व्याकरणकार्यम्** - मा स्म भूः। अत्र स्म इत्यस्य योगे 'स्मोत्तरे लङ् च' इति सूत्रेण चकारादाशीरर्थे लुङ्। मा इत्यस्य योगे न माङ् योगे इति अडागमनिषेधश्च।

**पर्यायपदानि** – सौधम् – राजसदनं, सौधम्, स्वस्तिकः, हर्म्यं, उपरिगृहम्।

सौधानामुत्सङ्गेषु प्रणये विमुखः सौधोत्सङ्गप्रणयविमुखः।

**2.4.2** प्रकृतम् – निर्विध्यायाः अनुरागवत्याः रमण्या इव रसोपभोगं कुरु।

**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः**
**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।**
**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥ ३०॥**

**पदच्छेदः** - विभ्रमो हि - विभ्रमः + हि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| पथि | - | उज्जयिनीमार्गे |
| वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः | - | तरङ्गचलनेन मुखराणां पक्षि-<br>पङ्क्तिरूपमेखलासूत्रयुक्तायाः |
| स्खलितसुभगं संसर्पन्त्याः | - | मनोज्ञतया प्रवहन्त्याः |
| दर्शितावर्तनाभेः | - | प्रकटितांभसां भ्रमरूपनाभेः |

| | | |
|---|---|---|
| निर्विन्ध्यायाः सन्निपत्य | - | विन्ध्यात् निष्क्रान्तायाः नद्याः सङ्गत्य |
| रसाभ्यन्तरः भव | - | रसोपभोगं कुर्वन् वर्तस्व |
| स्त्रीणां प्रियेषु विभ्रमः | - | कामिनीनां प्रियेषु विषयेषु विलास एव |
| आद्यं प्रणयवचनं हि | - | प्रथमं प्रार्थनावाक्यं हि। |

**सारः** – हे मेघ, उज्जयिनीं गच्छन् त्वं मध्ये मार्गं निविन्ध्यां नदीं पश्यसि। विन्ध्यात् निर्गता भवति निर्विन्ध्या। अनुरागवत्या रमण्या इव वर्तमानायाः तस्याः रसोपभोगं कुर्वन् याहि। हि कामिनीनां प्रियेषु विषये विलास एव आद्यं प्रणयवचनम्। स्त्रीणामेव स्वभावो यत् विलासैरेव रागप्रकाशनं न तु कण्ठतः इति भावः।

**क्रिया** – भव। भू सत्तायाम् -पर-लोट्.म.पु-ए.व.।

भव – भवतात्-भवतं- भवत।

**अलङ्कारः** -समासोक्तिः। समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।

दर्शितः आवर्तः एव नाभिः - दर्शितावर्तनाभिः, तस्य दर्शितावर्तनाभेः।

**पर्यायपदानि** – वीचिः। भङ्गः, तरङ्गः, ऊर्मिः, वीचिः।

**2.4.3** प्रकृतम् - नायकविरहात् क्षीणितां निर्विन्ध्यां त्वं वृष्टिना सम्पन्नां कुरु।

**वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः**
**पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।**
**सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती**
**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ।।३१।।**

**पदच्छेदः** - वेणीभूतप्रतनुसलिलासावतीतस्य - वेणीभूतप्रतनुसलिला + असौ + अतीतस्य।

तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः - तटरुहतरुभ्रंशिभिः + जीर्णपर्णैः।

त्वयैवोपपाद्यः - त्वया + एव + उपपाद्यः।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| सुभग | - | हे सुन्दरमेघ, |
| वेणीभूतप्रतनुसलिला | - | स्वल्पतरसलिलेन (वेणीभूतकेशपाशे वा) कृशतनुः |
| तटरुहतरुभ्रंशिभिः जीर्णपर्णैः | - | तीरस्य वृक्षात् भ्रंशिभिः शुष्कपत्रैः |
| पाण्डुच्छाया अतीतस्य | - | पाण्डुवर्णातीतस्य |
| विरहावस्थया | - | पूर्वोक्तरीत्या विरहानुभवेन |
| ते सौभाग्यं व्यञ्जयन्ती | - | तव सुभगत्वं प्रकाशयन्ती |
| स असौ सिन्धुः | - | सः सुभगः पूर्वोक्ता नदी निर्विन्ध्या |
| येन विधिना कार्श्यं | - | येन व्यापारेण कृशतां |
| त्यजति स (विधिः) | - | उपेक्ष्यति तत्कार्यं |
| त्वया एव उपपाद्यः | - | त्वया (मेघेन) एव कर्तव्या। |

**सारः** – हे मेघ, सा निर्विध्या नदी नायिकेव तव विश्लेषेण स्वल्पतरजलेन कृशतनुः समजायत। नदीतीरस्य पादपजीर्णैः पर्णैः पाण्डुच्छाया भूत्वा तं सौभाग्यं प्रकाशयति। अतः त्वं वृष्टिं कृत्वा तस्याः कार्श्यं दूरीकुरु।

कविः कालिदासः मेघदूते निर्विन्ध्याम् अधिकृत्य एवं सूचयति। यक्षः मेघं प्रति कैलासपर्यन्तं वर्तमानं मार्गं निर्दिशति। उज्जयिनीं गच्छन् मेघः मध्येमार्गं निर्विन्ध्यानदीं पश्यति। विन्ध्यात् निगता भवति निर्विन्ध्या। अनुरागवत्या रमण्या समं वर्तमानायाः तस्याः रसोपयोगः कार्यः। सा अनुरागवती नायिका इव विलासैः रागप्रकाशनं प्रकटयति।

नायकस्याभावे नायिका कृशाङ्गी भवति। एवं मेघस्य वियोगे स्वल्पजलतरा कृशतनुः बभूव इयं नदी। नदीतीरस्थपादपजीर्णैः पर्णैः इयं पाण्डुच्छाया बभूव। वृष्टिं कृत्वा तस्याः कार्श्यं दूरीकर्तुं मेघं निर्दिशति।

**क्रिया** - त्यजति। त्यागे, पर-लट्-प्र.पु-ए.व।

त्यजति - त्यजतः - त्यजन्ति।

तटयोः रुहाः ये तरवः ते तटरुहतरवः, तेभ्यः भ्रमन्तीति तटरुहतरुभ्रंशिनः, तैः तटरुहतरुभ्रंशिभिः।

**अलङ्कारः** – समासोक्तिः।

**पर्यायपदानि** – तरुः। वृक्षः, पादपः, तरुः, महीरुहः, शाखी।

**2.4.4** प्रकृतम् - उज्जयिनीं वर्णयति कविः।

**प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्**
**पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।।**
**स्वल्पीभूते सुचिरतफले स्वर्गिणां गां गतानां**
**शेषैःपुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्।।३२।।**

**पदच्छेदः** - प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान् – प्राप्य + अवन्तीन् + उदयनकथाकोविद-ग्रामवृद्धान्। पुण्यैर्हृतम् – पुण्यैः + हृतम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| उदयनकथाकोविदग्रामवृद्धान् | - | उदयनकथाप्रवचनचतुरग्रामीणवृद्धान् |
| अवन्तीन् प्राप्य | - | अवन्ती नाम जनपदान् गत्वा |
| पूर्वोद्दिष्टां श्रीविशालां विशालां पुरीं | - | पूर्वोक्तां सम्पत्तिमतीं उज्जयिनीं नगरीं |
| अनुसर सुचिरतफले स्वल्पीभूते | - | व्रज पुण्यफले अत्यल्पावशिष्टे |
| गां गतानां स्वर्गिणां | - | भूमिं प्राप्तवतां स्वर्गवतां जनानां |
| शेषैःपुण्यैः हृतं दिवः | - | भुक्तशिष्टैः सुकृतैः आनीतं स्वर्गस्य |
| कान्तिमत् एकं खण्डमिव | - | सश्रीकम् एकं शकलमिव वर्तते। |

**सारः** – हे जलद, पुनः उदयनकथाप्रवचनचतुरग्रामीणवृद्धान् अवन्तीन् देशान् प्राप्य सम्पत्तिमतीं उज्जयिनीं पुरीं व्रज। सा उज्जयिनी नगरी तु स्वर्गात् भूमिं गतानां शेषैः पुण्यैः स्वर्गस्य सारभूतं खण्डं वर्तते।

**क्रिया** – अनुसर – अनु + सृ गतौ-पर-लोट्-म.पु-ए.व.।

अनुसर, अनुसरतात् - अनुसरतं - अनुसरत।

**अलङ्कारः** –उत्प्रेक्षा- 'संभावना स्याद् उत्प्रेक्षा' इति लक्षणम्।

**पर्यायपदानि** – स्वर्गः। स्वर्, स्वर्गः, नाकः, त्रिदिवः, त्रिदशालयः।

**2.4.5** प्रकृतम् – शिप्रावायुः प्रियतम इव वर्तते इति कविः वर्णयति।

**दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां**
**प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।**
**यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः**
**शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ।।३३।।**

**पदच्छेदः** – प्रियतम इव - प्रियतमः + इव।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यत्र प्रत्यूषेषु पटु | - | विशालायां प्रातःकालेषु दक्षं |
| मदकलं सारसानां | - | मदेनाव्यक्तमधुरं सारसपक्षिणां (हंसानां वा) |
| कूजितं दीर्घीकुर्वन् | - | कूजितं विस्तारयन् |
| स्फुटितकमलामोदमैत्रीकषायः | - | विकसितकमलसुगन्धयुक्तः |
| अङ्गानुकूलः | - | गात्रसुरतस्पर्शः (गाढालिङ्गनदत्तगात्रसंवाहनः) |
| शिप्रावातः स्त्रीणां | - | शिप्रा नाम नद्याः वायुः कामिनीनां |
| सुरतग्लानिं प्रार्थनाचाटुकारः | - | रतिक्षमं प्रसादार्थं तस्यां मधुरभाषी |
| प्रियतम इव हरति | - | वल्लभ इव अपहरति। |

**सारः** – हे मेघ, उज्जयिन्यां प्रातःकालेषु विकसितकमलसुगन्धयुक्तः मदेन अव्यक्तमधुरं सारसपक्षिणां कूजितं दीर्घीकुर्वन् गात्रसुरतस्पर्शः शिप्रानद्याः शीतलवायुः प्रियतम इव सुरतप्रार्थनाचाटुवाक्यैः कामिनीनां सुरतश्रमं दूरीकरोति। तामुज्जयिनीं गच्छ।

**क्रिया** – हरति। हृञ् हरणे – पर-प्र.पु-ए.व.।

हरति - हरतः - हरन्ति।

**अलङ्कारौ** – उत्प्रेक्षा, उपमा च।

‘उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः’ इति लक्षणम्।

**पर्यायपदानि** – स्त्री। महिला, वनिता, नारी, अङ्गना।

शिप्रायाः वातः शिप्रावातः।

**2.4.6** प्रकृतम् – उज्जयिन्याम् बहुमूल्याः हारमरतकमणि-प्रवालखण्डाः च सन्ति। सम्पदि उज्जयिनी समुद्रमप्यतिक्रामति।

**हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः**
**शष्पश्यामान्मरतकमणीनुन्मयूखप्ररोहान्।**
**दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भृङ्गान्**
**संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः।।३४।।**

**पदच्छेदः** - हारांस्तारांस्तरलगुटिकान् - हारान् + तारान् + तरलगुटिकान्।

सलिलनिधयस्तोयमात्रावशेषः - सलिलनिधयः + तोयमात्रावशेषाः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यस्यां कोटिशः विपणीरचितान् | - | विशालायां सर्वासु विपणिषु प्रसारितान् |
| तारान् तरलगुटिकान् | - | शुद्धान् मध्यमणिभूतमहारत्नान् |
| हारान्(कोटिशः) शङ्खान् च | - | मुक्तावलीः तथा कोटिशः शङ्खान् च |
| शष्पश्यामान् | - | श्यामान् बालतृणान् |
| उन्मयूखप्ररोहान् मरतकमणीन् | - | उद्गतरम्याङ्कुरान् गारुडरत्नानि |
| विद्रुमाणां भङ्गान् च | - | प्रवालानां खण्डान् च |
| दृष्ट्वा सलिलनिधयः तोयमात्रावशेषाः | - | अवलोक्य समुद्राः केवलजलावशिष्टाः |

संलक्ष्यन्ते - अनुमीयन्ते।

**सारः** – हे मेघ, यत्र विशालानां पण्यवीथिकासु प्रसारितान् कोटिशो बहुमूल्यान् मरतकमणीन् प्रवालखण्डान् दृष्ट्वा समुद्रस्य जलमात्रावशेषतां लोकाः लक्ष्यन्ते। अतः उज्जयिनीं गच्छ।

**क्रिया** – संलक्ष्यन्ते। सम् + लक्ष् अङ्कने दर्शने आलोचने च। आत्म-कर्मणि-लट्-प्र.पु-ब.व।

संलक्ष्यते - संलक्ष्येते - संलक्ष्यन्ते।

**अलङ्कारः** -उदात्तम्। 'उदात्तमृद्धेः श्लाघ्यम्' इति लक्षणम्।

सलिलानां निधयः सलिलनिधयः।

**पर्यायपदानि** - विपणिः – पण्यवीथिका, विपणिः, पण्यविक्रयशाला।

प्रक्षिप्तः श्लोकोऽयम्। –

**2.4.7** प्रकृतम् **-** विशालायां कथाभिज्ञाः जनाः आगन्तुकान् कथासन्दर्भान् उक्त्वा विनोदयन्ति।

**प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे**

**हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः।**

**अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-**

**दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ।।३५।।**

**पदच्छेदः** – वत्सराजोऽत्र – वत्सराजः+ अत्र।

अभूदत्र- अभूत् + अत्र। तस्यैव – तस्य + एव। अत्रोद्भ्रान्तः- अत्र + उद्भ्रान्तः। दर्पादित्यागन्तून् – दर्पात् + इति + आगन्तून्। जनो यत्र – जनः + यत्र। बन्धूनभिज्ञः- बन्धून् + अभिज्ञः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अत्र वत्सराजः | - | अस्मिन् प्रदेशे वत्सराज्याधीशः उदयनः। |
| प्रद्योतस्य राज्ञः | - | प्रद्योतनामकस्य उज्जयिनीनायकस्य महाराजस्य |
| प्रियदुहितरं जह्रे | - | प्रियपुत्रीं वासवदत्तां जहार। |
| अत्र तस्यैव राज्ञः | - | अस्मिन् स्थले तस्यैव प्रद्योतस्य |

हैमं तालद्रुमवनमभूत्  किल - सौवर्णं तालद्रुमवनं अवर्तत इति प्रसिद्धम्।

अत्र नलगिरिः दर्पात् - अत्रैव नलगिरि नाम इन्द्रदत्तः गजः मदात्

स्तम्भम् उत्पाट्य उद्भ्रान्तः - स्तम्भम् उद्धृत्य उत्पत्य भ्रमणं कृतवान्

इति अभिज्ञःजनः - इत्थंभूताभिः कथाभिः कोविदो जनः

आगन्तून् बन्धून् रमयति - देशान्तरादागतान् बन्धुजनान् विनोदयति।

**सारः** - हे मेघ, विशालायां तत्रत्यः कथाभिज्ञो जनः देशान्तरादागतान् बन्धून् अत्रोदयनकृतं वासवदत्तायाः हरणं, अत्रत्यं प्रद्योतस्य सौवर्णं तालद्रुमवनं, अत्र तदीयस्य नलगिरि नामकस्य इन्द्रदत्तगजस्य उन्मत्तदशायां स्तम्भनाशनं उन्मत्तभ्रमणं च आसीदित्येवं कथाभिः विनोदयति। तादृशीं विशालां व्रज।

**क्रियाः** – जह्रे, अभूत्, रमयति।

रमयति - रमु क्रीडायां णिचि-पर-लट्-प्र.पु-ए.व।

रमयति- रमयतः रमयन्ति।

**अलङ्कारः** – भाविकम्।

'अतीतानागतं यत्र प्रत्यक्षत्वेन लक्षिते। अत्यद्भुतार्थकथनाद्भावितंतदुदाहृतम्' इति लक्षणम्।

प्रिया दुहिता प्रियदुहिता, तां प्रियदुहितरम्।

**पर्यायपदानि** – दर्पः। दर्पः, अवलेपः, अवष्टम्भः, चित्रोद्रेकः, स्मयः।

अयमपि प्रक्षिप्तः श्लोकः।

**2.4.8 प्रकृतम्** – विशालायां सूर्याश्वसदृशाः अश्वाः, उन्नताः गजेन्द्राः, वीराः सैनिकाः च सन्ति।

**पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः**

**शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदान्।**

**योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः**

**प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ।।३६।।**

**पदच्छेदः** - दिनकरहयस्पर्धिनो यत्र - दिनकरहयः + स्पर्धिनः+ यत्र।

शैलोदग्रास्त्वम् - शैलोदग्राः + त्वम्।

करिणो वृष्टिमन्तः- करिणः + वृष्टिमन्तः।

प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः - प्रत्यादिष्टाभरणरुचयः + चन्द्रहासव्रणाङ्कैः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यत्र वाहाः पत्रश्यामा | - | विशालायां अश्वाः पलाशवर्णाः |
| दिनकरहयस्पर्धिनः शैलोदग्राः | - | सूर्याश्वतुल्याः शैलवदुन्नताः |
| करिणः प्रभेदात् त्वमिव | - | गजाः मदस्रावात् हेतोः त्वमिव |
| वृष्टिमन्तः योधाग्रण्यः संयुगे | - | वृष्टियुक्ताः भटश्रेष्टाः युद्धे |
| तस्थिवांसः प्रतिदशमुखं | - | अभिरावणं स्थितवन्तः |
| चन्द्रहासव्रणाङ्कैः | - | रावणासिना चन्द्रहासेन व्रणिताङ्कैः |
| प्रत्यादिष्टाभरणरुचयः(सन्ति) | - | प्रतिषिद्धभूषणकान्तयः सन्ति। |

**सारः** – हे मेघ, विशालायां सूर्याश्वतुल्याः अश्वाः मदमत्ताः शैलवत् उन्मत्ताः गजेन्द्राः, रावणासिव्रणाङ्कितशरीराः वीराः सैनिकाश्च सन्ति।

**अलङ्कारः** – भाविकम्।

प्रत्यादिष्टानां आभरणानां रुचिः येषां ते प्रत्यादिष्टाभरणरुचयः।

प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृत इत्यमरः।

अयमपि प्रक्षिप्तः श्लोकः।

**2.4.9** प्रकृतम् – उज्जयिन्यां वर्तमानेषु धनिनां हर्म्येषु अध्वखेदं दूरीकुरु।

**जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैः-**

**र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।**

**हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः**

**लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु ।।३७।।**

**पदच्छेदः** – जालोद्गीर्णैरुपचितवपुः – जालोद्गीर्णैः + उपचितवपुः।

केशसंस्कारधूपैर्बन्धुप्रीत्या - केशसंस्कारधूपैः + बन्धुप्रीत्या। हर्म्येष्वस्याः- हर्म्येषु + अस्याः।

कुसुमसुरभिष्वध्वखेदं - कुसुमसुरभिषु + अध्वखेदं।

भवनशिखिभिर्दत्तनृत्योपहारः -भवनशिखिभिः+दत्तनृत्योपहारः।

पश्यंल्ललितवनितापादरागाङ्कितेषु - पश्यन् + ललितवनितापादरागाङ्कितेषु।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| जालोद्गीर्णैः केशसंस्कारधूपैः | - | गवाक्षमार्गनिर्गतैः केशवासनार्थैः गन्धद्रव्यधूपैः |
| उपचितवपुः बन्धुप्रीत्या | - | परिपुष्टशरीरः बन्धुरिति प्रीत्या |
| भवनशिखिभिःदत्तनृत्योपहारः | - | गृहमयूरैः नृत्यक्रियया संभावितः |
| कुसुमसुरभिषु | - | कुसुमैः सुगन्धिषु |
| ललितवनितापादरागाङ्कितेषु | - | सुन्दरीणां पादरागेण लाक्षारसचिह्नितेषु |
| हर्म्येषु अस्याः लक्ष्मीं | - | प्रासादेषु उज्जयिन्याः ऐश्वर्यं |
| पश्यन् अध्वखेदं नयेथाः | - | वीक्ष्य मार्गक्लेशं अपनय। |

**सारः** – हे मेघ, उज्जयिन्यां गवाक्षमार्गनिर्यातैः महिलाकेशसौरभार्थैः गन्धधूपैः परिपुष्टशरीरं त्वां, गृहमयूराः तव गर्जनमाकर्ण्य नृत्यैः बहुमानयन्ति। पुष्पैः सुगन्धिषु सुन्दरीणां पादरागेण लाक्षारसचिह्नितेषु अस्याः धवलहर्म्येषु मार्गक्लेशं दूरीकुर्वन् विश्राममनुभव।

(उज्जयिन्यां वर्तमानेषु कुसुमसुरभिषु प्रासादेषु अध्वखेदं नयेथाः।)

**क्रिया** – नयेथाः। णीञ् प्रापणे -आत्म-लोट्-म.पु-ए.व।

नयेथाः- नयेथं – नयेथ।

कुसुमैः सुरभिषु कुसुमसुरभिषु।

**पर्यायपदानि** – कुसुमम्। सुमनसः पुष्पम् प्रसूनं कुसुमं सुमम् इत्यमरः।

**2.4.10** प्रकृतम् – उज्जयिन्याः भगवतः परमेश्वरस्य देवालयं त्वया द्रष्टुं शक्यते।

**भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः**
**पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य।**
**धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-**
**स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ।।३८।।**

**पदच्छेदः** – कण्ठच्छविरिति- कण्ठच्छविः + इति।

यायास्त्रिभुवनगुरोर्धाम - यायाः + त्रिभुवनगुरोः + धाम।

कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः -

कुवलयरजोगन्धिभिः + गन्धवत्याः + तोयक्रीडानिरतयुवतिस्नानतिक्तैः + मरुद्भिः।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| भर्तुः कण्ठच्छविः इति | - | स्वामिनः शिवस्य गलशोभायुतः इति हेतोः |
| गणैः सादरं वीक्ष्यमाणः (सन्) | - | शिवगणैः सबहुमानम् अवलोकयमानः |
| त्रिभुवनगुरोः चण्डीश्वरस्य पुण्यं | - | त्रैलोक्यनाथस्य महाकालस्य पावनं |
| धाम यायाः | - | महाकालाख्यं स्थानं गच्छेः |
| कुवलयरजोगन्धिभिः | - | उत्पलपरागगन्धिभिः |
| तोयक्रीडानिरतयुवतिस्नानतिक्तैः | - | जलक्रीडातत्परयुवतिजनस्नानीयचन्दनादिभिः सुगन्धिभिः |
| गन्धवत्याः मरुद्भिः धूतोद्यानं | - | गन्धवती नाम नद्याः मारुतैः कम्पितमुद्यानं। (प्रेक्षणीयम्) |
| भवता | - | भवता द्रष्टव्यम्। |

**सारः** – हे मेघ, उज्जयिन्यां पावनतमं श्रीमहाकालमन्दिरमस्ति। तत्र याहि। तत्र नीलकण्ठस्य कण्ठच्छविरिव वर्तमानं त्वां शिवगणाः सादरं वीक्षिष्यन्ते। न केवलं मुक्तिस्थानमिदम् अपि तु तन्मन्दिरं जलक्रीडातत्पराणां युवतिजनस्नानीयचन्दनादिना सुरभिलं तथा पद्मपरागगन्धवद्भिः गन्धवत्याः नद्याः वायुभिः कम्पितक्रीडं नूनमेव प्रेक्षणार्हं भवति।

**क्रिया** – यायाः। या प्रापणे। पर-आशिर्लिङ्.म.पु-ए.व।

यायाः - यायास्तम् -यायास्त।

आदरेण सह वर्तते इति सादरम्।

**पर्यायपदानि**। कण्ठः। कण्ठः, गलः, ग्रीवा, कन्धरः, कम्बुग्रीवा।

**2.4.11** प्रकृतम् – महाकालमन्दिरं प्राप्तस्त्वं सूर्यास्तमनकालपर्यन्तं अत्रैव वर्तस्व।

**अप्यन्यस्मिन्जलधर, महाकालमासाद्य काले**
**स्थातव्यं ते नयनविषयं यावदत्येति भानुः।**
**कुर्वन्सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-**
**मामन्त्राणां फलमविकलं लप्स्यसे गर्जितानाम्।।३८।।**

**पदच्छेदः** - अप्यन्यस्मिन्जलधर- अपि + अन्यस्मिन् +जलधर। यावदत्येति- यावत् + अत्येति।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| जलधर महाकालं | - | हे मेघ, चण्डीश्वरदेवालयं |
| अन्यस्मिन् काले आसाद्य | - | सन्ध्यातिरिक्ते काले प्राप्य |
| ते स्थातव्यं यावत् | - | तव स्थितिं कर्तव्यं यावत्कालं |
| भानुः अत्येति | - | सूर्यः दृष्टिपथमतिक्रामति |
| श्लाघनीयां शूलिनः | - | प्रशस्यां शिवस्य |
| सन्ध्याबलिपटहतां कुर्वन् | - | प्रदोषे देवपूजानकत्वं विदधत् |

आमन्त्राणां गर्जितानाम् अविकलं फलं- ईषत् गभीराणां गर्जनानाम् अखण्डं फलं

लप्स्यसे - प्राप्स्यसि

**सारः** – हे जलद, सन्ध्यातिरिक्तेऽपि काले चण्डीश्वरदेवालयं प्राप्तः त्वं सूर्यास्तमनकालपर्यन्तं तत्रैव प्रतीक्षां कुरु। प्रदोषे शिवपूजासमये ईषद् गर्जितं त्वं पूजापटहभावं लब्ध्वा साफल्यं प्राप्स्यसि।

**क्रिये** – अत्येति, प्राप्स्यसि

प्राप्स्यसि - प्र+आप्लृ गतौ-पर-लृट्-म.पु-ए.व।

प्राप्स्यसि- प्राप्स्तथः- प्राप्स्तथ।

**व्याकरणम्** - स्थातव्यं ते इत्यस्य कृत्यानां कर्तरि वा इति कृत्यशब्दयोगात् विकल्पेन षष्ठी। ते इति षष्ठी।

**पर्यायपदानि** – भानुः। सूर्यः, अर्कः, भास्करः, दिनकरः, अंशुमाली।

**2.4.12** प्रकृतम् – गणिकाः त्वत्तः सुखकरान् वृष्टेः प्रथमबिन्दून् प्राप्य परमप्रीताः त्वामवलोकयन्ति।

**पादन्यासैः क्वणितरसनास्तत्र लीलावधूतैः**
**रत्नछायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।**
**वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-**
**नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्।।३९।।**

**पदच्छेदः** – क्वणितरसनास्तत्र - क्वणितरसनाः + तत्र।

रत्नछायाखचितवलिभिश्चामरैः- रत्नछायाखचितवलिभिः + चामरैः।

वर्षाग्रबिन्दूनामोक्ष्यन्ते - वर्षाग्रबिन्दून् + आमोक्ष्यन्ते।

वेश्यास्त्वत्तो नखपदसुखान्प्राप्य – वेश्याः + त्वत्तः + नखपदसुखान् + प्राप्य।

वर्षाग्रबिन्दूनामोक्ष्यन्ते - वर्षाग्रबिन्दून् + आमोक्ष्यन्ते।

**अन्वयः** - **अन्वयार्थः**

तत्र पादन्यासैः - सन्ध्याकाले पादनिक्षेपैः

| | | |
|---|---|---|
| क्वणितरसनाः | - | शब्दायमानमेखलायुक्तः |
| लीलावधूतैः | - | विलासेनावधूतैः |
| रत्नछायाखचितबलिभिश्चामरैः | - | मणिदीप्त्या दूषितचामरदण्डैः |
| क्लान्तहस्ताः वेश्याः | - | क्षीणितकराः गणिकाः |
| त्वत्तः नखपदसुखान् | - | भवतः नखक्षतेषु सुखकरान् |
| वर्षाग्रबिन्दून् प्राप्य | - | वर्षस्य प्रथमबिन्दून् प्राप्य |
| त्वयि मधुकरश्रेणिदीर्घान् | - | भवति वक्रावलोकितान् |
| कटाक्षान् आमोक्ष्यन्ते | - | अपाङ्गदर्शनेन वीक्षिष्यन्ते। |

**सारः** – हे मेघ, सायंकाले चण्डीश्वरपूजासमये सविलासं पादन्यासैः शब्दायमानरशनाः चामरान्दोलनैः च क्लान्तहस्ताः गणिकाः त्वत्तः नखक्षतेषु सुखकरान् वृष्टेः प्रथमबिन्दून् प्राप्य परमप्रीताः भूत्वा त्वां दीर्घैः कटाक्षैः वीक्षिष्यन्ते।

**क्रिया** - आमोक्ष्यन्ते। आङ् + मुच्लृ मोचने – आत्म- लृट्-प्र.पु - ब.व।

आमोक्ष्यते – आमोक्ष्येते - आमोक्ष्यन्ते।

रत्नानां छायया खचितः वलयः- रत्नछायाखचितवलयः ताभिः रत्नछायाखचितवलिभिः।

**पर्यायपदानि** – बलिः। भागधेयः, करः, बलिः।

**2.4.13** प्रकृतम् – शिवस्य ताण्डवनृत्तसमये मण्डलाकारेण वर्तमानं त्वां पार्वती वीक्षिष्यते ।

**पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः**
**सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।**
**नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां**
**शान्तोद्वेगः स्तिमितनयनं दृष्टभक्तिर्भवान्या ।।४०।।**

**पदच्छेदः** – पश्चादुच्चैर्भुजतरुवनं - पश्चात् + उच्चैः + भुजतरुवनं। मण्डलेनाभिलीनः- मण्डलेन+अभिलीनः । पशुपतेरार्द्रनागाजिनेच्छां -पशुपतेः + आर्द्रनागाजिनेच्छां । दृष्टभक्तिर्भवान्या- दृष्टभक्तिः+ भवान्या ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| पश्चात् पशुपतेः नृत्यारम्भे | - | सन्ध्याबल्यनन्तरं शिवस्य ताण्डवप्रारम्भे |
| प्रतिनवजपापुष्परक्तम् | - | नूतनजपाकुसुमारुणं |
| सान्ध्यं तेजः दधानः | - | सन्ध्यायां भवं प्रकाशं बिभ्रतः |
| उच्चैर्भुजतरुवनं | - | उन्नतं भुज एव वृक्षाणां वनं |
| मण्डलेन अभिलीनः भवान्याः | - | मण्डलाकारेण व्याप्तः सन् पार्वत्याः |
| दृष्टभक्तिः | - | दृष्टभक्तिः सन् |
| नृत्तारम्भे | - | नृत्तस्य प्रारम्भे |
| पशुपतेः | - | शिवस्य |
| आर्द्रनागाजिनेच्छां | - | आर्द्रनागाजिनधारणकामनां |
| हर | - | सम्पादय। |

**सारः** –हे मेघ, सन्ध्याबल्यनन्तरं शिवस्य ताण्डवनृत्यारम्भे सायन्तनमरुणं तेजः धारयन् त्वं शिवस्य भुजतरुवनं मण्डलाकारेण अभिव्याप्य भगवतः आर्द्रनागाजिनधारणकामनां सम्पादय ।तदा भगवती पार्वती तव भक्तिं सान्तेन निश्चलेन च चक्षुषा अवलोकयिष्यन्ति ।

**क्रिया** – हर । हृञ् हरणे - पर-लोट्-म.पु-ए.व ।

हर, हरतात् -हरतम्-हरत ।

सन्ध्यायां भवं सान्ध्यम् ।

**पर्यायपदानि** – तेजः । शुक्रं, तेजः, रेतः, बीजं, वीर्यम् ।

**2.4.14** प्रकृतम् – उज्जयिन्यां रमणवसतिं गच्छतां कामिनीनां मार्गं विद्युत्प्रकाशेन प्रदर्शय।

**गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं**
**रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।**
**सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं**
**तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ।।४१।।**

**पदच्छेदः** - सूचिभेद्यैस्तमोभिः- सूचिभेद्यैः + तमोभिः। दर्शयोर्वी - दर्शय + उर्वी। तोयोत्सर्गस्तनितमुखरो मा- तोयोत्सर्गस्तनितमुखरः + मा । भूर्विक्लवास्ताः - भूः + विक्लवाः + ताः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तत्र नक्तं रमणवसतिं | उज्जयिन्यां रात्रौ प्रियभवनं प्रति |
| गच्छन्तीनां योषितां नरपतिपथे | व्रजन्तीनां स्त्रीणां राजमार्गे |
| कनकनिकषस्निग्धया | सुवर्णपरीक्षापाषाणवत् मनोज्ञया |
| सौदामन्या उर्वीं दर्शय | विद्युता भूमार्गं प्रदर्शय |
| तोयोत्सर्गस्तनितमुखरः | वृष्टिगर्जिताभ्यां शब्दायमानः |
| मा स्म भूः | मा भव |
| ताः विक्लवाः(भवेयुः) | ताः स्त्रियः भयचकिताः भवेयुः। |

**सारः**- हे मेघ, तत्र उज्जयिन्याम् रात्रौ रमणवसतिं व्रजन्तीनां कामिनीनां राजमार्गे निबिडान्धकारेणाभिव्याप्तेः विद्युत्प्रकाशेन ताभ्यो मार्गं प्रदर्शय। वृष्टिना गर्जनैः च ताः न भीषयेः। ताः भयचकिताः भवेयुः । (रमणवसतिं गच्छन्तीनां योषितां कृते सौदामिन्या मार्गदर्शनाय यक्षः मेघं निर्दिशति।)

**क्रिये** – दर्शय, मा भूः।

मा भूः। माङ् योगे लुङ्। भू सत्तायां पर-लुङ्-म.पु-ए.व अभूः अडागमाभावे भूः।

**व्याकरणकार्यम्** – मा स्म भूः इत्यत्र माङ् योगे 'माङि लुङ्' इति लुङ् लकारः। 'न माङ् योगे' इत्यडागमनिषेधः।

तोयोत्सर्गस्तनितमुखरः - तोयोत्सर्गेण यत् स्तनितं तत् तोयोत्सर्गस्तनितं, तेन मुखरः तोयोत्सर्गस्तनितमुखरः।

**पर्यायपदानि** – सौदामनी। 'तडित् सौदामनी विद्युत्-चञ्चला चापला'।

**2.4.15** प्रकृतम् – उज्जयिन्यां एकां रात्रिं नीत्वा प्रभाते यात्रां कुरुताम्।

**तां कस्यांचिद्भवनवलभौ सुप्तपारावतायाम्**
**नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः।**
**दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं**
**मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ।।४२।।**

**पदच्छेदः** - कस्यांचिद्भवनवलभौ - कस्यांचित् +भवनवलभौ।

पुनरपि – पुनः + अपि। वाहयेदध्वशेषं- वाहयेत् + अध्वशेषं।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| चिरविलसनात् | - | चिरकालं विलासकारणात् |
| खिन्नविद्युत्कलत्रः भवान् | - | शान्तविद्युत्कलत्रः त्वं |
| सुप्तपारावतायां | - | सुप्तगृहकपोतयुक्तायां (विविक्तायां) |
| कस्यांचित् भवनवलभौ | - | एकस्यां गृहाट्टालिकायां |
| तां रात्रिं नीत्वा | - | तां निशां यापयित्वा |
| सूर्ये दृष्टे पुनरपि | - | सूर्ये उदिते सति मुहुरपि |
| अध्वशेषं वाहयेत् | - | मार्गस्य शेषं प्राप्नुयात् |
| सुहृदाम् अभ्युपेतार्थकृत्याः | - | मित्राणाम् अभ्युदयकृत्याः |
| न मन्दायन्ते खलु | - | न मन्दाः भवन्ति हि। (न विलम्बन्ते इत्यर्थः) |

SGOU

**सारः** – हे मेघ, उज्जयिन्यां कस्याञ्चित् भवनवलभौ चिरविलसनात् शान्तविद्युत्कलत्रः भवान् तां रात्रिं यापयित्वा पुनः प्रभाते सूर्योदये सति समुत्थाय सुहृदः कार्याय यात्रां कुरु। सुहृदां प्रयोजने कार्ये कालविलम्बः न कार्यः।

**क्रिये** – वाहयेत्, मन्दायन्ते।

विद्युदेव कलत्रं यस्य सः विद्युत्कलत्रः।

**पर्यायपदानि** – रात्रिः। शर्वरी, निशा, निशीथिनी, रात्रिः, त्रियामा।

**2.4.16** प्रकृतम् – सूर्यः भवन्तं प्रति असूयालुः भवेदिति सूचयति।

**तस्मिन् काले नयनसलिलं योषितां खण्डितानां**
**शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।**
**प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः**
**प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ।।४३।।**

**पदच्छेदः** - प्रणयिभिरतो वर्त्म – प्रणयिभिः+अतः+ वर्त्म। भानोस्त्यजाशु- भानोः + त्यज + आशु। स्यादनल्पाभ्यसूयः – स्यात् + अनल्पाभ्यसूयः। प्रत्यावृत्तस्त्वयि -प्रत्यावृत्तः + त्वयि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तस्मिन् काले प्रणयिभिः | - | पूर्वोक्ते सूर्योदयकाले प्रियतमैः |
| खण्डितानां योषितां | - | अनागतप्रियसन्तप्तानां स्त्रीणां |
| नयनसलिलं शान्तिं नेयम् | - | आशु शान्तिं प्रापयितव्यम् |
| अतः भानोः वर्त्म | - | अतः हेतोः सूर्यस्य मार्गं |
| आशु त्यज | - | शीघ्रम् उपेक्षय (तस्य आवश्यकः मा भूत्) |
| सः अपि नलिन्याः | - | सोऽपि भानुः पद्मिन्या (स्वकान्तायाः) |
| कमलवदनात् प्रालेयास्रं | - | पद्मरूपाननात् हिममेवाश्रुः |
| हर्तुं प्रत्यावृत्तः त्वयि कररुधि | - | दुरीकर्तुं प्रत्यागतः मेघे हस्तरोधिनि |

अनल्पाभ्यसूयः स्यात् - अधिकेर्ष्यः स्यात्।

**सारः** – हे मेघ, उज्जयिन्यां प्रातः काले खण्डितानां नायिकानां नेत्राम्बु प्रियतमैः शान्तिं प्रापयितव्यमिति हेतोः त्वं सूर्यमार्गम् शीघ्रं त्यज। हि सः सूर्यः कमलिन्याः कमलरूपाद्वदनात् प्रालेयरूपमश्रु शमयितुं प्रत्यागमे कररोधिनि त्वयि अधिकेर्ष्यः स्यात्।

(उज्जयिन्यां प्रातः काले खण्डितानां नायिकानां अश्रूणि प्रियतमैः शान्तिं प्रापयितव्यमिति हेतोः मेघः सूर्यमार्गं त्यक्तुं यक्षः निर्दिशति। हि सूर्यः कमलिन्याः कमलरूपाद्वदनात् प्रालेयरूपमश्रूणि समार्जयितुं प्रत्यागते कररोधिनि मेघे अधिकेर्ष्यः स्यात्।)

**क्रिये** – त्यज, स्यात्।

त्यज - ओहाक् त्यागे – पर-लोट्-म.पु-ए.व।

त्यज, त्यजतात् - त्यजतं - त्यजत।

करान् रुणद्धीति कररुत् तस्मिन् कररुधि।

**उज्जयिनी**

कालिदासस्य जन्मस्थलम् उज्जयिनी इति केचन पण्डिताः। हि कविः अत्यधिकेन तात्पर्येण प्रेम्णा साहित्यगरिम्णा वाचा उज्जयिनीं वर्णयति मेघदूते। दशार्णेषु विख्याता भवति विदिशा नाम राजधानी। तां प्रधाननगरीं मेघः प्राप्स्यति चेत् कामुकत्वस्य अविकलं फलम् लप्स्यते। विदिशायाः समीपे नीचगिरिः वर्तते। तत्र मेघसंपर्कात् प्रबुद्धकुसुमाः नीपवृक्षाः सन्ति। ते वृक्षाः संज्ञापुलकाः इव स्थिताः। तत्र कतिपयानि शिल्पभवनानि सन्ति। तानि नगरवासिनाम् उद्दामानि यौवनानि द्योतयन्ति। तत्रत्येषु उद्यानेषु कुसुमचयनार्थिनीनां चयनश्रमखिन्नाः सुन्दर्यः स्त्रियः सन्ति। ताः चञ्चलकटाक्षैः त्वामवलोकयन्ति। उज्जयिन्याः काचन नदी भवति निर्विन्ध्या। सा अनुरागवती रमणीव वर्तते। तव विश्लेषेण कृशाङ्गी स्वल्पतरजला कृशतनुः समजायत। नदीतीरस्थपादपजीर्णैः पर्णैः पाण्डुच्छाया भूत्वा ते सौभाग्यं प्रकाशयति। तत्र वृष्टिं कृत्वा तस्याः कार्श्यं दूरीकुरु। उदयनकथाप्रसारिता उज्जयिनी स्वर्गिणां भूमिं गतानां शेषैः पुण्यैः स्वर्गस्य सारभूतं खण्डं भवति।

अतिसम्पन्ना भवति उज्जयिनी। तत्र विपणिषु क्रयविक्रयाय हार-मरतकमणि-प्रवालादीनि सन्तीत्यतः समुद्रः केवलं तोयमात्रावशेषः इति जनाः मन्यन्ते। उदयनकथा -वासवदत्ता-हरणं-प्रद्योतस्य तालद्रुमवनं-नलगिरिगजस्य स्तम्भनाशनं इत्यादीनि कार्याणि ग्रामवृद्धाः आगन्तुकान् अतिथीन् उक्त्वा तान् विनोदयन्ति । हे मेघ, त्वम् उज्जयिन्यां गवाक्षमार्गनिर्यातैः महिलाकेशवासनार्थैः गन्धधूपैः परिपुष्टः भविष्यसि । पुष्पैः सुगन्धिषु धवलहर्म्येषु विश्रामयितुमवसरः लभेत । अपि च परिपावनं श्रीमहाकालमन्दिरं तत्रास्ति। तस्मिन् देवालये वर्तमानाः शिवगणाः सादरं त्वामालोकयिष्यन्ति । अपि च जलक्रीडातत्पराणां युवतिजनस्नानीयचन्दनादिना सुरभिलं तथा च पद्मरागगन्धवद्भिः गन्धवत्याः नद्याः वायुभिः च निर्भरं भवति । चण्डीश्वरपूजासमये सायं गणिकाः सविलासं पादन्यासैः शब्दायमानरशनाः भूत्वा नर्तिष्यन्ते।

## पुनरावृत्तिः (Recap)

- स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।
- शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्।
- संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः।
- विशालायां सूर्याश्वसदृशाः अश्वाः,उन्नताः गजेन्द्राः,वीराः सैनिकाः च सन्ति।
- उज्जयिन्यां भगवतः परमेश्वरस्य देवालयं त्वया द्रष्टुं शक्यते।
- आमोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्।
- शान्तोद्वेगस्थितिमितनयनं दृष्टभक्तिर्भवान्या।
- उज्जयिन्यामेकाम् रात्रिं नीत्वा प्रभाते यात्रा क्रियताम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. "स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु" इयं कया नद्या सम्बद्धा?
2. अलकागमनमध्ये कुत्रावश्यं गन्तव्यमिति यक्षः मेघं निर्दिशति ?
3. कः प्रियतम इव प्रार्थनाचाटुकारः भवति ?

4. "शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः" अनेन पद्यांश्शे सम्बन्धा नगरी का ?
5. "शान्तोद्वेगस्थिमितनयनं दृष्टभक्तिर्भवान्या" अनेन वाक्यांशेन कस्य नृत्यं संकेतितम् ?
6. "अप्यन्यस्मिन्जलधर, महाकालमासाद्य काले" इदं केन नगरेण सम्बन्धः ?
7. "मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः" अत्र " सुहृत्" शब्देन कं कमुद्दिशति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. मेघदूते कस्याः नद्याः पवनं "प्रार्थनाचाटुकारः प्रियतमाः" इति कथ्यते ?
2. 'कुसुमसुरभिष्वध्वखेदं नयेथाः'- कुत्रस्थाः ?
3. कासां कृते सौदामिन्याः मार्गदर्शनाय मेघं निर्दिशति ?
4. 'पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः' इति श्लोकस्य अन्वयं लिखत।
5. 'प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः'। कुतः ?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. निर्विन्ध्या।
2. उज्जयिनी।
3. विदिशायाः सौन्दर्यं मेघदूते कथं वर्णितम्?
4. कालिदासस्य उज्जयिन्याः विषये कः भावः दृश्यते?
5. नदी निर्विन्ध्या कथं चित्रिता अस्ति? सा मेघं प्रति कं भावं प्रकटयति?

## निर्दिष्टाभ्यासः (Assignments)

1. रघूवंशस्य प्रथमसर्गे नवविंशतिः श्लोकादारभ्य त्रिचत्वारिंशत् श्लोकपर्यन्तं कथासारं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. निर्बिन्ध्यायाः।
2. अलकागमनमध्ये उज्जयिन्यां अवश्यं गन्तव्यमिति यक्षः मेघं निर्दिशति।
3. शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः भवति।
4. उज्जयिनी।
5. शिवस्य।
6. उज्जयिनी-नगरेण।
7. यक्षम्।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्रीकेदारनाथ् शर्मा,चौखम्बा सान्स्क्रीट् सन्तान्, वारणासी, २०१६ पुटानि ८-६०
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वारणासी।
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

BLOCK-3

# मार्गवर्णना - 2

SGOU

# Unit - 1
# गम्भीरा - देवगिरिः

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य प्रतिभां जानाति।
- प्रकृत्या सह मानवस्य सजीवसान्निध्यं मेघदूते कथं वर्तते इति प्रत्यभिजानाति।
- मेघस्य यात्रावर्णनया प्रकृतिशोभाम् आस्वदते।
- यतितालयानुसारं कविताम् आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्ये कालिदासस्य स्थानं सर्वातिशायित्वेन वर्तते। कालिदासस्य जन्मस्थलत्वेन केचन विद्वांसः उज्जयिनीं मन्यन्ते। मेघदूते 'वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तरास्याम्' इत्यस्मिन् श्लोके सर्वातिशायित्वेन उज्जयिनीं कविः परामृशति। उज्जयिन्यां मेघः रात्रौ उषित्वा तस्याः नगर्याः महत्त्वं च वीक्ष्य पुनरपि गन्तुं यक्षः मेघं प्रार्थयते। एवं गम्भीरां नाम नदीं अतिक्रम्य देवगिरिः प्राप्तव्यः। मार्गे चर्मण्वती नदी वर्तते। तदनु कुरुक्षेत्रं ततः कनखलम् अन्ते अलका च प्राप्य। अस्मिन् भागे गम्भीरा-देवगिरी-इत्यादीनां नदीनां पर्वतानां च प्रकृतिवर्णना पठनाय वर्तते।

## मुख्यपदानि (Keywords)

गम्भीरायाः पयसि लप्स्यते ते प्रवेशम् - ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः - देवपूर्वं गिरिं जिगमिषोः - ते नियतवसतिं स्कन्दं पुष्पासारैः स्नपयतु - अद्रिग्रहणगुरुभिर्गर्जितैः नर्तयेथाः।

## Discussion

**3.1.1** प्रकृतम् – गम्भीरा नदी उदात्तनायिकेव मेघच्छायां स्वीकरिष्यति।

**गभीरायाः पयसि सरितश्चेतसीव प्रसन्ने**
**छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।**
**तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-**
**न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ।।४४।।**

**पदच्छेदः** - सरितश्चेतसीव - सरितः + चेतसि + इव। छायात्मापि- छायात्मा +अपि। प्रकृतिसुभगो लप्स्यते- प्रकृतिसुभगः + लप्स्यते। तस्मादस्याः- तस्मात्+अस्याः।

कुमुदविशदान्यर्हसि - कुमुदविशदानि +अर्हसि।

धैर्यान्मोघीकर्तुं - धैर्यात् + मोघीकर्तुं।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| गम्भीरायाः प्रसन्ने | - | गम्भीरा नाम सरितः दोषरहिते(निर्मले) |
| चेतसि इव पयसि | - | चित्ते इव जले |
| प्रकृतिसुभगः ते छायात्मा | - | प्रकृत्या सुन्दरः तव प्रतिबिम्बशरीरं |
| प्रवेशं लप्स्यते | - | प्रवेशं प्राप्स्यति |
| तस्मात् अस्याः कुसुमविशदानि- | | तस्मात्कारणात् अस्याः नद्याः पुष्पधवलानि |
| चटुलशफरोद्वर्तनप्रेक्षितानि | - | चञ्चलशफरमीनोल्लुण्ठनावलोकनानि |
| धैर्यात् मोघीकर्तुं | - | धष्ट्यात् विफलीकर्तुं |
| त्वं न अर्हसि | - | त्वं नार्हः भवसि |

**सारः** – भो मेघ,गम्भीरा नद्याः निर्मले चित्ते इव पयसि तव प्रतिबिम्बशरीरं प्रविशेत्। तत्कारणात् नद्याः कुसुमधवलानि चञ्चलशफरीमत्स्यानामुद्वर्तनविलोकनानि त्वं न विफलीकुरु। अर्थात् त्वं उदात्तनायिकायाः तस्याः प्रेक्षितानि विफलानि न कुरु।

(गम्भीरायाः पयः प्रसन्नं चेत इव निर्मलं भवति।)

**क्रिये** – लप्स्यते,अर्हसि।

लप्स्यते-टुलभष् लाभे-आत्म-लृट्-प्र.पु-ए.व

लप्स्यते-लप्स्येते-लप्स्यन्ते।

**अलङ्कारः** - समासोक्तिः। 'समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्' इति लक्षणम्।

**पर्यायपदानि** – सरित्। नदी, सरित्, तरङ्गिणी, शैवलिनी, तटिनी।

**3.1.2** प्रकृतम्- गम्भीरायाः पयःपानेन रसानुभूतः मेघः सन्देशं नेतुं कालविलम्बं करिष्यति।

**तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं**
**नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।**
**प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि**
**ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ।।४५।।**

**पदच्छेदः** – ज्ञातास्वादो विपुलजघनां – ज्ञातास्वादः + विपुलजघनां। को विहातुम् - कः + विहातुम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सखे,प्राप्तवानीरशाखं | - | अयि मित्र,वेतसशाखासक्त्या |
| किंचित् करधृतमिव | - | ईषत् हस्तावलम्बितमिव |
| मुक्तशोधनितम्बं नीलं | - | त्यक्ततीररूपनितम्बं कृष्णवर्णं |
| तस्याः सलिलवसनं नीत्वा | - | गम्भीरायाः सलिलमेव वस्त्रम् अपनीय |
| लम्बमानस्य | - | तस्यां सानुरक्तिरसं पातुं उदुक्तमानस्य |
| ते प्रस्थानं कथमपि भावि | - | तव प्रयाणं कृच्छ्रेण भाविकाले भवेत् |
| ज्ञातास्वादः कः विपुलजघनां | - | अनुभूतरसः कः पुरुषः पीनजङ्घां |
| विहातुम् समर्थः | - | त्यक्तुं समर्थः स्यात् ?(न कोऽपि) |

**सारः** – हे मित्र,गम्भीरायाः वेतसशाखासक्त्या किञ्चित् हस्तावलम्बितमिव त्यक्ततीररूपनितम्बं कृष्णवर्णं सलिलरूपम् वस्त्रमपनीय तस्यां सानुरक्तिरसं पातुं लम्बमानस्य तव गमनं मन्दगत्या भवेत्। हि ज्ञातास्वादः कः पुरुषः विपुलजङ्घाम् (प्रकटीकृतजघनां वा ) स्त्रीयं कः त्यक्तुं समर्थः स्यात् ?

**अलङ्कारः -** अर्थान्तरन्यासः। 'उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः' इति लक्षणम्।

प्राप्ता वानीरशाखा येन तत् प्राप्तवानीरशाखम्।

**पर्यायपदानि** - वानीरः। वेतसः, रथः, अभ्रपुष्पं, शीतः, वानीरः।

3.1.3 प्रकृतम् देवगिरिं प्राप्तं मेघं शीतलो मन्दः पवनः वीजयिष्यति।

**त्वन्निष्यन्तोच्छ्वसितवसुधागन्धसंपर्करम्यः**
**स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।**
**नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते**
**शीतो वायुः परिणमयिता काननोदुम्बराणाम् ।।४६।।**

**पदच्छेदः** – नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं – नीचैः +वास्यति + उपजिगमिषोः + देवपूर्वं।

शीतो वायुः-शीतः +वायुः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| त्वन्निष्यन्तोच्छ्वसितवसुधागन्धसंपर्करम्यः- | | तव वृष्ट्या उपबृंहितायाः भूमेः गन्धसम्पर्केण सुरभिः |
| स्रोतोरन्ध्रध्वनितसुभगं | - | नासाग्रकुहरेषु ध्वनितशब्देन सुभगं |
| दन्तिभिः पीयमानः। | - | गजैः आघ्रायमाणः |
| काननोदुम्बराणां परिणमयिता | - | वनेषु जन्तुफलानां परिपाकयिता (उदुम्बरफलानि नर्मीकुर्वन्) |
| शीतो वायुः देवपूर्वं गिरिं | - | शीतलः पवनः देवगिरिं |
| उपजितगमिषो ते नीचैः | - | उपगन्तुमिच्छोः तव शनैः |
| वास्यति | - | बीजयिष्यति। |

**सारः** – हे मेघ, देवगिरिमुपगन्तुं इच्छुं त्वां शीतलः पावनः बीजयिष्यति। अयं पवनः तव वृष्ट्या उपबृंहितायाः गन्धेन युक्तः तथा शुण्डारन्ध्रसुभगम् आघ्रायमाणः(पीयमानः) उदुम्बर फलानि परिपाकं कुर्वन् शीतलः भवति।

**क्रिया** – वास्यति। वा-गतौ गन्धने च – पर-लृट्-प्र.पु-ए.व।

वास्यति-वास्यतः-वास्यन्ति।

त्वन्निष्पन्देन उच्छ्वसितायाः वसुधायाः गन्धस्य सम्पर्केण रम्यः

त्वन्निष्पन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः।

**पर्यायपदानि** – वायुः। श्वसनः, स्पर्शनः, वायुः, मातरिश्वा, सदागतिः।

**3.1.4** प्रकृतम् – मेघः कार्तिकेयं पुष्पधारासम्पातैः अभिषेक्तुं निर्दिशति।

**तत्र स्कन्दं नियतवसतिं पुष्पमेधीकृतात्मा**

**पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः।**

**रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-**

**मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः।।४७।।**

**पदच्छेदः** - रक्षाहेतोर्नवशशिभृता – रक्षाहेतोः + नवशशिभृता। तद्धि - तत्+हि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तत्र नियतवसतिं स्कन्दं | - | देवगिरौ नित्यसन्निहितं कुमारं स्वामिनं |
| पुष्पमेधीकृतात्मा | - | कामरूपत्वात् पुष्पवर्षकमेधीकृतविग्रहः |
| व्योमगङ्गाजलार्द्रैः पुष्पासारैः | - | आकाशगङ्गाजलार्द्रैः पुष्पसम्पातैः |
| भवान् स्नपयतु | - | स्वयमेव अभिषिञ्चतु |
| तत् वासवीनां चमूनां | - | भगवान् स्कन्दः ऐन्द्रीणां सेनानां |
| रक्षाहेतोः नवराशिभृता | - | रक्षायाः कारणेन भगवता शिवेन |
| हुतवहमुखे संभृतं | - | वह्निमुखे सञ्चितं |
| अत्यादित्यं तेजः हि | - | आदित्यमतिक्रान्तं तेजः एव भवति। (साक्षाद्भगवतो तेजः हरस्येव मूर्त्यन्तरम् ) |

**सारः** - देवगिरौ नित्यसन्निहितं कार्तिकेयं कामरूपत्वात् पुष्पवर्षुकमेधीकृतविग्रहः मेघः आकाशगङ्गा-जलार्द्रैः पुष्पसम्पतैः अभिषिञ्चतु। सुरप्रार्थनवशात् स्कन्दः देवसेनानां रक्षायै अत्रैव वसति।

**क्रिया** – स्नपयतु। ष्णा (स्ना) शौचे-णिचि-पर-लोट्-प्र.पु-ए.व।

स्नपयतु – स्नपयतात्, स्नपयतां – स्नपयन्तु ।

**अलङ्कारः** - उदात्तः । पुरावृत्तपरामर्शात् ।

नियता वसतिः यस्य सः नियतवसतिः, तं नियतवसतिम् ।

**पर्यायपदानि** – स्कन्दः । कार्तिकेयः,महासेनः,शरजन्मा,षडाननः ।

3.1.5 प्रकृतम् – कार्तिकेयस्य वाहनं मयूरं त्वं गर्जनैः नर्तयेथाः ।

**ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी**
**पुत्रप्रेम्णा कुवलयदलक्षेपि कर्णे करोति ।**
**धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं**
**पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ।।४२ ।।**

**पदच्छेदः** – पावकेस्तम् – पावकेः + तम् ।

पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः - पश्चात् + अद्रिग्रहणगुरुभिः + गर्जितैः + नर्तयेथाः ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| ज्योतिर्लेखावलयि गलितं | - | चन्द्रिकावलययुक्तं भ्रष्टं |
| यस्य बर्हं भवानी | - | मयूरस्य पिञ्छं पार्वती |
| पुत्रप्रेम्णा कुवलयदलक्षेपि | - | पुत्रस्नेहेन कुवलयदलस्य शोभायुक्तम् |
| कर्णे करोति | - | दलेन सह बर्हं कर्णेऽलंकरोति |
| हरशशिरुचा धौतापाङ्गं | - | हरशिरश्चन्द्रिकया अधिकधवलितम् नेत्रान्तम् |
| पावकस्तं पश्चात् | - | स्कन्दस्य मयूरं पुनः(पुष्पसेचनानन्तरं) |
| अद्रिग्रहणगुरुभिः | - | देवगिरेः गुहासम्पर्केण प्रतिध्वनमहद्भिः |
| गर्जितैः नर्तयेथाः | - | गर्जनैः नृत्यं कारय । |

**सारः** - देवगिरौ कार्तिकेयस्य वाहनतया वर्तमानं तं गुहामध्यप्रतिध्वनिदीर्घैः गर्जनैः नृत्यं कारय । तस्य मयूरस्य बर्हं पुत्रवात्सल्येन प्रीतिपूर्वकं पार्वती कर्णे स्थापयति ।

(पार्वती मयूरात् गलितं बर्हं पुत्रप्रेम्णा कर्णे धरति ।)

**क्रिये** – करोति, नर्तयेथाः।

करोति-कुरुतः-कुर्वन्ति।

पावकस्य (अग्नेः) अपत्यं पुमान् पावकिः (स्कन्दः), तस्य पावकेः।

**पर्यायपदानि** - उमा, कात्यायनी, गौरी, काली, हैमवती।

कान्ताविप्रयुक्तः यक्षः मेघं दृष्ट्वा प्रियायै सन्देशमेकं नेतुं प्रार्थितवान्। रामगिरितः अलकापर्यन्तं वर्तमानं मार्गं स सूचयति। गमनमध्ये नद्यः पर्वताः पुण्यस्थलानि च सन्ति। गम्भीरायाः प्रसन्ने सरसि तव प्रतिबिम्बशरीरं प्राविशेत्। गम्भीरा काचन उदात्तनायिका इव भवति। तस्याः पयः पानेन सुरतसुखानुभूतिं अनुभोक्तुं शक्यते। तस्याः सलिलवसनं नीत्वा लम्बमानस्य तव यात्रा विलम्बेन भवेदिति शङ्का वर्तते। तस्य कारणं महाकवि कालिदासः सूचयति।

## पुनरावृत्तिः (Recap)

- हे मेघ, उदात्ता नायिका इव गम्भीरा नदी भवतः छायां स्वीकरिष्यति।
- गम्भीरायाः नद्याः कुसुमधवलानां चञ्चलशफरीमत्स्यानां उद्वर्तनविलोकनानि सफली क्रियताम्।
- गम्भीरायाः पयःपानेन रसानुभूतिमनुभव।
- भगवन्तं कार्तिकेयं पुष्पधारासम्पातैः अभिषिञ्चतु भवान्।
- कार्तिकेयस्य वाहनं मयूरं त्वं गर्जनैः नर्तयेथाः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. "ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः" अनेन पद्यांशेन कस्याः संकेतः प्रदर्शितः मेघदूते ?
2. भगवतः स्कन्दस्य वसतिः कुत्र अस्ति ?
3. का गलितं बर्हं कर्णे करोति ?
4. कार्तिकेयस्य वाहनं किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. गम्भीरायाः पयः कीदृशं भवति ?
2. "तत्र स्कन्दं नियतवसतिं पुष्पमेधीकृतात्मा" आशयं विशदयत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. गम्भीरा।
2. देवगिरिः।
3. गम्भीरा सरः कस्य इव दृश्यते?
4. यक्षः कस्मात् स्थलात् कुत्र पर्यन्तं मार्गं सूचयति?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. गम्भीरायाः नद्याः।
2. देवगिरौ।
3. पार्वती मयूरात् गलितं बर्हं पुत्रप्रेम्णा कर्णे धरति।
4. मयूरः।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्,व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी,वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 2
# चर्मण्वती

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य प्रतिभां जानाति।
- प्रकृत्या सह मानवस्य सजीवसान्निध्यं मेघदूते कथं वर्तते इति प्रत्यभिजानाति।
- मेघस्य यात्रावर्णनायां प्रकृतिशोभाम् आस्वदते।
- यतितालनयानुसारं कवितामु आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

यक्षः मेघं प्रति सन्देशं प्रेषयितुकामः सन् अलकापर्यन्तं मार्गं निर्दिशति। मार्गमध्ये चर्मण्वतीनदीं वर्णयति। चर्मण्वती नद्याः प्रकृतिवर्णना पठनाय वर्तते। तत्र प्रविशामः।

## मुख्यपदानि (Keywords)

चर्मण्वती - स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिं - शरवणभवं देवं - दशपुरनगरनिवासिनीनां मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्।

## Discussion

**3.2.1 प्रकृतम्** – चर्मण्वतीनदीं गन्तुं मेघः यक्षं निर्दिशति।

**आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा**

**सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।**

**व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्**

**स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ।।४३।।**

**पदच्छेदः** आराध्यैनं - आराध्य + एनं। सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः - सिद्धद्वन्द्वैः + जलकणभयात् + वीणिभिः + मुक्तमार्गः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| एनं शरवणभवं देवं | - | पूर्वोक्तं शरवणजन्मानं स्कन्दं |
| आराध्य वीणिभिः सिद्धद्वन्द्वैः | - | उपास्य वीणावद्भिः सिद्धमिथुनैः (भगवन्तं स्कन्दं उपवीणायितुमागतैः) |
| जलकणभयात् | - | जलकणभया (वीणाक्वणनप्रतिबन्धकत्वात्) |
| मुक्तमार्गः (सन्)उल्लङ्घिताध्वा | - | त्यक्तवर्त्मा विक्रान्तमार्गः |
| सुरभितनयालम्भजां | - | सुरभितनयानां गणानां संज्ञपनेन ज्ञातां |
| भुवि स्रोतोमूर्त्या परिणतां | - | लोकं प्रवाहरूपेण लोकाविशेषमापन्नां |
| शान्तिदेवस्य कीर्तिं | - | दशापुरपतेः मयूरजस्य यशः(चर्मण्वतीं नदीं) |
| मानयिष्यन् व्यालम्बेथाः | - | सत्कारयिष्यन् अवतरेः\| |

**सारः –** हे मेघ, देवं कार्तिकेयं समाराध्य तत्र तत्सेवार्थं आगतैः उपस्थितैः वीणावद्भिः सिद्धजातीयमिथुनैः जलकणपतनभयात् वीणाक्वणनावरोधत्रस्तैः किञ्चिन्मार्गं अतिक्रम्य गवालम्भस्म्भवां रन्तिदेवस्य मूर्तिमतीं चर्मण्वतीं नदीं अवतर।

**क्रिया** - आलम्बेथाः

आलम्बेथाः- आङ्+लम्प्-आत्म-लङ्-म.पु-ए.व।

आलम्बेथाः- आलम्बेथाम्- आलम्बध्वम्।

शराणां वनं शरवणम्।

**पर्यायपदानि** – तनयः। आत्मजः, सूनुः, सुतः, पुत्रः।

**3.2.2** प्रकृतम् - चर्मण्वत्याः प्रवाहं त्वत्सम्पर्केण इन्द्रनीलमणिगुम्भितं भुवः मुक्ताहारमिव प्रतिभाति।

**त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचोरे**

**तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।**

**प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-**

**रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥ ५०।।**

**पदच्छेदः** - त्वय्यादातुं – त्वयि + आदातुं। शार्ङ्गिणो वर्णचोरे – शार्ङ्गिणः + वर्णचोरे। गगनगतयो नूनम् - गगनगतयः + नूनम्। दृष्टीरेकं - दृष्टीः + एकम्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| शार्ङ्गिणः वर्णचोरे त्वयि | - | कृष्णस्य दीप्तिमति भवति |
| जलमादातुम् अवनते (सति) | - | तोयं समादातुं लम्बमाने सति |
| पृथुमपि दूरभावात् तनुं | - | पृथुलमपि दूरत्वात् शरीरं(सूक्ष्मतया प्रतीयमानम्) |
| तस्याः सिन्धोः प्रवाहम् | - | तस्याः चर्मण्वत्याः प्रवाहं |
| गगनगतयः नूनं दृष्टीः | - | खेचराः सिद्धगन्धर्वाः निश्चयं नयनानि |
| आवर्ज्य | - | नमयित्वा |
| स्थूलमध्येन्द्रनीलं भुजः | - | इन्द्रनीलमणिगुम्भितं भूमेः |
| एकं मुक्तागुणमिव | - | कांचित् मौक्तिकस्रजम् इव |
| प्रेक्षिष्यन्ते | - | अवलोकयिष्यन्ति |

**सारः-** हे मेघ, श्रीकृष्णस्य वर्णतुल्ये त्वयि जलग्रहणाय लम्बमाने सति खेचराः सिद्धादयः पृथुलमपि दूरभावात् सूक्ष्मतया प्रतीयमानं तस्याः चर्मण्वत्याः प्रवाहं तव सम्पर्केण इन्द्रनीलमध्यमणिगुम्भितं भुवो मुक्ताहारमिव अवलोकयिष्यन्ति।

**क्रिया** – प्रेक्षिष्यन्ते। प्र + इक्ष् दर्शने - आत्म-लृट्-प्र.पु-ब.व।

प्रेक्षिष्यते - प्रेक्षिष्येते - प्रेक्षिष्यन्ते।

गगने गतिः येषां ते गगनगतयः।

**पर्यायपदानि** – गगनम् – द्यौ,अभ्रं,व्योम,पुष्करं,अम्बरं,आकाशम्।

**अलङ्कारः** - उत्प्रेक्षा। अत्यन्तनीलमेघसङ्गस्य प्रवाहस्य।

भूकण्ठमुक्तागुणत्वेन उत्प्रेक्षमाणत्वात्।

**3.2.3 प्रकृतम्** - चर्मण्वतीमतिक्रम्य दशपुरनगरनिवासिनीनां कौतूहलं वर्धयन् गन्तुं यक्षः मेघं निर्दिशति।

**तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां**

**पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणम्।**

**कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं**

**पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम्॥ ५१ ।।**

**पदच्छेदः** – पक्ष्मोत्क्षेपादुपरिविलसत् – पक्ष्मोत्क्षेपात् + उपरिविलसत्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| तामुत्तीर्य | - | चर्मण्वतीं तरणं कृत्वा |
| परिचितभ्रूलताविभ्रमाणं | - | परिचितानां भ्रूलताविलासानां |
| पक्ष्मोत्क्षेपात् | - | नेत्रलोमानाम् उन्नमनहेतोः |
| उपरिविलसत् | - | उपरिविलसत् नीलशबलप्रभाणां |
| कुन्दक्षेपानुगमधुकरश्रीमुषां | - | कुन्दपुष्पाणाम् इतस्ततः चलनम् अनुगच्छतां भ्रमराणां शोभापहृतानां |
| दशपुरवधूनेत्रकौतूहलानाम् | - | रन्तिदेवस्य दशपुरनगरनिवासिनीनां नेत्राभिलाषाणां |
| आत्मबिम्बं पात्रीकुर्वन् व्रज | - | स्वमूर्तिं गोचरतां नयन् गच्छ। |

**सारः -** हे मेघ, चर्मण्वतीमुत्तीर्य गमनवेलायां त्वत्प्रेक्षणार्थं ऊर्ध्वमुखीनां नीलशबलप्रभाणां कुन्तपुष्पाणां इतस्ततः चलनमनुगच्छतां भ्रमराणां शोभापहृतानां दशापुरनगरनिवासिनीनां कामिनीनां कौतूहलं वर्धयन् गच्छ।

तां (चर्मण्वतीम्) उत्तीर्य परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपात् उपरिविलसत् कृष्णसारप्रभाणां कुन्तक्षेपानुगमधुकरश्रीमुषां दशपुरवधूनेत्रकौतूहलानां आत्मबिम्बं पात्रीकुर्वन् व्रज।

चर्मण्वतीमुत्तीर्य गमनवेलायां मेघदर्शनार्थं ऊर्ध्वमुखीनां दशपुरनगरनिवासिनीनां कामिनीनां कौतूहलं वर्धयन् गच्छतु इति यक्षः मेघं निर्दिशति।)

**क्रिया** – व्रज। व्रज् गतौ-पर-लोट्-म.पु-ए.व।

व्रज, व्रजतात् – व्रजतं -व्रजत।

भ्रुवो लताः इव भ्रूलताः, तासां विभ्रमाः भ्रूलताविभ्रमः, तेषां भ्रूलताविभ्रमाणाम्।

**पर्यायपदानि** – कुन्दं, कुन्दः वा

माध्यम् - शुक्लपक्षः, मकरन्दः, महामोदः, मनोहरः।

रन्तिदेवस्य कीर्तिः स्रोतोमूर्त्या भुवि चर्मण्वतीरूपेण परिणतिं प्राप। श्रीकृष्णवर्णतुल्यः त्वं चर्मण्वत्याः जलग्रहणाय लम्बमाने सति सिद्धादयः खेचराः वीक्षयिष्यन्ति। पृथुलमपि दूरभावात् सूक्ष्मतया प्रतीयमानं चर्मण्वत्याः प्रवाहं तव सम्पर्केण इन्द्रनीलमध्यमणिगुम्भितं भुवो मुक्ताहारमिव सिद्धाः अवलोकयिष्यन्ति।

## पुनरावृत्तिः (Recap)

- चर्मण्वतीनदीं गन्तुं मेघः यक्षं निर्दिशति।
- रन्तिदेवस्य कीर्तिरूपेण परिणतिं प्राप्तां चर्मण्वतीं गच्छ।
- चर्मण्वत्याः प्रवाहं त्वत्सम्पर्केण भुवः मुक्ताहारमिव प्रतिभाति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. शरवणभवः देवः कः ?
2. रन्तिदेवस्य कीर्तिः कया रीत्या भुवि परिणतिं प्रापः ?
3. मेघः का नदीं अतिक्रम्य गच्छति?
4. कं समाराध्य मेघः गतवान्?
5. रन्तिदेवस्य मूर्तिमती का नदी?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।
**(Answer the following questions in one or two sentences)**

1. चर्मण्वतीमुत्तीर्य सञ्चारणवेलायां किं कर्तुं यक्षः मेघं निर्दिशति ?
2. दशपुरनगरनिवासिनीनां कौतूहलं वर्धयन् गन्तुं यक्षः मेघं किं निर्दिशति ?
3. सिद्धजातीयैः सह मेघस्य सम्पर्केण चर्मण्वत्याः का शोभा प्रतिपाद्यते?

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. 'तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणाम्' इति श्लोकस्य आशयं लिखत ।

## निर्दिष्टाभ्यासः (Assignments)

1. चर्मण्वतीनदीं गन्तुं मेघः यक्षं किं निर्दिशति ? विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. स्कन्दः ।

2. रन्तिदेवस्य कीर्तिः स्रोतोरीत्या (चर्मण्वतीनदीरूपेण) भुवि परिणतिं प्राप।
3. चर्मण्वतीम्।
4. कार्तिकेय।
5. चर्मण्वती।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018


SGOU

# Unit - 3
# ब्रह्मावर्तम्

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य प्रतिभां जानाति।
- प्रकृत्या सह मानवस्य सजीवसान्निध्यं मेघदूते कथं वर्तते इति प्रत्यभिजानाति।
- मेघस्य यात्रावर्णनायां प्रकृतिशोभाम् आस्वदते।
- यतितालयानुसारं कविताम् आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

मेघस्य यात्रामध्ये ब्रह्मावर्तं नाम जनपदः वर्तते। अस्य देशस्य प्रकृतिवर्णना पठनाय वर्तते। तत्र प्रविशामः।

## मुख्यपदानि (Keywords)

ब्रह्मावर्तम् - कौरवं - क्षत्रप्रधनपिशुनं - गाण्डीवधन्वा।

## Discussion

**3.3.1** प्रकृतम् – ब्रह्मावर्तं जनपदं छायया प्रवेष्टुं यक्षः मेघं निर्दिशति।

**ब्रह्मावर्तं जनपदमथ छायया ग्राहमानः**
**क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।**
**राजन्यानां सितशरशतैर्यत्र गाण्डीवधन्वा**
**धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि॥ ५२॥**

**पदच्छेदः** – तद्भजेथाः – तत् + भजेथाः । सितशरशतैर्यत्र - सितशरशतैः + यत्र । धारापातैस्त्वं - धारापातैः + त्वं । कमलान्यभ्यवर्षन्मुखानि - कमलानि + अभ्यवर्षत् + मुखानि ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अथ ब्रह्मावर्तं जनपदं | - | अनन्तरं ब्रह्मावर्तं नाम देशं (देवनिर्मितं देशं ब्रह्मावर्तः इति विश्वासः) |
| छायया गाहमानः | - | अनातपमण्डलेन प्रविशन् |
| क्षत्रप्रधनपिशुनं | - | क्षत्रिययुद्धसूचकं(कुरुपाण्डवयुद्धसूचकम्) |
| तत् कौरवं भजेथाः | - | प्रसिद्धं कुरूणां सम्बन्धिम् आश्रय । |
| यत्र गाण्डीवधन्वा | - | कुरुक्षेत्रे अर्जुनः |
| सितशरशतैः राजन्यानां | - | निशितबाणसहस्रैः भूपानां |
| मुखानि धारापातैः कमलानि | - | आननानि उदाधाराणां पातैः पङ्कजानि |
| त्वमिव अभ्यवर्षत् | - | मेघमिव अभिमुखं वृष्टवान् । (शरवर्षेण शिरांसि चिच्छेद) |

**सारः** – हे मेघ, अनन्तरं त्वं छायारूपेण देवनिर्मितं ब्रह्मावर्तं नाम जनपदं प्रविश्य कुरुक्षेत्रं याहि । कुरुक्षेत्रं गाण्डीवधन्वा अर्जुनः निशितैः शरैः भूपानां शिरांसि चिच्छेद । यथा उदकधाराणां पातैः त्वमिव ।

मेघस्य यात्रामध्ये ब्रह्मावर्तं नाम जनपदः वर्तते । अयं देशः सरस्वतीदृषद्वत्योः मध्ये वर्तते । देवनिर्मितं देशं भवत्ययम् । कुरुक्षेत्रभूमेः समीपे भवत्ययं देशः । अनातपमण्डलेन तं देशं प्रवेष्टुं यक्षः मेघम् उपदिशति ।

**क्रिये** – भजेथाः, अभ्यवर्षत् ।

भजेथाः - भज सेवायाम्- आत्म-विधिलिङ्-म.पु-ए.व ।

भजेथाः भजेथाम्-भजेध्वम् ।

**अलङ्कारः** - उपमा ।

**व्याकरणकार्यम्** – गाण्डीवधन्वा इत्यत्र समासान्तस्थितस्य धनुश्शब्दस्य 'धन्वन्' इत्यादेशः स्यात्। तस्य प्रथमैकवचनरूपं भवति 'गाण्डीवधन्वा' इति।

कुरूणाम् इदं कौरवम्।

**पर्यायपदानि** – जनपदः। नीवृत्, जनादः, आनर्तः, देशः।

## पुनरावृत्तिः (Recap)

- त्वं छायारूपेण देवनिर्मितं ब्रह्मावर्तं जनपदं गच्छ।
- क्षत्रप्रधनपिशुनं क्षेत्रं कुरुक्षेत्रम्।
- ब्रह्मावर्तं देशं सरस्वतीदृषद्वत्योः मध्ये वर्तते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. क्षत्रप्रधनपिशुनं क्षेत्रं किम्?
2. गाण्डीवधन्वा कः?
3. ब्रह्मावर्तं नाम जनपदं कथं निर्मितम्?
4. ब्रह्मावर्तः कस्य मध्ये स्थितः?
5. मेघः केन रूपेण ब्रह्मावर्तं गच्छति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. "क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः"- आशयं लिखत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. 'ब्रह्मावर्तं जनपदम्' एकां खण्डिकां लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. "हे मेघ, अनन्तरं ब्रह्मावर्तं जनपदं प्रविश्य कुरुक्षेत्रं याहि..." इत्यत्र यक्षः मेघं कुत्र नेतुमिच्छति? ब्रह्मावर्तजनपदस्य विशेषता का? अर्जुनस्य कृत्यं कथं वर्णितम्?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. क्षत्रप्रधनपिशुनं क्षेत्रं कुरुक्षेत्रं (ब्रह्मावर्तं)भवति।
2. अर्जुनः।
3. छायारूपेण देवनिर्मितम्।
4. सरस्वत्याः-दृषद्वत्याः
5. छायारूपेण।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 4
# सरस्वती - जाह्नवी

## उद्देश्यानि (Learning Outcomes)

- कालिदासस्य प्रतिभां जानाति।
- प्रकृत्या सह मानवस्य सजीवसान्निध्यं मेघदूते कथं वर्तते इति प्रत्यभिजानाति।
- मेघस्य यात्रावर्णनायां प्रकृतिशोभाम् आस्वदते।
- यतिताललयानुसारं कविताम् आस्वदते।

## प्राग्व्यपेक्षाः (Prerequisites)

यक्षः मेघं प्रति सन्देशं प्रेषयितुकामः सन् अलकापर्यन्तं मार्गं निर्दिशति। मार्गमध्ये सरस्वती-जाह्नवी-इत्यादीनां नदीनां पर्वतानां च प्रकृतिवर्णना पठनाय वर्तते। तत्र प्रविशामः।

## मुख्यपदानि (Keywords)

सरस्वत्याः - बन्धुप्रीत्या समरविमुखः - लाङ्गली - कनखलं - सगरतनयस्वर्गसोपानपङ्क्तीं - जह्नोः।

## Discussion

**3.4.1** प्रकृतम् – सरस्वत्याः शुद्धं जलं पातुं यक्षः मेघं निर्दिशति।

**हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां**
**बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।**
**कृत्वा तासामभिगममपां सौम्य सारस्वतीना-**
**मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः॥ ५३।।**

**पदच्छेदः** – समरविमुखो लाङ्गली - समरविमुखः + लाङ्गली। अन्तःशुद्धस्त्वम् - अन्तःशुद्धः + त्वम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| बन्धुप्रीत्या समरविमुखः | - | कुरुपाण्डवस्नेहेन युद्धनिस्पृहः |
| लाङ्गली अभिमतरसां | - | बलरामः अभीष्टस्वादां |
| रेवतीलोचनाङ्कां हालां हित्वा | - | स्वप्रियायाः रेवत्याः लोचने एव प्रतिबिम्बितां सुरां त्यक्त्वा |
| याः सिषेवे | - | सरस्वतीरापः सेवितवान् |
| सौम्य त्वं | - | हे सौम्यशीलः, त्वं |
| तासां सारस्वतीनाम् अपां | - | सरस्वतीनद्याः इमाः अपां |
| अभिगमम् अन्तःशुद्धः | - | सेवां कृत्वा अन्तरात्मनि शुद्धः भूत्वा |
| भविता वर्णमात्रेण कृष्णः | - | भविष्यति वर्णेनैव श्यामः (न तु पापेन) |

**सारः-** हे सौम्यशील, कौरवपाण्डवयोः समानस्नेहेनैव युद्धानिःस्पृहः बलरामः तीर्थमात्राप्रसक्तः सन् रेवतीलोचनाङ्कां सुराम् उपेक्ष्य यस्याः सरस्वत्याः यत् शुद्धं सलिलं पीतवान् तस्याः सलिलं त्वमपि पीत्वा अन्तरात्मनि विशुद्धिं प्रापय। त्वं वर्णमात्रेणैव कृष्णः। अन्तरात्मनि विशुद्धः एव।

**क्रिये** – सिषेवे, भविता।

भविता- भू सत्तायां -पर-लुट्-प्र.पु-ए.व।

भविता-भवितारौ-भवितारः।

रेवत्याः लोचने एवाङ्कः यस्याः सा रेवतीलोचनाङ्का, ताम् रेवतीलोचनाङ्काम्।

**पर्यायपदानि** – हाला। सुरा, हलिप्रिया, हला, परिस्रुत्, वारुणी।

**3.4.2** प्रकृतम् – गङ्गानदीं वर्णयति।

**तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां**
**जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तीम्।**
**गौरीवक्त्रभ्रूकुटिरचनां या विहस्येव फेनैः**
**शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता॥ ५४।।**

**पदच्छेदः** – गच्छेरनुकनखलं - गच्छेः + अनुकनखलं। विहस्येव - विहस्य + इव।

अकरोदिन्दुलग्नोर्मिहस्ता- अकरोत् + इन्दुलग्नोर्मिहस्ता।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तस्मात् अनुकनखलं | - | कुरुक्षेत्रात् कनखलं नाम पर्वतस्य समीपं |
| शैलराजावतीर्णां | - | हिमवतोऽवतीर्णां |
| सगरतनयस्वर्गसोपानपङ्क्तीं | - | सगरतनयस्वर्गप्राप्तिसाधनभूतां |
| जह्नोः कन्यां गच्छेः | - | जह्नुः नाम राज्ञः पुत्रीं जाह्नवीं गच्छ। |
| या गौरीवक्त्रभ्रूकुटीरचनां | - | या गङ्गा पार्वतीभ्रूकुटिरचनां |
| फेनैः विहस्य इव | - | फेनपङ्क्तिभिः परिहस्य इव |
| इन्दुलग्नोर्मिहस्ता | - | जटाजूटस्थिता शिवस्य |
| केशग्रहणम् अकरोत् | - | केशकर्षणम् अकरोत् |

**सारः** - हे मेघ, कुरुक्षेत्रात् अग्रे कनखलपर्वतस्य समीपे हिमालयतोऽवतीर्णां विधायिनीं जाह्नवीं गच्छ। या गङ्गा फेनैः पार्वतीभ्रूकुटिरचनां विहस्य इव शिवस्य जटाजूटाधिरोहणमकरोत्।

**क्रिये** – गच्छेः, अकरोत्।

अकरोत्-डुकृञ् करणे-पर-लङ्-प्र.पु-ए.व।

अकरोत् – अकुरुतां- अकुर्वन्।

**अलङ्कारः** – उदात्तम् – पुरावृत्तपरामर्शात्। उत्प्रेक्षा च।

कनखलस्य समीपं अनुकनखलम्।

अनुकनखलम् इत्यत्र अव्ययीभावसमासः। 'अनुयत्समया' इति सूत्रेण।

**पर्यायपदानि** – जाह्नवी। गङ्गा, विष्णुपदी, जह्नुतनया, सुरनिम्नगा।

पवित्रवसुधायाः कुरुक्षेत्रभूमेः समीपे वर्तमानः कश्चन पर्वतः भवति कनखलः। तस्य समीपे भवति हिमालयः। हिमालयात् गङ्गा प्रवहति। गङ्गायाः पवित्रता विश्वविख्यातम्। सागरपुत्राणां मोक्षप्राप्त्यर्थं भगीरथेन हिमवतः गङ्गम् आकाशमार्गेण भुवनम् आनीता। अन्ते पातालं च प्राप्ता सा गङ्गा

सगरपुत्रेभ्यः मोक्षदायिका बभूव। इदानीमपि गङ्गायाः पावनत्वं सर्वे अङ्गीकुर्वन्ति। इयं गङ्गा फेनैः पार्वतीभ्रूकुटीरचनां विहस्यैव शिवस्य जटायां अभ्यारोहत्।

## पुनरावृत्तिः (Recap)

- सरस्वत्याः शुद्धं जलं पातुं यक्षः मेघं निर्दिशति
- सगरतनयस्वर्गसोपाना नदी जाह्नवी भवति।
- गङ्गायाः प्राधान्यम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. "अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः" अनेन पद्यांशेन कस्याः नद्याः संकेतः समुपलभ्यते ?
2. पवित्रवसुधायाः कुरुक्षेत्रभूमेः समीपे वर्तमानः कश्चन पर्वतः कः ?
3. "सगरतनयस्वर्गसोपानपङ्क्तिम्" - इयं कस्याः विशेषणम् ?
4. जाह्नवी का ?
5. बलरामः कस्य जलं पीतवान्?
6. मेघः कस्य निर्देशेन सरस्वतीं गच्छति?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. मोक्षदायिकायाः गङ्गायाः प्राधान्यं विशदयत।
2. "हे सौम्य, तासां सारस्वतीनामम्..." इत्यस्मिन् गद्ये बलरामस्य कस्य प्रति विरक्ति दर्शिता? सः का सुरां परित्यज्य किं कृतवान् ?

## निर्दिष्टाभ्यासः (Assignments)

1. गम्भीरा-देवगिरी-चर्मण्वती-ब्रह्मावर्त-सरस्वती-जाह्नवी-इत्यादीनां नदीनां पर्वतानां च प्रकृतिवर्णनां विशदयत।
2. यक्षः मेघं किमर्थं सरस्वतीस्नानाय निर्देशयति?
3. "सगरतनयस्वर्गसोपानपङ्क्तीं जह्नोः कन्यां गच्छेः..." - इत्यत्र यक्षः मेघं कुत्र नेतुमिच्छति? गङ्गायाः उत्पत्तिविशेषः कथं वर्णितः अस्ति? सा पार्वत्याः भ्रूकुटिं विहस्य किमकरोत्?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. सरस्वत्याः।
2. कनखलः।
3. जह्नोः कन्यायाः(गङ्गायाः)।
4. गङ्गा।
5. सरस्वत्याः।
6. यक्षस्य।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

BLOCK-4

# मार्गवर्णना - 3

# Unit - 1
## गङ्गासमागमः

### उद्देश्यानि (Learning Outcomes)

- कविकुलगुरोः कालिदासस्य काव्यप्रतिभां परिचिनोति।
- भारतस्य प्रकृतिसौन्दर्यम् आस्वदते।
- गङ्गासमागममवगच्छति।

### प्राग्व्यपेक्षाः (Prerequisites)

समस्तेऽस्मिन् विश्वसाहित्ये विख्यातो भवति कविकालिदासः। मेघदूतेऽपि कवेः प्रतिभा दर्शनीया एव। कान्तावियुक्तः यक्षः मेघं दृष्ट्वा तरलितहृदयो भूत्वा चेतनाचेतनविचारशून्यः प्रेयस्याः सकाशं सन्देशं प्रेषयति। मेघदूतस्य पूर्वभागे अलकापर्यन्तं मार्गं वर्णयति। अस्मिन् भागे गङ्गासमागमं वर्णयति।

### मुख्यपदानि (Keywords)

सुरगज - स्रोतसि - अम्भः तिर्यक् पातुं - अस्थानोपगतयमुनासङ्गमं।

### Discussion

**4.1.1** प्रकृतम् – जाह्नव्याः जलपानं कार्यम्। तव सामीप्येन प्रयागादन्यत्र गङ्गासमागमः जायते।

**तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी**

**त्वं चेदच्छस्फटिकविशदे तर्कयेस्तिर्यगम्भः।**

**संसर्पन्त्या सपदि भवतः स्रोतसि छाययासौ**

**स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ।।५५।।**

**पदच्छेदः** – सुरगज इव - सुरगजः + इव। चेदच्छस्फटिकविशदम् – चेत् + अच्छस्फटिकविशदम्। तर्कयेस्तिर्यगम्भः – तर्कयेः + तिर्यक् + अम्भः। छाययासौ - छायया + असौ। स्यादस्थानोपगतयमुनासङ्गम् - स्यात् + अस्थानोपगतयमुनासङ्गम्। एवाभिरामा - एव + अभिरामा।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| सुरगज इव | - | कश्चित् दिग्गज इव |
| पश्चार्धलम्बी व्योम्नि | - | पश्चिमार्धलम्बी आकाशे स्थित्वा |
| अच्छस्फटिकविशदं तस्याः | - | निर्मलस्फटिकावदातं गङ्गायाः |
| अम्भः तिर्यक् पातुं | - | जलं तिरश्चीनं पानाय |
| त्वं तर्कयेः चेत् | - | भवान् चिन्तयेत् चेत् |
| सपदि स्रोतसि संसर्पन्त्याः | - | शीघ्रं प्रवाहं संक्रामन्त्याः |
| भवतः छायया असौ | - | मेघस्य प्रतिबिम्बेन गङ्गा |
| अस्थानोपगतयमुनासङ्गमं | - | प्रयागादन्यत्रापि यमुनामिलितं |
| अभिरामा एव स्यात् | - | मनोज्ञा स्यादेव। |

**सारः** – हे मेघ, अनन्तरं कश्चन सुरगज इव जाह्नव्याः जलं पातुं त्वय्यवनते सति स्रोतसि तव छाया व्यापृता भवेत्। तदा असौ गङ्गा प्रयागादन्यत्रापि यमुनामिलितेव शोभां वहति।

गङ्गायमुनासङ्गमः प्रयागदेशे एव। किन्तु गङ्गायाः जलपानाय यदा त्वं सन्नद्धः भवसि तदा प्रयागादन्यत्रापि गङ्गायमुनासङ्गमः जायते इति प्रतीतिः जायेत।

**क्रिये** - तर्कयेः, स्यात्।

स्यात् - अस् भुवि-पर-विधिलिङ्-प्र.पु-ए.व।

स्यात् - स्याताम् - स्युः

पश्चात् अर्धं पश्चादर्धं, तेन लम्बते इति पश्चादर्धलम्बी ।

**पर्यायपदानि** - छाया । सूर्यप्रिया, कान्तिः, प्रतिबिम्बं, अनातपः ।

## पुनरावृत्तिः (Recap)

- जाह्नव्याः जलपानं कार्यम् ।
- जाह्नव्याः अम्भः पातुं सुरगज इव ।
- गङ्गायमुनासङ्गमः ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'तस्याःअम्भः पातुं सुरगज इव'- कस्याः अम्भः ?
2. गङ्गायमुनासङ्गमः कस्मिन् देशे ?
3. गङ्गायाः जलं पातुं कः इच्छति?
4. यमुनासङ्गमः सामान्यतः कुत्र भवति?
5. कालिदासः कस्य पर्यायेन मेघं दर्शयति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. "स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा" - आशयं लिखत ।
2. "तस्याः पातुं सुरगज इव..." इत्यादिना? श्लोके कः अर्थः उक्तः अस्ति

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. जाह्नव्याः ।

2. प्रयागदेशे।

3. सुरगजः।

4. प्रयागे।

5. सुरगजस्य।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 2
## हिमालयः

### उद्देश्यानि (Learning Outcomes)

- कविकुलगुरोः कालिदासस्य काव्यप्रतिभां परिचिनोति।
- भारतस्य प्रकृतिसौन्दर्यम् आस्वदते।
- हिमालयसौन्दर्यम् आस्वदते।

### प्राग्व्यपेक्षाः (Prerequisites)

कालिदासः स्वग्रन्थे मेघदूते सज्जनानां महत्वं प्रतिपादयति । महान्तः आर्तानां दुःखनिवारणे उद्युक्ताः भवन्ति। प्रियाविरही यक्षः मेघम् प्रति स्वप्रेयस्याः समीपं गन्तुं प्रार्थयति। मार्गमध्ये वर्तमाने हिमालये विश्रम्य गन्तुं निर्दिशति।

### मुख्यपदानि (Keywords)

नाभिगन्धैः - शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां - सरलस्कन्धसंघट्टजन्मा - आपन्नर्तिंप्रशमनफलाः - शरभाः - त्रिपुरविजयः - हंसद्वारं - उदीचीं।

### Discussion

**4.2.1** प्रकृतम् – जाह्नव्याः उत्पत्तिस्थानं हिमलयम् प्राप्तुं यक्षः मेघं निर्दिशति।

**आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां**

**तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।**

**वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः**

**शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ।।५६।।**

**पदच्छेदः** - नाभिगन्धैर्मृगाणां - नाभिगन्धैः + मृगाणां। वक्षस्यध्वश्रमविनयने - वक्षसि + अध्वश्रमविनयने।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| आसीनानाम् मृगाणां | - | उपविष्टानां कस्तूरिकामृगाणां |
| नाभिगन्धैः सुरभितशिलं | - | कस्तूरीगन्धैः सुरभीकृतशिलं |
| तस्याः एव प्रभवः | - | गङ्गायाः एव कारणं |
| तुषारैः गौरम् अचलं प्राप्य | - | हिमैः सितं पर्वतं प्राप्य |
| अध्वश्रमविनयने तस्य | - | मार्गक्लेशस्य अपनोदने हिमाद्रेः |
| शृङ्गे निषण्णः (सन्) | - | शिखरे उपविष्टः सन् |
| शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां | - | शुभ्रस्य महेशवृषभस्य विषाणोत्खातपङ्कतुल्यां |
| शोभाम् वक्ष्यसि | - | कान्तिं वोढासि। |

**सारः-** हे मेघ, पुनः हिमाचलं प्राप्य मार्गक्लेशं दूरीक्रियताम्। हिमालये उपविष्टानां कस्तूरीमृगाणां नाभिगन्धैः सुरभिलानि शिलातलानि सन्ति। गङ्गायाः एव प्रभवः भवति हिमैः आवृतोऽयं पर्वतः। तस्मिन् हिमाद्रौ उपविष्टः भवान् महेशस्य वृषभस्य विषाणोत्खाततुल्यां शोभां धारयिष्यति।

**क्रिया** – वक्ष्यसि। वह् प्रापणे-पर-लृट्-म.पु-ए.व.।

वक्ष्यसि-वक्ष्यथः-वक्ष्यथ।

अध्वश्रमस्य विनयनम् अध्वश्रमविनयनं,तस्मिन् अध्वश्रमविनयने।

**पर्यायपदानि** – अध्वा। अयनं, वर्त्म, मार्गः, अध्वा, पन्थाः, पदवी।

**4.2.2** प्रकृतम् - दावानलः जायते चेत् त्वं जलधारया अग्निं निर्वापय।

**त्वं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा**

**बाधेतोत्काक्षपितचमरीबालभारो दवाग्निः।**

**अहस्येनं शमयितुमलं वारिधारासहस्रै-**

**रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।।५७।।**

**पदच्छेदः** – बाधेतोत्काक्षपितचमरीबालभारो दवाग्निः – बाधेत + उत्काक्षपितचमरीबालभारः + दवाग्निः। चेद्वायौ - चेत् + वायौ। अहस्येनं - अहसि + एनं। वारिधारासहस्रैरापन्नार्तिप्रशमनफलाः - वारिधारासहस्रैः + आपन्नार्तिप्रशमनफलाः। सम्पदो ह्युत्तमानाम् – सम्पदः + हि + उत्तमानाम्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| वायौ सरति | - | वनवाते वाति सति |
| सरलस्कन्धसंघट्टजन्मा | - | देवदारुवृक्षस्कन्धसंघर्षजन्यः |
| उत्काक्षपितचमरी बालभारः | - | वह्निकणसमूहैः दग्धारण्यानां चमरीमृगाणां पुच्छकेशैर्युक्तः |
| तं बाधेत चेत् | - | हिमाद्रिं पीडयेत् यदि |
| एनं वारिधारासहस्रैः | - | दवाग्निं धारासहस्रैः |
| अलं शमयितुम् अर्हसि | - | अत्यर्थं निर्वापयितुमर्हसि |
| हि उत्तमानां सम्पदः | - | यस्मात् महतां समृद्धयः |
| आपन्नर्तिप्रशमनफलाः | - | आर्तानामापन्निवारणफलमुद्दिश्यैव भवन्ति |

**सारः** – हे मेघ, वनवाते वाति सति देवदारुवृक्षस्कन्दसंघर्षजन्यैः वह्निकणसमूहैः दग्धानां आरण्यचमरीमृगाणां पुच्छकेशैः युक्तः एनं हिमालयं दहेत् चेत् त्वं जलधारासहस्रैः दवाग्निम् अत्यन्तं निर्वापयितुमर्हसि। हि महतां सम्पत्तयः आर्तानां दुःखनिवारणफलमुद्दिश्यैव भवन्ति।

प्रियाविरही यक्षः मेघम् प्रति स्वप्रेयस्याः समीपं गन्तुं प्रार्थयति। मार्गमध्ये वर्तमाने हिमालये विश्रम्य गन्तुं निर्दिशति। हिमालये अनेके देवदारुवृक्षाः चमरीमृगाः च सन्ति। वनवाते वाति सति देवदरुवृक्षस्कन्धसंघर्षजन्यैः वह्निकणसमूहैः दग्धानां चमरीमृगाणां पुच्छकेशैः हिमालयं दहति। जलधारया दावाग्निं शमयतु। हि महतां सम्पत्तयः आर्तानां दुःखनिवारणफलमुद्दिश्यैव भवन्ति।

**क्रियाः** – सरति, बाधेत, अर्हसि

अर्हसि - अर्ह पूजायां -पर-लट्-म.पु-ए.व.।

अर्हसि-अर्हथः-अर्हथ।

**अलङ्कारः** – अर्थान्तरन्यासः।

'उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः'इति लक्षणम्।

आपन्नानाम् आर्तिप्रशमनं फलं यासां ताः आपन्नार्तिप्रशमनफलम्।

**पर्यायपदानि** – आर्तिः। पीडा, अमानस्यं, आभीलं, आर्तिः, बाधा।

**4.2.3** - प्रकृतम् – भवतः मार्गं यदि शरभाः लङ्घयेयुः तर्हि तान् दण्डयतु।

**ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्**

**मुक्ताध्वानं सपदि शरभां लङ्घयेयुर्भवन्तम्।**

**तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्**

**के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ।।५८।।**

**पदच्छेदः** – लङ्घयेयुर्भवन्तम् – लङ्घयेयुः + भवन्तम्। कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान् - कुर्वीथाः + तुमुलकरकावृष्टिपातावकीर्णान्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तस्मिन् संरम्भोत्पन्नरभसाः | - | हिमाद्रौ कोपेन उत्प्लवने वेगयुक्ताः |
| ये शरभाः मुक्ताध्वानं | - | ये अष्टापदमृगविशेषाः दूरगामिनं भवन्तं |
| सपदि स्वाङ्गभङ्गाय लङ्घयेयुः | - | सहसा स्वदेहभङ्गाय लङ्घनं कुर्युः चेत् |
| तान् तुमुलकरकावृष्टिपातावकीर्णान् | - | शरभान् रौद्राणां वषोत्पलानां वृष्टिपातेन अवक्षिप्तान् |
| कुर्वीथाः निष्फलारम्भयत्नाः | - | कुरुष्व फलरहिताः कर्मव्यापाराः(निष्फलकर्मोपक्रमा) |
| के वा परिभवपदं | - | के जनाः तिरस्कारपदं |

न स्युः - न भवन्ति। (परिभवपदं सर्वे न सहन्ति)।

**सारः –** हे मेघ, हिमालये अनेके शरभमृगाः (अष्टापदमृगविशेषाः)सन्ति। ते उत्प्लवने अतिवेगयुक्ताः। दूरगामिनः भवतः मार्गं उल्लङ्घयितुं वृथा श्रमन्ते। तेषामुत्प्लवनं स्वाङ्गभङ्गाय कारणमेव। नास्ति अतिरिक्तं किमपि प्रयोजनम्। तान् करकावृष्ट्या दण्डितान् कुरु। क्षुद्रोऽप्यभिक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेप्तव्यः। हि निष्फलकर्मोद्योगिनः सर्वेऽपि परिभवपदभाजो भवन्ति।

**क्रियाः** – लङ्घयेयुः, कुर्वीथाः, स्युः।

स्युः, अस भुवि-पर-विधिलिङ्-प्र.पु-ब.व.।

स्यात्-स्यताम्-स्युः।

निष्फलाः आरम्भाः यत्नाः येषां ते निष्फलारम्भयत्नाः।

**पर्यायपदानि**- शरभः। कृष्णसारः, रुरुः,न्यङ्कु, सृमरः,चमरः।

4.2.4 प्रकृतम् – प्रहिमालये शिलासु महेशस्य पादविन्यासं दृष्ट्वा प्रदक्षिणं कर्तुं मेघं यक्षः निर्दिशति।

**तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्द्रमौलेः**
**शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रःपरीयाः।**
**यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः**
**संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्धधानाः।। ५९।।**

**पदच्छेदः** - सिद्धैरुपचितबलिं – सिद्धैः + उपचितबलिं। करणविगमादूर्ध्वम् -करणविगमात्+ऊर्ध्वम्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| तत्र दृषदि व्यक्तं | - | हिमाद्रौ कस्यांचित् शिलायां प्रकटं |
| शश्वत् सिद्धैः उपचितबलिं | - | सदा योगिभिः रचितपूजाविधिं |
| अर्धेन्द्रमौलेः चरणन्यासं | - | महेशस्य पादविन्यासं |
| भक्तिनम्रःपरीयाः | - | भक्त्या नम्रः सन् प्रदक्षिणं कुरु |

यस्मिन्दृष्टे उद्धूतपापाः - पादन्यासे दृष्टे सति निरस्तकल्मषाः

श्रद्धधानाः करणविगमात् - विश्वसन्तः पुरुषाः देहत्यागात्

ऊर्ध्वं स्थिरगणपदप्राप्तये - अनन्तरं स्थिररूपेण गणपदस्थानाय गणेषु

संकल्पन्ते - समर्थाः भवन्ति। (शिवस्य प्रमुखाः भविष्यन्ति )

**सारः –** हे मेघ, हिमालये कस्यांचित् शिलायां प्रकटं महेशस्य पादविन्यासं दृष्ट्वा भक्त्या नम्रः सन् प्रदक्षिणं कुरु। यस्याः अवलोकनात् आस्तिकाः श्रद्धावन्तः जनाः शरीरत्यागानन्तरं शिवगणपदं प्राप्नुवन्ति।

(हिमालये कस्याञ्चित् शिलायां प्रकटं महेशस्य पादविन्यासे यः भक्त्या प्रदक्षिणं करोति सः शरीरत्यागानन्तरं शिवपदं प्राप्नोति। )

**क्रिये** – परीयाः,सम्कल्पन्ते।

संकल्पन्ते – सम् क्लृप् व्यक्तानां वाचि – आत्म-लट्-प्र.पु-ब.व.।

संकल्पते-संकल्पेते-संकल्पन्ते।

**व्याकरणकार्यम्** – स्थिरगणपदप्राप्तये संकल्पन्ते इत्यत्र क्लृप् धातोः पर्याप्तिवचनस्य अलमर्थत्वात् तद्योगे 'नमः स्वस्ति स्वाहास्वधालओवषड्प्रयोगञ्च' इति सूत्रेण चतुर्थी। स्थिरगणपदप्राप्तये इति चतुर्थी।

स्थिरं गणानां पदप्राप्तिः स्थिरगणपदप्राप्तिः, तस्मै स्थिरगणपदप्राप्तये।

**पर्यायपदानि**- दृषद्। पाषाणं, प्रस्तरः, ग्रावा, उपलः, अश्मा।

**4.2.5** प्रकृतम् – तवागमनेन हिमालये संगीतं परिपूर्णाङ्गं भवेत्।

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः**

**संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।**

**निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्**

**सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।।६०।।**

**पदच्छेदः** - संसक्ताभिस्त्रिपुरविजयो गीयते- संसक्ताभिः + त्रिपुरविजयः + गीयते।

निर्ह्लादस्ते - निर्ह्लादः + ते। मुरज इव - मुरजः + इव।

सङ्गीतार्थो ननु - सङ्गीतार्थः + ननु। पशुपतेस्तत्र- पशुपतेः + तत्र।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| (मेघ) अनिलैः पूर्यमाणाः | - | हे मेघ, वायुभिः आपूर्यमाणाः |
| कीचकाः मधुरं शब्दायन्ते | - | सच्छिद्रवंशाः श्रुतिसुखं शब्दं कुर्वन्ति। |
| संसक्ताभिःकिन्नरीभिः | - | भक्तियुक्ताभिः किन्नरीभिः |
| त्रिपुरविजयः गीयते | - | त्रिपुरदाहाख्यः प्रबन्धः गीयते। |
| कन्दरेषु ते निर्ह्लादः | - | गुहासु तव गर्जनं |
| मुरजे ध्वनिरिव | - | वाद्यभेदे ध्वनिरिव(मुरजध्वनिरिव) |
| स्यात् तत्र पशुपतेः | - | चेत् तर्हि हिमालये महेशस्य |
| समग्रः संगीतार्थः भावी ननु | - | सम्पूर्णः संगीतवस्तुः भविष्यति खलु |

**सारः** – हे जलद, हिमालये वायुभिरापूर्यमाणाः सच्छिद्रवंशाः मधुरं शब्दं कुर्वन्ति। भक्तिनम्रः किन्नरस्त्रियः त्रिपुरविजयं गायन्ति। गुहासु तव गर्जनं मुरजध्वनिरिव भवति। एवं पशुपतेः शिवस्य संगीतं परिपूर्णाङ्गं स्यात्।

(हिमालये वायुभिरापूर्यमाणाः कीचकाः मधुरं शब्दं कुर्वन्ति। भक्तिनम्राः किन्नरस्त्रियः त्रिपुरविजयं गायन्ति।गुहासु मेघगर्जनं मुरजध्वनिरिव भवति। एवं पशुपतेः शिवस्य संगीतं परिपूर्णाङ्गं स्यात्।)

**क्रियाः** – गीयते,स्यात्,शब्दायन्ते।

स्यात्-अस भुवि-पर-विधिलिङ्-प्र.पु-ए.व.।

स्यात्-स्याताम्-स्युः।

पशूनां पतिः पशुपतिः।

**पर्यायपदानि**- पशुपतिः। शम्भुः, ईशः, पशुपतिः, शिवः, शूली।

**4.2.6** प्रकृतम् – हिमालयात् उदीचीं दिशं प्रति यातुं निर्दिशति।

**प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्**
**हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्**
**तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी**
**श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ।।६१।।**

**पदच्छेदः** – प्रालेयाद्रेरुपतटम् – प्रालेयाद्रेः+उपतटम्। तांस्तान्विशेषान् - तां + तान् + विशेषान्। तेनोदीचीं – तेन + उदीचीं। अनुसरेस्तिर्यगायामशोभी- अनुसरेः + तिर्यक् + आयामशोभी। पादोबलिनियमनाभ्युद्यतस्येव - पादः + बलिनियमनाभ्युद्यतस्य + इव।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| प्रालेयाद्रेः उपतटं | - | हिमाद्रेः तटसमीपे |
| तान् तान् विशेषान् | - | तत्तद्विशेषान्(द्रष्टव्यार्थान्) |
| अतिक्रम्य | - | उल्लङ्घ्य गच्छेः। |
| हंसद्वारं | - | मानसाख्यसरोवरद्वारं |
| भृगुपतियशोवर्त्म | - | परशुरामस्य यशसः मार्गभूतं |
| यत् क्रौञ्चरन्ध्रं | - | यत् क्रौञ्चपर्वतस्य रन्ध्रं(बिलं) |
| तेन बलिनियमनाभ्युद्यतस्य | - | क्रौञ्चबिलेन बलिनियन्त्रणार्थम् |
| विष्णोः श्यामः पादः | - | व्यापकस्य वामनस्य कृष्णवर्णः चरणः |
| उदीचीं दिशम् अनुसरेः | - | उत्तराम् आशाम् अनुगच्छ |

**सारः** – हे मेघ, हिमाद्रेः तटसमीपे द्रष्टव्यान् कार्यान् निरीक्ष्य मानसाख्यसरोवरद्वारं परशुरामप्रतापद्योतकं यत् क्रौञ्चपर्वतस्य बिलेन उदीचीं दिशं याहि। तदा त्वं बलिनियन्त्रणार्थं उद्यतस्य वामनस्य श्यामः पादः इव शोभां धारयिष्यसि।

**क्रिया**- अनुसरेः। अनु + सृ गतौ-पर-विधिलिङ्-म.पु-ए.व.।

अनुसरेः -अनुसरेतम्-अनुसरेत।

**अलङ्कारः** – उदात्तम्। पुरावृत्तपरामर्शनात्।

**व्याकरणकार्यम्** - उपतटम् इत्यस्य 'अव्ययं विभक्ति....' इत्यादिना सूत्रेण अव्ययीभावसमासः, समीपार्थे उपेत्यव्ययम्।

हंसानां द्वारं हंसद्वारम्।

**पर्यायपदानि** – पादः। पादः, पद्, अङ्घ्रि, चरणः।

**हिमालयः -** भारतस्य उत्तरस्यां दिशि हिमालयः वर्तते। हिमालये उपविष्टानां कस्तूरिमृगाणां नाभिगन्धैः सुरभिलानि अनेकानि शिलातलानि सन्ति। गङ्गायाः एव प्रभवः भवति हिमैः आवृतोऽयं पर्वतः। हिमालये मेघः विश्रमाय उपविशति चेत् महेशस्य वृषभस्य तुल्यां शोभां धरति। हिमालये अनेके देवदारुवृक्षाः चमरीवृक्षाः च सन्ति। वनवाते वाति सति देवदारुवृक्षस्कन्ध संघर्षजन्यैः वह्निकणसमूहैः दग्धानां चमरीमृगाणां पुच्छकेशैः हिमालयं दहति। जलधारया दावाग्निं शमयितुं मेघं यक्षः प्रार्थयति। महतां सम्पत्तयः आर्तानां दुःखशमनाय भवन्ति।

हिमालये कस्यांचित् शिलायां प्रकटः महेशस्य पादविन्यासः वर्तते। तं पादविन्यासं नम्रः सन् प्रदक्षिणं करोति चेत् श्रद्धावन्तः जनाः शरीरत्यागानन्तरं शिवगणपदं प्राप्नुवन्ति। हिमालये वायुभिरापूर्यमाणाः कीचकाः मधुरं शब्दं कुर्वन्ति। भक्त्या किन्नरस्त्रियः त्रिपुरविजयं गायन्ति। गुहासु मेघगर्जनं मुरजध्वनिरिव भवति। एवं पशुपतेः परिपूर्णाङ्गं स्यात्। एवम् अनेकरीत्या हिमालयः श्रेष्ठः एव।

## पुनरावृत्तिः (Recap)

- 'वक्षस्यध्वश्रमविनयने हिमालये शृङ्गे निषण्णः'।
- उत्तमानां सम्पत् आपन्नर्तिप्रशमनाय उपयुज्यते।

- मेघस्य मार्गं शरभाः लङ्घयन्ति चेत् तान्( दण्डयतु) कारकावृष्टिपातावकीर्णान् कुरु।
- हिमालये शिलासु महेशस्य पादविन्यासं व्यक्तं भवति।
- अनिलैः पूर्यमाणाः कीचकाः मधुरं शब्दायन्ते।
- पशुपतेः शिवस्य संगीतं परिपूर्णाङ्गं स्यात्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'वक्षस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः'-कस्य शृङ्गे ?
2. जाह्नव्याः उत्पत्तिस्थानं किम् ?
3. हिमालये शिलासु महेशस्य पादविन्यासं दृष्ट्वा किं कर्तुं मेघं यक्षः निर्दिशति ?
4. हिमालये शिलासु कस्य पादविन्यासं व्यक्तं भवति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. हिमालयं प्राप्तुं यक्षः मेघं किं निर्दिशति ?
2. उत्तमानां सम्पत् किमर्थम् उपयुज्यते ?
3. मेघस्य मार्गं शरभाः लङ्घयन्ति चेत् किं करणीयम् ?
4. के मधुरं शब्दायन्ते ?
5. 'सङ्गीतार्थो पशुपतेस्तत्र समग्रः'- कथम् ?
6. कस्य नाभिगन्धेन शिलातलानि सुरभिणि भवन्ति?
7. कः शिवगणपदं प्राप्नोति?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. "आपन्नर्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्" - आशयं विशदयत।
2. शिवस्य पादपूजायाः प्रयोजनं किम् ?

3. शिवपादविन्यासस्य माहात्म्यं वर्णयत।
4. "क्रौञ्चरन्ध्रं" कथं विशिष्यते?

## निर्दिष्टाभ्यासः (Assignments)

1. भारतस्य उत्तरस्यां दिशि हिमालयः वर्तते - हिमालयपर्वतम् अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. हिमालये शृङ्गे।
2. हिमालयः।
3. प्रदक्षिणम्।
4. महेशस्य।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 3
## कैलासः

### उद्देश्यानि (Learning Outcomes)

- कविकुलगुरोः कालिदासस्य काव्यप्रतिभां परिचिनोति।
- भारतस्य प्रकृतिसौन्दर्यम् आस्वदते।
- कैलाससौन्दर्यम् आस्वदते।

### प्राग्व्यपेक्षाः (Prerequisites)

कालिदासः स्वग्रन्थे मेघदूते सज्जनानां महत्त्वं प्रतिपादयति। महान्तः आर्तानां दुःखनिवारणे उद्युक्ताः भवन्ति। प्रियाविरही यक्षः मेघं प्रति स्वप्रेयस्याः समीपं गन्तुं प्रार्थयति। मार्गमध्ये वर्तमाने हिमालये विश्रम्य गन्तुं निर्दिशति। अनन्तरं कैलासम् वर्णयति।

### मुख्यपदानि (Keywords)

दशमुखभुजोच्छ्वासितप्रस्थसन्धेः - श्रृङ्गोच्छ्रायैः - कृत्तद्विरददशनच्छेदगौरस्य - असंन्यस्ते - यन्त्र धारागृहत्वं - हलभृतः - सुरयुवतयः - नगेन्द्रं।

### Discussion

**4.3.1**- प्रकृतम्- हिमालयात् त्वं कैलासगिरिं गच्छ।

**गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः**

**कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।**

**श्रृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं**

**राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः।।६२।।**

**पदच्छेदः** – चोर्ध्वं – च +ऊर्ध्वं। त्रिदशवनितादर्पणस्यातिथिः - त्रिदशवनितादर्पणस्य + अतिथिः।

कुमुदविशदैर्यो वितत्य - कुमुदविशदैः + यः + विशत्य। त्र्यम्बकस्याट्टहासः - त्र्यम्बकस्य + अट्टहासः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| (पुनः) ऊर्ध्वं च | - | क्रौञ्चबिलनिर्गमनानन्तरम् ऊर्ध्वं च |
| गत्वा दशमुखभुजोच्छ्वासितप्रस्थसन्धेः | - | गत्वा रावणभुजविघटितशिखरसन्धेः |
| त्रिदशवनितादर्पणस्य | - | सुरवधूदर्पणरूपिणः |
| कैलासस्य अतिथिः स्याः | - | कैलासपर्वतस्य अतिथिः भव। |
| यः कुमुदविशदैः | - | कैलासकुसुमवत् निर्मलैः |
| शृङ्गोच्छ्रायैः खं वितत्य | - | शृङ्गाणामौन्नत्यैः आकाशं व्याप्य |
| प्रतिदिनं राशीभूतः त्र्यम्बकस्य | - | दिने दिने एकत्रीभूतः शिवस्य |
| अट्टहासः इव | - | अतिहास इव वर्तते। |

**सारः** – हे मेघ, क्रौञ्चबिलनिर्गमनानन्तरं त्वं रावणभुजविघटितशिखरसन्धेः सुरवधूदर्पणरूपिणः कैलासस्यातिथिः भव। स कैलासः कुसुमद् निर्मलैः शृङ्गाणामौन्नत्यैः आकाशं व्याप्य वर्तते। सः प्रत्यहं राशीभूतः शिवस्याट्टहास स्थितो वर्तते।

**क्रिया-** स्याः। अस भुवि-पर-विधिलिङ्-म.पु-ए.व.।

स्याः-स्यातं-स्यात।

दिने दिने प्रतिदिनम्।

**पर्यायपदानि** – कुमुदम्। श्वेतोत्पलम्, कैरवं, चन्द्रकान्तं, कल्हारम्।

**4.3.2** प्रकृतम् – त्वयि कैलासगते कैलासः गौरवर्णः बलभद्रः इव शोभते।

**उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे**

**सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य।**

**शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-**

**मंसन्यस्ते सति हलभृतो मेचके वाससीव॥ ६३ ।।**

**पदच्छेदः** – हलभृतो मेचके – हलभृतः+ मेचके। वाससीव-वाससि+इव।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| स्निग्धभिन्नञ्जनाभे त्वयि | - | मसृणाञ्जनशोभातुल्ये मेघे |
| तटगते सद्यः | - | सानुगते सहसा |
| कृत्तद्विरददशनच्छेदगौरस्य | - | छिन्नस्य गजदन्तस्य छेदवत् धवलस्य |
| अद्रेः तस्य मेचके वाससि | - | पर्वतस्य कैलासस्य श्यामले वस्त्रे |
| असंन्यस्ते सति हलभृत इव | - | स्कन्दनिहिते सति बलभद्रस्य इव |
| स्तिमितनयनप्रेक्षणीयां | - | निश्चलैः नयनैः प्रेक्षितुं योग्यां |
| शोभां भवित्रीम् उत्पश्यामि | - | कान्तिं भाविनीं तर्कयामि |

**सारः** – हे मेघ, मसृणाञ्जनवर्णः त्वं यदा धवलवर्णस्य कैलासस्य तटे संप्राप्तः तदा सः कैलासः स्कन्दनिहितश्यामलवस्त्रः धवलवस्त्रः धवलवर्णः बलभद्र इव प्रेक्षणीयां शोभां धरिष्यसि।

**क्रिया** – उत्पश्यामि। उत् + दृशिर् प्रेक्षणे-पर-लट्-उ.पु-ए.व.।

उत्पश्यामि-उत्पश्यावः-उत्पश्यामः।

**अलङ्कारः** - उपमा।

स्निग्धं भिन्नं च यदञ्जनं तस्य आभा यस्य सः स्निग्धभिन्नाञ्जनाभः, तस्मिन् स्निग्धभिन्नञ्जनाभे।

**पर्यायपदानि** -आभा। शोभा, कान्तिः, द्युतिः, छविः।

**4.3.4** प्रकृतम् – कैलासपर्वते पार्वत्याः मणितटारोहणाय सोपानरूपेण परिणतो भव।

**हित्वा तस्मिन्भुजगवलयं शम्भुना दत्तहस्ता**

**क्रीडाशैले यदि च विचरेत्पादचारेण गौरी।**

**भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः**

**सोपानत्वं कुरु मणितटारोहणायाग्रयायी॥ ६४।।**

**पदच्छेदः** - मणितटारोहणायाग्रयायी - मणितटारोहणाय + अग्रयायी।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तस्मिन् शम्भुना | - | कैलासे शिवेन |
| भुजगवलयं हित्वा | - | सर्पवलयं(सर्पकङ्कणम्) उपेक्ष्य |
| दत्तहस्ता गौरी पादचारेण | - | गृहीतकरा पार्वती पादेन |
| विचरेत् चेत् अग्रयायी | - | सञ्चरेत् तर्हि पुरोगतः |
| स्तम्भितान्तर्जलौघः | - | घनीभावजलप्रवाहो भूत्वा |
| भङ्गीभक्त्या | - | पर्वाणां रचनया |
| विरचितवपुः | - | कल्पितशरीरः सन् |
| मणितटारोहणाय | - | मणितटस्यारोहणाय |
| सोपानत्वं कुरु | - | सोपानभावं भज |

**सारः** – हे मेघ, कैलासे सर्पकङ्कणमुपेक्ष्य गृहीतकरा पार्वती सञ्चरणाय उद्युक्ता चेत् त्वं घनीभावजलप्रवाहो भूत्वा मणितटारोहणाय सोपानरूपेण परिणतो भव।

कैलासे पार्वती सञ्चरणाय उद्युक्ता चेत् मेघः घनीभावजलप्रवाहो भूत्वा मणितटारोहणाय सोपानरूपेण परिणतो भवतु।

**क्रिये** – विचरेत्, कुरु।

कुरु-डुकृञ् करणे- पर-लोट्-म.पु-ए.व.।

कुरु, कुरुतात् -कुरुतम् - कुरुत।

विरचितः वपुः यस्य सः विरचितवपुः।

**पर्यायपदानि** -भुजगः। सर्पः, पृदाकुः, भुजग, भुजङ्गः, अहिः, भुजङ्गमः।

**4.3.5** प्रकृतम् – त्वां यन्त्रधारगृहभावाय सुरयुवतयः नेष्यन्ति चेत् गर्जनैः ताः भाययेः इति यक्षः मेघं निर्दिशति।

**तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं**

**नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।**

**ताभ्यो मोक्षस्तव यदिसखेकर्मलब्धस्य न स्यात्**

**क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः।।६५।।**

**पदच्छेदः** - तत्रावश्यं - तत्र + अवश्यं।

सुरयुवतयो यन्त्रधारागृहत्वम् - सुरयुवतयः + यन्त्रधारागृहत्वम्।

ताभ्यो मोक्षस्तव - ताभ्यः + मोक्षः + तव।

श्रवणपरुषैर्गर्जितैर्भाययेस्ताः - श्रवणपरुषैः + गर्जितैः + भाययेः + ताः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तत्र अवश्यं सुरयुवतयः | - | कैलासे सर्वथा देवाङ्गनाः |
| वलयकुलिशोद्घट्टनोद्गीर्णतोयं | - | कङ्कणकोटिभिः प्रकारैः उत्सृष्टजलयुक्तम् |
| त्वां यन्त्रधारागृहत्वं नेष्यन्ति | - | भवन्तं कृत्रिमधारगृहत्वं नाभिलषन्ति |
| (हे)सखे, घर्मलब्धस्य तव | - | हे मित्र, निदघे लब्धस्य भवतः |
| ताभ्यो मोक्षः न स्यात् यदि | - | सुरयुवतिभ्यः मोचनम् न स्यात् तर्हि |
| क्रीडालोलाः ताः | - | क्रीडासक्ताः (प्रमत्ताः)सुरयुवतीः |
| श्रवणपरुषैः गर्जितैः भाययेः | - | श्रवणकटुभिः गर्जनैः त्राससेः |

**सारः** – कैलासे सुरयुवतयः कङ्कणकोटिभिः प्रहारैः उत्सृष्टजलयुक्तं भवन्तं कृत्रिमधारागृहत्वं नेष्यन्ति। हे सखे, ताभ्यः तत्र यदि मुक्तिः न स्यात् तर्हि कर्णकठोरैः गर्जनैः ताः त्राससेः।

**क्रियाः** -नेष्यन्ति,स्यात्,भाययेः।

भाययेः-भी भये-पर-णिचि-आशिर्लिङ्-म.पु-ए.व.।

क्रीडासु लोलाः क्रीडालोलाः।

**पर्यायपदानि** - क्रीडा। खेला, लीला, केलिः, परीहासः।

**4.3.6** प्रकृतम् - कैलासपर्वतस्य सुखानि यथेष्टं भोक्तुं निर्दिशति।

**हेमाम्भोजप्रसविसलिलं मानसस्याददानः**
**कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य।**
**धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-**
**र्नानाचेष्टैर्जलद, ललितैर्निर्विशेस्तं नगेन्द्रम् ।।६६।।**

**पदच्छेदः** – मानसस्याददानः - मानसस्य + आददानः।

कल्पद्रुमकिसलयान्यंशुकानीव - कल्पद्रुमकिसलयानि + अंशुकानि + इव।

वातैर्नानाचेष्टैर्जलद - वातैः + नानाचेष्टैः + जलद। ललितैर्निर्विशेस्तम् - ललितैः + निर्विशेः + तम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| हे जलद, | - | हे मेघ, |
| हेमाम्भोजप्रसवि | - | हेम्नः जातानां कमलानां जनकं |
| मानसस्य सलिलमाददानः | - | मानससरसः जलं पिबन् |
| ऐरावतस्य क्षणमुखपटप्रीतिं | - | इन्द्रगजस्य मुहूर्तं मुखावगुण्ठनवस्त्रप्रीतिं |
| कुर्वन् कल्पद्रुमकिसलयानि | - | जनयन् कल्पवृक्षकिसलयभूतानि |
| अंशुकानि इव वातैः | - | वस्त्राणि इव मेघवातैः |
| धुन्वन् नानाविधैः ललितैः | - | कल्पयन् बहुविधैः क्रीडितैः |
| तं नगेन्द्रं कामं | - | तं कैलासं यथेच्छं |
| निर्विशेः | - | अनुभवेः |

**सारः** – हे जलद, हेम्नः जातानां कमलानां जनकं मानससरो जलं कल्पवृक्षकिसलयानि वस्त्राणि इव वातैः कलयन् बहुविधैः क्रीडितैः तं कैलासं यथेच्छमनुभवेः।

**क्रियाः** – निर्विशेः। निर् + विश् वेशने -पर-विधिलिङ्-म.पु.-ए.व.।

निर्विशेः - निर्विशेतं-निर्विशेत।

हेम्नो अम्भोजानां प्रसवि हेम्नाम्भोजप्रसवि।

**पर्यायपदानि** – अम्भोजम्। कमलम्, पद्मं, पाथोजं, नलं, नलिनम्।

**कैलासः** - शिवस्य आवासभूमिः भवति कैलासः। दशमुखभुजोच्छ्वसितप्रस्थसन्धिः पर्वतः कैलासः भवति। सः कुसुमवद् निर्मलैः शृङ्गाणामौन्नत्यैः आकाशं व्याप्य वर्तते। सः प्रत्यहं शिवस्य अट्टहास इव स्थितो वर्तते। धवलवर्णे कैलासे मेघस्यागमनेन स्कन्धनिहितश्यामलवस्त्रः बलभद्र इव शोभते। पार्वती तस्मिन् पर्वते सञ्चरति। तत्र वर्तमानाः सुरयुवतयः मेघं कृत्रिमधारागृहत्वं कर्तुं प्रयत्नं करिष्यन्ति। कैलासे हेम्नः जातानां कमलानां जनकं मानससरः वर्तते।

## पुनरावृत्तिः (Recap)

- दशमुखभुजोच्छ्वासिप्रस्थसन्धिः पर्वतः कैलासः भवति।
- कैलासः प्रत्यहं शिवस्य अट्टहास इव स्थितो वर्तते।
- मेघस्यागमनेन स्कन्धनिहितश्यामलवस्त्रः बलभद्र इव शोभते।
- मेघस्य सोपानत्वं गौरीशङ्करयोः देवदम्पत्योः आरोहणाय उद्दिष्टोऽस्ति।
- कैलासपर्वतस्य सुखानि यथेष्टं भोक्तुं निर्दिशति।
- कैलासे हेम्नः जातानां कमलानां जनकं मानससरः वर्तते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. दशमुखोच्छ्वासिप्रस्थसन्धिः पर्वतः कः ?
2. त्र्यम्बकः कः ?

3. मेघे कैलासगते कैलासः कः इव शोभते ?
4. “सोपानत्वं कुरु मणितटारोहणायाग्रयायी” - अत्र मेघस्य सोपानत्वं कयोः देवदम्पत्योः आरोहणाय उद्दिष्टोऽस्ति ?

**एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।**
**(Answer the following questions in one or two sentences)**

1. पार्वत्यै कथं साहस्यं कर्तुं यक्षः मेघं निर्दिशति ?
2. "कृत्तद्विरददशनच्छेदगौरस्य" इत्यत्र कः वर्ण्यते?
3. "हलभृतः" इत्यनेन कः सूचितः अस्ति?
4. कैलासपर्वतः कस्य इव शोभते इत्युक्तम्?

**एकैकया खण्डिकया उत्तरं लिखत ।**
**(Answer the following questions in a paragraph)**

1. मेधाच्छादितः कैलासः कीदृशः वर्णितः अस्ति ?
2. मेघस्य आगमनात् कैलासपर्वतस्य कति प्रकारा शोभा वर्णिता अस्ति? तस्य वर्णनं विस्तरेण कुरुत ।

**निर्दिष्टाभ्यासः (Assignments)**

1. शिवस्य आवासभुमिं कैलासपर्वतम् अधिकृत्य वर्णयत ।

**वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)**

1. कैलासः ।

2. शिवः।
3. बलरामः।
4. गौरीशङ्करयोः।

**सूचनाग्रन्थाः (References)**

1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

# Unit - 4
## अलका

### उद्देश्यानि (Learning Outcomes)

- कविकुलगुरोः कालिदासस्य काव्यप्रतिभां परिचिनोति।
- भारतस्य प्रकृतिसौन्दर्यम् आस्वदते।
- अलकापुरीम् अधिकृत्य जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

समस्तेऽस्मिन् विश्वसाहित्ये विख्यातो भवति कविकालिदासः। अस्य मेघदूतेऽपि कवेः प्रतिभा दर्शनीया एव। कान्तावियुक्तः यक्षः मेघं दृष्ट्वा तरलितहृदयो भूत्वा चेतनाचेतनविचारशून्यः प्रेयस्याः सकाशं सन्देशं प्रेषयति। मेघदूतस्य पूर्वभागे अलकापर्यन्तं मार्गं वर्णयति। अस्मिन् भागे अलकापुरीं वर्णयति।

### मुख्यपदानि (Keywords)

उत्सङ्गे - स्रस्तगङ्गादुकूलां - अलका - कामिचारिन् - अभ्रवृन्दम्।

### Discussion

**4.4.1** प्रकृतम् – त्वमलकाम् पश्यसि।

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गानुकूलां**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामिचारिन्।**
**या वःकाले वहति सलिलोद्गारमुच्चैर्विमाना**

**मुक्ताजालप्रथितमलकां कामिनीवाभ्रवृन्दम् ।।६७।।**

**पदच्छेदः -** तस्योत्सङ्गे - तस्य + उत्सङ्गे। प्रणयिन इव - प्रणयिनः + इव। पुनरलकां - पुनः +अलकां। उच्चैर्विमाना - उच्चैः + विमाना। कामिनीवाभ्रवृन्दम् - कामिनी + इव + अभ्रवृन्दम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| प्रणयिन इव तस्य | - | प्रियतमस्य इव कैलासस्य |
| उत्सङ्गे स्रस्तगङ्गादुकूलां | - | ऊर्ध्वभागे भ्रष्टशुभ्रवस्त्रां |
| अलकाम् दृष्ट्वा | - | कुबेरनगरीमलकां पश्यन् |
| (हे) कामिचारिन्, त्वं पुनः | - | हे जलद, त्वं तु |
| न ज्ञास्यसे न | - | किन्तु ज्ञास्यसे एव |
| उच्चैः विमाना | - | उन्नतानि सप्रभूमिकभवनानि |
| या | - | निष्कोपा या अलका |
| वः काले सलिलोद्गारम् | - | युष्माकं मेघकाले स्रवत्सलिलधारं |
| अभ्रवृन्दम् कामिनी | - | मेघसमूहं स्त्री |
| मुक्ताजालग्रथितं अलकम् इव | - | मौक्तिकगणेन ग्रथितं चूर्णकुन्तलानीव |
| वहति | - | बिभर्ति |

**सारः** – हे जलद, प्रियतमस्य इव कैलासस्य ऊर्ध्वभागे वर्तमानं अलकां दृष्ट्वा त्वं ज्ञास्यसे। सा अलका प्रियस्योत्सङ्गे निषण्णा रमणी इव स्रस्तगङ्गोत्तरीया भवति। उन्नतानि सप्तभूमिकाभवनानि तस्यां सन्ति। निष्कोपा सा अलका मेघकाले स्रस्तसलिलधारं मौक्तिकगणेन ग्रथितं चूर्णकुन्तलानि बिभर्ति।

**अलका -** कैलासस्य ऊर्ध्वभागे वर्तमाना पुरी भवति अलका। सा अलका प्रियस्योत्सङ्गे निषण्णा रमणी इव स्रस्तगङ्गोत्तरीया भवति। उन्नतानि सप्तभूमिकाभवनानि तस्याम् सन्ति। निष्कोपा सा अलका मेघकाले स्रवत्सलिलधारं मौक्तिकगणेन ग्रथितं चूर्णकुन्तलानि बिभर्ति।

**क्रिये** – ज्ञास्यसे, वहति।

ज्ञा अवबोधने-आत्म-लृट्-म.पु-ए.व.।

ज्ञास्यसे-ज्ञास्येथे-ज्ञास्यध्वे।

कैलासमनुकूलनायकत्वेन अलकायाः स्वाधीनपतिकाख्यनायिकात्वस्य च स्फुरणात् ध्वनिः वर्तते।

एकायत्तो अनुकूलः स्यात्। प्रियोपललिता नित्यं स्वाधीनपतिका मता इति लक्षणम्।

**व्याकरणकार्यम्** - दृष्ट्वा न ज्ञास्यसे इति न इत्यत्र द्वौ नञौ वर्तमानत्वात् निश्चयार्थं द्योतयति।

कामं चरतीति कामचारी, तत्सम्बोधने कामचारिन्।

दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके इति शब्दार्णवः। दुकूलं, क्षौमम्।

## पुनरावृत्तिः (Recap)

- कैलासस्य ऊर्ध्वभागे वर्तमाना पुरी भवति अलका।
- सा अलका प्रियस्योत्सङ्गे निषण्णा रमणी इव स्रस्तगङ्गोत्तरीया भवति।
- उन्नतानि सप्तभूमिकाभवनानि तस्याम् सन्ति।
- निष्कोपा सा अलका मेघकाले स्रवत्सलिलधारं मौक्तिकगणेन ग्रथितं चूर्णकुन्तलानि बिभर्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अलका कुत्र वर्तते ?
2. कुबेरनगरी का ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. उन्नतानि सप्तभूमिकाभवनानि तस्यां सन्ति - विशदयत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. अलका - लघु टिप्पणिं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. यक्षेण सूचितं मेघमार्गं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. कैलासस्य ऊर्ध्वभागे अलका वर्तते।
2. अलका।

## सूचनाग्रन्थाः (References)


1. कालिदासः, मेघदूतम्, व्याख्या पं-श्री केदार्नाथ शर्मा, चौखम्बा सान्स्क्रीट् सन्स्थान्, वारणासी, २०१६, पुटानि ६०-७३
2. कालिदासः, मेघदूतम् (पूर्वमेघः), कृष्णदास् अकादमी, वाराणसी, १९९२
3. Kalidasan-Mekhasandesam-Malayalam Prose, Translator Kuttikrishna Marar, Marar Sahithya Prakasam, Kallai, Kozhikode, 2018

BLOCK-5

# कादम्बरीसंग्रहः तत्र शूद्रकराजधानी च

SGOU

# Unit - 1
## संस्कृतगद्यपरिचयः-बाणः-कृतयः-कादम्बरीसंग्रहः-ग्रन्थकारः

### उद्देश्यानि (Learning Outcomes)

- कव्यभेदेषु गद्यकाव्यस्य प्राधान्यं गृह्णाति।
- संस्कृतसाहित्ये बाणभट्टस्य स्थानं किमिति जानाति।
- बाणभट्टकृतीनां सामान्यपरिचयं लभते।
- कादम्बरीसंग्रहस्य सामान्यपरिचयं लभते

### प्राग्व्यपेक्षाः (Prerequisites)

दृश्यश्रव्यभेदेन काव्यस्य विभागद्वयं वर्तते। गद्यपद्यमिश्रभेदात् पुनः त्रिविधम्। महाकाव्यखण्डकाव्यादि भेदात् पद्यकाव्यमनेकविधम्। कथाख्यायिका भेदात् गद्यकाव्यं बहुविधम्। गद्यं नाम भाषायाः प्राकृतिकं स्वरूपम्। संस्कृतगद्यसाहित्यं पद्यसाहित्यादपि प्रचीनतरम्। गद्यसाहित्यस्य प्रथमं रूपं भाषितभाषया आरभते।

पद्यं नियतवर्णावसानं पादबद्धं च। कदाचित् पद्ये इव गद्येऽपि लयात्मकता संजाता। सुबन्धुप्रारब्धा गद्यकाव्यपराम्परा इदानीमपि अनस्यूतं प्रवहति। सुबन्धोः वासवदत्ता गुणाढ्यस्य बृहत्कथा बाणभट्टस्य हर्षचरितं कादम्बरी च गद्यकाव्येषु प्रसिद्धाः ग्रन्थाः भवन्ति। अस्मिन् भागे सामान्येन संस्कृतगद्यपरिचयः बाणभट्टः, बाणभट्टस्य कृतयः, कादम्बरीसंग्रहः चाधिकृत्य पठामः।

### मुख्यपदानि (Keywords)

काव्यविभागः - भेदत्रयं - भाषायाः प्राकृतिकं स्वरूपं - आदिमः प्रसिद्धः गद्यकाव्यं - गुणाढ्यस्य बृहत्कथा - बाणभट्टस्य हर्षचरितं कादम्बरी च - प्रथमं चरित्रकाव्यम् - प्रसिद्धाः कथाग्रन्थाः।

**Discussion**

### 5.1.1 संस्कृतगद्यपरिचयः

दृश्यश्रव्यविभागेन काव्यस्य विभागद्वयं वर्तते। कवेः कर्म काव्यम्। क्रान्तदर्शी कविः स्वभावनया सर्वमपि पश्यति। कविः भeवनासम्पन्नः। गद्यपद्यमिश्रमिति अपरः काव्यविभागः वर्तते। महाकाव्यखण्डकाव्यादिभेदात् गद्यकाव्यमपि बहुविधम्। मिश्रकाव्यं चम्प्वादीरनेकविधम्

अपादः पदसंघातो गद्यमिति दण्डी। भाषायाः स्वातन्त्र्येण प्रयोगः यत्र वर्तते तत् गद्यम्। भाषायाः प्राकृतिकं स्वरूपं गद्यमेव। गद्यते इति गद्यम्। गद्यम् अनियतवर्णावसानम्। पद्यं तु नियतवर्णावसानं पादबद्धमेव। गद्यादेव पद्यसम्भवः। कविः यदेवनुभवति तदेव प्रथमं मनसि पतति। तस्यानुसारस्य गद्यमयं रूपमेव। साहित्यस्य मौलिकं रूपं गद्यमेव। संस्कृतगद्यसाहित्यं पद्यसाहित्यादपि प्राचीनतरम्। कालान्तरे गद्येऽपि कृत्रिमता संजाता। यद्यपि ओजोभूयस्त्वमेव गद्यस्य साहित्यत्वे प्रमाणं संजातं तथापि गद्ये स्वाभाविकता न नष्टा। संस्कृतभाषायां प्रायेण पद्यस्य नितरां प्रचुर्यं दृश्यते। “गद्यं कवीनां निकषं वदन्ति” इति उक्तिरप्यस्ति। साहित्यदर्पणे गद्यस्य चतुर्विदभेदाः निर्दिष्टाः।

संस्कृतसाहित्ये गद्यसाहित्यस्य आरम्भः वेदाकालादेव आरब्धः तथापि द्वितीयं रूपं कवेः सुबन्धोः कालादारब्धम्। सः कालः प्रायेण क्रिस्त्वनन्तरं षष्ठ - सप्तमशतकमेव। गद्यकाव्यस्य पञ्चाशदधिकसहस्रवर्षादिकं दैर्घ्यमस्ति। गद्यकाव्यं कथा आख्यायिका चेति द्विविधं भवति। कथा कविकल्पिता वस्तुपात्रादिविषया। यथा बृहत्कथा। ऐतिहासिकवृत्तधारा आख्यायिका। यथा हर्षचरितम्। कथा नायकेनैव अन्येन वा वाच्या। आख्यायिका स्वयं नायकेनैव कथिता। किन्तु दण्डिनः मते अयं भेदः न गणितः। कतिपयानां गद्यकाव्यानां विवरणमधो दीयते।

**1. सुबन्धुः - वासवदत्ता (7th C -A -D )**

संस्कृतगद्यसाहित्ये नितरां प्रसिद्धः भवति वासवदत्ता नामकः सुबन्धुकविप्रणीतः ग्रन्थः। अयं ग्रन्थः आख्यायिकाविभागे अन्तर्भवति। सोऽयं सुबन्धुः क्रिस्त्वनन्तरं सप्तमशतकीयः इति चरित्राकाराः वदन्ति। सः मगधराजस्य बिन्दुसारस्य सभापण्डितः आसीत्। सुबन्धुना रचितं काव्यं पठितुं राजा बिन्दुसारः महान् क्लेशः अनुभूतवान्। काव्यमिदं सरलया रीत्या लेखितुं राजा कविं निर्दिदेश। काव्यसौन्दर्यं विनष्टं भवेदिति चिन्तया सुबन्धुः राज्ञः निर्देशं नाङगीचकार। तेन कुपितः राजा कविं राज्यात् निष्कासितवान्। कौशाम्बीं गत्वा कविं वत्सेशराजः स्वीचकार इति श्रूयते। सुबन्धोः बाणपूर्ववर्तित्वे बाणभट्ट एव प्रमाणम्। हर्षचरिते बाणः एवं सूचयति।

**'कवीनामगलद्दर्पो नूनं वासवदत्तया**
**शक्त्येव पाण्डुपत्राणां गतया कर्णगोचरम्'।**

इति नायकस्य कन्दर्पकेतोः नायिकायाः वासवदत्तायाः च प्रेमकथा एवात्र वर्ण्यविषयः। स्वप्ने कन्दर्पकेतुः कुसुमराजकुमारीं वासवदत्तां पश्यति। तस्याम् आकृष्टचित्तः सः तस्या अन्वेषणाय सुहृदा मकरन्देन सह चलति। देशान्तरं भ्रमन् सः विन्ध्याचलं प्राप्नोति। एवं वासवदत्तापि स्वप्ने कामतुल्यं कन्दर्पकेतुं दृष्ट्वा तस्मिन् आकृष्टचित्ता बभूव। तमन्वेष्टुं काञ्चन सारिकां प्रेषयति। विन्ध्याटव्यां प्राप्तः कन्दर्पकेतुः यादृच्छिकरूपेण शुकसारिकयोः संवादमाकर्ण्य नायिकायाः प्रेमवस्थां ज्ञात्वा कुसुमपुरं गच्छति। राजकुमारीं दृष्ट्वा तया सह मायाशिवमारुह्य इतस्ततः सञ्चार्य तौ विन्ध्याटवीं प्राप्नुवन्तः। तत्र निद्रावशं कन्दर्पकेतुं विहाय वनशोभया आकृष्टा वासवदत्ता कियन्मात्रदूरं गता तदा किरातैः अपहृता। तस्या प्राप्त्यर्थं किरातैः कलहायमाने अवसरे वासवदत्ता रक्षां प्राप। किन्तु सा अज्ञात्वा स्त्रीनिषिद्धं आश्रमं प्रविश्य शिलारूपेण परिणातिं प्राप।

निद्रातः विमुक्तः कन्दर्पकेतः वासवदत्तामदृष्ट्वा अन्वेषणाय यतते। अन्ते सः तामेव शिलां स्पृशति। तत्स्पर्शनमात्रेण वासवदत्ता स्वकीयं पूर्वशरीरं प्राप्नोति। मकरन्दः अत्रान्तरे अत्रैव आगच्छति। ते स्वपुरं गत्वा सुखमवसन्।

**2. गुणाढ्यस्य बृहत्कथा (6th C .A .D )**

बृहत्कथा गुणाढ्यस्य कृतिरेव। उपलभ्यमानसंस्कृतकथाग्रन्थे प्राचीनतमः भवत्ययं ग्रन्थः। पैशाचीनामिकायां अपभ्रंशभाषायमेव अस्य ग्रन्थस्य रचना कृता। तस्य कवेः कालः क्रिस्त्वनन्तरं षष्टं शतकमिति मन्यन्ते गवेषकाः।

कथासरित्सागरे उत्तमस्ति यत् गुणाढयः राज्ञः सातवाहनस्य सभापण्डितः आसीदिति। अत्र काचन कथा श्रूयते। राजा सातवाहनः संस्कृतभाषानभिज्ञः आसीत्। एकदा जलक्रीडायां राज्ञ्या 'मोदकैस्ताडय' इत्युक्तिं श्रुत्वा राजा मोदकान् आनाय्य तैः प्रहर्त्तुमारभत। तदा 'मा उदकैः' इति ज्ञातः लज्जाकुलः राजा संस्कृतं जिज्ञासुः पण्डितान् प्रार्थयामास। तदा गुणाढ्येन षड्भिः वर्षैः राजानं संस्कृतपण्डितं कर्तुं प्रतिज्ञातवान्। अन्यः पण्डितः षड्मासैरेव तत्करणाय सन्नद्धः बभूव। तदा पराजितः गुणाढयः राजद्वारं संस्कृतं प्राकृतं च त्यक्त्वा विन्धाटवीं प्राप।

हताशः गुणाढ्यः स्वग्रन्थं कानने वन्यमृगाणां पुरतः वाचयित्वा अग्नौ समर्पितवान्। अन्तिमं लक्षपरिमितं विहाय सर्वे श्लोकाः विनष्टाः। सातवाहनस्य हस्ते अन्तिमं भागं संप्राप्तम्। तस्मिन् नरवाहनदत्तस्य चरित्रमेव अवशिष्टम्।

बृहत्कथा अनेकधा प्रशस्तम्। ग्रन्थस्यास्य त्रीणि संस्करणानि लभ्यन्ते - बृहत्कथा-श्लोकमञ्जरि, बृहत्कथामञ्जरी, कथासरित्सागरश्च।

**3. दण्डी - दशकुमारचरितम् - अवन्तिसुन्दरीकथा (7th C. A. D)**

संस्कृतगद्यसाहित्ये आलङ्कारिकमण्डले च लब्धप्रतिष्ठः भवति आचार्यदण्डी। सः महाशयः क्रिस्त्वब्धे सप्तमे शतके स्वजीवितेनेमं लोकं पालयामास। त्रयः ग्रन्थाः तेन रचिताः। दण्डिना गद्यकाव्यद्वयं रचितम्। दशकुमारचरितम् अवन्तिसुन्दरीकथा च।

**जाते जगति वाल्मीकौ कविरित्यभिधाऽभवन्।**

**कवी इति ततो व्यासे कवयस्त्वयि दण्डिन।।** इति श्लोकं दण्डिनः महत्वं सूचयति।

कौशिकगोत्रे संजातः कश्चन ब्राह्मणः भवति दण्डी। दण्डी इति नाम यथार्थं वा नवेति संशयः इदनीमप्यस्ति। दण्डिनः पिता वीरदत्तः, माता गौरी चेति आस्ताम्।

दण्डिनः प्रथिते गद्यकाव्ये दशकुमारचरिते पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका चेति त्रयः भागाः सन्ति। दशकुमारचारिते दशानां कुमाराणां पौरुषपराक्रमवर्णना वर्तते। मगधेशराजस्य पुत्रस्य राजवाहनस्य मित्राणां नवानां च सञ्चारः देशाटनानुभवाः चा अस्मिन् ग्रन्थे उपवर्णिताः।

दण्डिनः पदलालित्यं प्रसिद्धमेव। तस्य प्रसादमधुराणि वचांसि हृदयावर्जकानि भवन्ति। अलङ्कारप्रियः सः कविः अनुप्रासे यमके च नितरां तात्पर्यं प्राकटयत्।

दण्डिनः गद्यकाव्येषु अन्यतरः भवति अवन्तिसुन्दरीकथा। अवन्तिदेशस्य राजकुमारी अवन्तिसुन्दरी एव अत्र नायिका। राजवाहनः नायकः। कतिपयैः पद्यैः ग्रन्थरचना आरब्धा। तस्मिन् भागे वाल्मीकि -व्यास -सुबन्धु -गुणाढ्यादीनां कवीनां परामर्शः सन्ति। पुनः गद्येन ग्रन्थरचना कृता।

दण्डिनमधिकृत्य ओजः समासभूयस्त्वमेतत् गद्यस्य जीवितम् इति यदुच्यते अवन्तिसुन्दरिकथायां पूर्णतः चारितार्थं भवति।

**4. धनपालस्य तिलकमञ्जरी (10th C-A .D)**

तिलकमञ्जरी संस्कृतसाहित्ये प्रमुखं स्थानं वहति। अस्य ग्रन्थस्य कर्ता धनपालः धाराराज्यस्य मुञ्जस्य सभापण्डितः आसीत्। क्रिस्त्वनन्तरं दशमं शतकमेवास्य जीवनकालः। अस्मिन् ग्रन्थे भूमिकायां प्राचीनान् कविश्रेष्ठान् स्मरति। वाल्मीकिव्यास प्रवरसेनकालिदासादीन् स्मृत्वा ग्रन्थरचना आरब्धा।

बाणस्य शैली अनेन कविना स्वीकृता इति केचन समालोचकाः वदन्ति। ओड्यदेवस्य (वादीभ सिंहस्य) गद्यचूडामणिः(गद्यचिन्तामणिः) (12-C.A D)

द्वादशशतके जातेन ओड्यदेवेन रचितः गद्यकाव्यं भवति गद्यचूडामणिः। राजपुत्रस्य जीवनधरस्य चरितमस्मिन् काव्ये वर्णयति। अयं कविः वादीभसिंहसूरिः इति नाम्नापि प्रसिद्धः। 'लम्ब ' इति नाम एव अध्यापयस्य स्थाने दृश्यते।

**5. विश्वेश्वरपाण्डेयस्य मन्दारमञ्जरी (18th.C .A .D)**

बाणभट्टस्य कादम्बर्याः शैलीमनुकुर्वन् विश्वेश्वरपाण्डेयः मन्दारमञ्जरीं नाम कथाग्रन्थं रचितवान्। यद्यपि तेनानेके ग्रन्थाः रचिताः तथापि नव ग्रन्थाः प्रकाशिताः इति ज्ञातुं शक्यते।

गद्यकाव्यसाहित्ये मन्दारमञ्जरी प्रमुखं स्थानं वहति। राजशेखरः कुसुमपुरस्य राजा। तस्य पुत्रः भवति चित्रभानुः, चित्रभानोः मन्दारमञ्जर्याः च प्रेम एव अत्र वर्णितम्। नायिकानायकयोः समागमपर्यन्ता कथा चित्रिता। अयं ग्रन्थः अपूर्णः। कवेः आकस्मिकमरणमेवात्र कारणम्। पुनः विश्वेश्वरस्य केनचित् शिष्येण ग्रन्थस्य उत्तरभागः पूरितः इति श्रूयते। महापण्डितः अयं कविः क्रिस्तोः अष्टादशशतकस्य प्रथमपादे अजायत। सोऽयं चात्वारिंशद्वर्षपर्यन्तं जिजीव। बाल्यादारभ्य ग्रन्थरचनायां व्यापृतः अजीवं सरस्वतीसेवया कालं निनाय।

पण्डिताग्रेसरः लक्ष्मीधरः भवति अस्य कवेः पिता। विश्वेश्वरस्य पुत्रः जयकृष्णोऽपि कुलमहिमां संवर्धयामास।

**6. कृष्णपण्डितस्य रत्नावली (18th-C .A .D)**

महाकवेः श्रीहर्षस्य रत्नावली नाम नाटिका श्रेष्ठा। रत्नवली नामधेयेन किञ्चन गद्यकाव्यमप्यस्ति। कृष्णपण्डितः एव रत्नावली नाम गद्यकाव्यस्य कर्ता। सोऽयं अष्टादशशतके धर्माधिकारवंशे अजायत।

गन्धर्वराजकुमार्याः रत्नावल्याः नागराजकुमारेण रत्नचूडेन सह परिणयः अस्य प्रतिपाद्यविषयः। मौलिकः अयं ग्रन्थः काव्यगुणैरलंकृतः। बाणस्य शैलीमनुकुर्वन् कविः दीर्घसमासयुक्तानि वाक्यानि निर्लोभं काव्ये योजयति। श्लेषप्रयोगेण पदलालित्येन च शोभमानं काव्यमिदं नातिदीर्घं पूर्णं सुखपर्यवसानं च भवति।

**7. अम्बिकदत्तव्यासस्य शिवराजविजयः**

नवदशशतके पाटलीपुत्रे जातः अम्बिकादत्तव्यासः शिवराजविजयः नाम गद्यकाव्यं रचितवान्। चरित्रपरः अयं कथाग्रन्थः। शिवाजीवीरस्य जीवनम् आख्यायिकारूपेणास्मिन् चित्रितम्। वीरपराक्रमी शिवाजी स्वबाहुबलेन महाराष्ट्रस्य सम्राट् समजायत। भारतीयनाविकसेनायां सः परिष्कारादिकं कृतमिति श्रूयते। वीरप्रधानेऽस्मिन् काव्ये वैदर्भीरीतिः तथा प्रसादगुणः च बाहुल्येन दृश्यते।

**8. रामशरणस्य कौमुदीकलाकल्लोलिनी (19th-C .A .D )**

कौमुदीकलाकल्लोलिनी नामकः कथाग्रन्थः काष्मीरदेशस्य रामशरणस्य कृतिः भवति। अस्मिन् काव्ये कथामाध्यमेन व्याकरणप्रयोगाः शिक्षिताः। पण्डिताग्रेसरे तस्मिन् कवित्वं पाण्डित्यं च युगपत् प्रशोभते। अयं कविः ऊनविंशतितमे शतके जीवितवान्। भावनया सः समकालिकान् सर्वान् कवीन् अतिशेते। उदयनपुत्रस्य नरवाहनदत्तस्य जन्मत आरभ्य अभिषेकपर्यन्ता कथा अस्मिन् ग्रन्थे सूचिता।

## 5.1.2 बाणभट्टः

संस्कृतगद्यसाहित्ये महाकविः बाणभट्टः महोन्नतं स्थानमर्हति। सप्तमेशतके जातः सः हर्षवर्धनमहाराजस्य आस्थानकविरासीत्। अयं हर्षवर्धनः स्थाणीश्वरस्य (तानेश्वरस्य )राजा आसीत्। इदानीन्तनः कानूज् नगरः एव स्थाणीश्वरस्य हर्षवर्धनस्य भरणकाले ६०६ तः ६४७ पर्यन्तमासीत्।

बाणभट्टस्य पिता चित्रभानुः, माता राजादेवी चास्ताम्। पिता वात्स्यायनगोत्रे हिरण्यबाहू नद्या तीरे प्रीतिकूटग्रामे जातः आसीत्। इदानीं बीहार्देशे छप्रप्रविश्यायामेव अयं ग्रामः। बाणभट्टस्य चतुर्दशे वयसि पिता ममार। पुनः सः वयस्यैः सह इतस्ततः भ्रमन् अलसजीवितं निनाय। तथापि सः विद्यापारङ्गतः आसीत्। भ्रमणानुभवाः तस्य काव्यरचानायै साहाय्यकभवन्। पश्चात् कृतोद्वाहः सः

स्वस्थो बभूव। तस्य विद्यापाटवं ज्ञात्वा हर्षः तं सभापण्डितत्वेन अङ्गीचकार। तदानीं तस्य बाणभट्टस्य वयः केवलं पञ्चविंशतिरासीत्।

साहित्यलोके बाणभट्टः साहित्यपञ्चाननः इति पुरस्कारार्हः भवति। तस्य कृतौ सुबन्धोरिव श्लेषघटना कालिदासस्य इव रसपाकः भर्तृमेण्डस्येवालङ्कारसिद्धिः भारवेरिवार्थगौरवं गुणाढ्यस्येव कथावर्णनं च लभते।

### 5.1.3 बाणभट्टस्य इतर कृतयः

#### 1. हर्षचरितम्

हर्षचरितमेव संस्कृतसाहित्ये आविर्भूतं प्रथमं-चरित्रकाव्यम्। बाणभट्टस्य जीवितकाले प्रचलिताः राष्ट्रीय-साम्पादिक-सामूहिक-धर्मपराः-जीवितरीतयः सुष्टु हर्षचरिते सूचिताः। श्लेष-घटनायां रसाविष्करणे अलङ्कारप्रयोगे अर्थगौरवे कथावर्णनायां च कविषु अग्रगण्यः समजायत।

#### 2. कादम्बरी

कादम्बरी सर्वान् गद्यसाहित्यग्रन्थान् गाम्भीर्येण वर्णनाचातुर्येण च अतिशेते। कल्पना-वैचित्र्येण अलङ्कृता इयं कृतिः संस्कृतसाहित्ये आचन्द्रतारं देदीप्यते। बाणभट्टेन अस्पृष्टं किमपि वस्तु काव्यलोके न दृश्यते। उक्तं च "बाणोच्छिष्टं जगत्सर्वम्" इति। संस्कृतसाहित्ये नवः युगः बाणेन आरब्धः तेन सूचितं भवति यत् - नवोऽर्थोजातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः' विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् इति। सूक्तिरियं 'रसेन शय्यां स्वयमभ्युगताऽभित्वा वधूरिव मनोहराणि हृद्या च विद्यते' इति। बाणस्य बुद्धिः नवनवोन्मेषशालिनी दृश्यते।

#### इतरकृतयः -

हर्षचरितकादम्बर्यातिरिक्ताः केचन कृतयोऽपि सन्ति। चण्डीशतकं, शिवाष्टकं, मुकुटताडितकं(रूपकं), शारद्वचन्द्रिका (नाटिका)पार्वतीपरिणयः (नाटकं)च भवन्ति। चण्डीशतके शतश्लोकैः देवीं स्तौति। शैवधर्मालम्बितत्वात् शिवाष्टकस्य कर्ता बाणो न वेति कार्ये सन्देहः। किन्तु मुकुडताटिकस्य शारदाचन्द्रिकायाः च कार्ये चरित्रकाराः भिन्नाभिमतं प्रकटयन्ति।

### 5.1.4 कादम्बरीसंग्रहः

कादम्बरीग्रन्थः पण्डितेभ्यः रसावहः एव। श्रूयते च 'कादम्बरीरसज्ञानां आहारोऽपि न रोचते। बाणस्य कृतौ क्लिष्टता अलङ्कारबाहुल्यम्, समूहबद्धविशेषणदुरूहवाक्यानि समस्तपदबाहुल्यम्, असाधारणपदावली, अप्रचलितप्रयोगश्च च दृश्यन्ते। सामान्यजनेभ्यः कदाचित् बाणस्य शैलीं ज्ञातुं प्रयासः वर्तते। अतः हर्षचरितं कादम्बरीं च संगृह्य लिख्यते चेद्वरमिति चिन्ता संजाता। तदनुसारं कालान्तरे बहवः ग्रन्थाः समजायन्त। तेषु मञ्जुनाथस्य कादम्बरीसारः गौडाभिनन्दस्य कादम्बरीकथासारः कृष्णमाचार्यमहाशयस्य कादम्बरीसंग्रहः च प्रसिद्धाः। कृष्णमाचारी तु 'अभिनवभट्टबाण' 'शब्दतर्कालंकारविद्याभूषण' तथा पण्डितराजः इति पुरस्कारैः प्राप्तवान् एव।

बाणभट्टस्य कादम्बरीं पूर्णतः पठितुं वाचयितुं आस्वादयितुं इदानीं छात्रेभ्यः पर्याप्तः समयः नास्ति। अपि च कादम्बरीरूपे कानने वृक्षबाहुल्यात् प्रवेष्टुमवसरः न सिद्ध्यति। अतः आचार्यः कृष्णमाचारी छात्रेभ्यः सहृदयेभ्यः च प्रवेशनाय कादम्बरीं संक्षिप्य अलिखत्। अस्मिन् कादम्बरीसंग्रहे बाणस्य शैल्यां वाक्यघटनायाम् अलङ्कारप्रायोगे वा न्यूनता न कृता। विस्तृतां वर्णनां लघ्वीचकार।

कादम्बरीसंग्रहस्य कर्ता कृष्णमाचारी सूचयति यद् बहुवारं दशवर्षाधिककालं कादम्बर्या सह पठन-गवेषण-पाठनादिषु काव्येषु व्यापृतोऽसीत्। प्रतिपठनं नूतनाः आशयाः पूर्वमदृष्टाः चिन्ताधाराः मनसि जायन्ते इति। अर्थात् प्रतिवाचनं नवनवकार्याणि आस्वादनाय शक्यते।

संसकृतभाषायाः सर्वत्र प्रचारणाय कवेः कृष्णमाचार्यमहाशयस्य यत्नः सफलं बभूव। बाणं तस्य शैलीं भावनां च ज्ञातुं सहृदयेभ्यः बहुधा सहाय्यकमभूत् अस्य ग्रन्थस्य रचना। सोऽयं महात्मा विंशतिशतकस्य पादे इदं गद्यरत्नं रचितवान् इति ज्ञातुं शक्यते।

- **पद्यमपेक्ष्य गद्यस्य प्राधान्यम्।** अपादः पदसंघातो गद्यमिति दण्डी। भाषायाः स्वातन्त्र्येण प्रयोगः यत्र वर्तते तत् गद्यम्। भाषायाः प्राकृतिकं स्वरूपं गद्यमेव। गद्यते इति गद्यम्। गद्यम्

अनियतवर्णावसानम्। पद्यं तु नियतवर्णावसानं पादबन्धमेव। गद्यादेव पद्यसम्भवः। कविः यदेव अनुभवति तदेव प्रथम मनसि पतति। तस्यानुभवस्य गद्यमयं रूपमेव। साहित्यस्य मौलिकं रूपं गद्यमेव। संस्कृतगद्यसाहित्यं पद्यसाहित्यादपि प्राचीनतरम्।

- **कवीनामगलयत् दर्पो नूनं वासवदत्तया।** सुबन्धुकवेः वासवदत्तानामकं कथाग्रन्थमधिकृत्य बाणभट्टः एवं सूचयति। संस्कृतगद्यसाहित्ये नितरां प्रसिद्धः भवति सुबन्धुः नाम कविश्रेष्ठः। वासवदत्ता नाम ग्रन्थोऽयं अतीव श्रेष्ठः। कवीनामहङ्कारान् दूरीकर्तुं वासवदत्ता इति नाम्ना प्रसिद्धेन ग्रन्थेन साधितमभूत्।
- **दण्डिनः कथाग्रन्थौ।** संस्कृतगद्यसाहित्ये आलङ्कारिकमण्डले च लब्धप्रतिष्ठः भवति आचार्यः दण्डी। तेन महात्मना त्रयः ग्रन्थाः रचिताः। द्वौ कथाग्रन्थौ एकः आलङ्कारिकग्रन्थः, काव्यादर्शः च।

दण्डिनः गद्यकाव्ये भवतः दशकुमारचरितम्, अवन्तिसुन्दरीकथा च। दशकुमारचरिते त्रयः भागाः -पूर्वपीठिका, दशकुमारचरितम् उत्तरपीठिका च। दशकुमारचरिते दशानां कुमाराणां पौरुषपराक्रमवर्णना वर्तते। मागधेशराजस्य पुत्रस्य राजवाहनस्य तन्मित्राणां नवानां च सञ्चारः देशाटनानुभवः चास्मिन् ग्रन्थे वर्णयति। अवन्तिसुन्दरीकथायाः नायिका अवन्ति- देशस्य राजकुमारी अवन्दिसुन्दरी एव। राजवाहनः नायकः। दण्डिनः पदलालित्यं प्रसिद्ध- मेव। तस्य प्रसादमधुराणि वचांसि हृदयावर्जकानि भवन्ति। आलङ्कारप्रियः स कविः अनु प्रासे यमके च नितरां तात्पर्यं प्राकटयत्।

- **हर्षचरितम्।** हर्षचरितमेव संस्कृतसाहित्ये आविर्भूतं प्रथमं चारित्रकाव्यम्। बाणभट्टः हर्षचरिते हर्षस्य जीवचरितं लिलेख। तस्मिन् अष्टौ उच्छ्वासाः(अध्यायाः) सन्ति। हर्षस्य वंशवर्णना हर्षपूर्वजस्य पुष्पभूतेः वर्णना, हर्षकुटुम्बवर्णना च सूचिताः। अपूर्णा इयं कृतिः। कारणं तु हर्षस्य राज्ञः वधमेव भवेत्। बाणोऽपि हर्षनिधनानन्तरं बहुकालं नैव जीवितः। बाणभट्टस्य जीवितकाले प्रचालिता राष्ट्रिय-सांस्कारिक-सामूहिक-धर्मपरा-जीवितरीतयः

हर्षचरिते सूचिताः। श्लेषघटनायां रसाविष्करणे अलङ्कारप्रयोगे अर्थगौरवे कथावर्णनायां च बाणभट्टःकविषु अग्रगण्यः समजायत।

## पुनरावृत्तिः (Recap)

- दृश्यश्रव्यविभागेन काव्यस्य विभागद्वयम्।
- संस्कृतसाहित्ये गद्यसाहित्यस्य आरम्भः वेदाकालादेव।
- गद्यकाव्यं कथा आख्यायिका चेति द्विविधं भवति।
- संस्कृतसाहित्ये नितरां प्रसिद्धा भवति वासवदत्ता।
- उपलभ्यमानसंस्कृतकथाग्रन्थेषु प्राचीनतमः भवति गुणाढ्यस्य बृहत्कथा।
- दण्डी -ओड्यदेवकृष्णपण्डित - अम्बिकादत्तः - रामशरणादयः प्रमुखाः गद्यरचनाकर्तारः भवन्ति।
- तिलकमञ्जरी - मन्दारमञ्जरी - रत्नावलीप्रभृतयः प्रमुखाः कथाग्रथाः।
- बाणभट्टस्य कृतयः भवन्ति हर्षचरितं, कादम्बरी, चण्डीशतकादयः।
- कृष्णमाचारीमहाशयेन कादम्बरीसंग्रहः रचितः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भाषायाः प्राकृतिकं स्वरूपं किम्?
2. दण्डिनः मते गद्यलक्षणं किम्?
3. वासवदत्तायाः कर्ता कः?
4. बृहत्कथायाः कर्ता कः?
5. केन रचितं दशकुमारचरितम्?
6. धनपालस्य प्रसिद्धं गद्यकाव्यं किम्?
7. गद्यचिन्तामणिः इत्यस्य लेखकः कः?
8. मन्दारमञ्जरी नाम कथाग्रन्थस्य कर्ता कः?
9. कृष्णपण्डितस्य रचना का?
10. शिवराजविजयस्य कर्ता कः?
11. संस्कृतसाहित्ये आविर्भूतं प्रथमं चरित्रकाव्यं किम्?

12.कादम्बरीसंग्रहस्य कर्ता कः ?
13.किं कवीनां निकषं भवति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।
**(Answer the following questions in one or two sentences)**

1. कव्यभेदेषु गद्यकाव्यस्य प्राधान्यं किम् ?
2. काव्यस्य विभागद्वयं किम् ?
3. गद्यकाव्यं द्विविधं भवति -ते के ?
4. बाणस्य रचनाः काः ?
5. हर्षचरितम्-लघुटिप्पणीं लिखत ।

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. पद्यमपेक्ष्य गद्यस्य प्राधान्यं किम् ?
2. कवीनामागलत् दर्पो नूनं वासवदत्तया- ससन्दर्भं आशयं विशदयत ।
3. दण्डिनः कथाग्रन्थौ कौ ? विशदयत ।
4. 'संस्कृतसाहित्ये बाणभट्टस्य स्थानं' किम् ? विशदयत ।

## निर्दिष्टाभ्यासः (Assignments)

1. संस्कृतगद्यसाहित्यं विविधं विपुलं च वर्तते-विशदयत ।
2. संस्कृतग्द्यसाहित्ये बाणभट्टः दण्डी सुबन्धुः इत्यादयः प्रमुखाः गद्यरचनाकर्तारः भवन्ति - विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. गद्यम्।
2. अपादः पदसंघातो गद्यमिति दण्डी।
3. सुबन्धुः।
4. गुणाढ्यः।
5. दण्डी।
6. तिलकमञ्जरी।
7. वादीभसिंहः।
8. विश्वेश्वरपाण्डेयः।
9. रत्नावली।
10. अम्बिकादत्तव्यासः।
11. हर्षचरितम्।
12. कृष्णमाचारी
13. गद्यम्

## सूचनाग्रन्थाः (References)


1. A Short History of Sanskrit Literature T.K.Ramachandra Iyer, R.S.Vadyar & Sons, Palakkad.
2. कादम्बरी संग्रहः, आर्.वि.कृष्णमाचार्यः (पूर्वभागः - पम्पाभिधानं पद्मसरः इत्येतावत् पर्यन्तम्)
3. कादमबरी - बाणभट्टः।

# Unit - 2
## शूद्रकः - दिनचर्या - मातङ्गकुमारीप्रवेशः

### उद्देश्यानि (Learning Outcomes)

- संस्कृतगद्यकाव्येषु कादम्बर्याः स्थानमवगच्छाति।
- बाणभट्टस्य वर्णनापाटवं गृह्णाति।
- कथाकथनस्य सौकुमार्यं जानाति।
- कादम्बरीसंग्रहे कथापात्ररूपेण प्रशोभमानं शूद्रकराजं तस्य राजधानीं चाधिकृत्य वर्तमानां वर्णनां गृह्णाति।

### प्राग्व्यपेक्षाः (Prerequisites)

कृष्णमाचार्यः कादम्बरीसंग्रहं रचितवान्। कादम्बरीविषये पण्डिताः आदरं प्रकटयन्ति। बाणभट्टस्य शैली तु अनितरसाधारणी भवति। उक्तं च 'कादम्बरीरसज्ञाने आहारोऽपि न रोचते' इति। पण्डितानां हृदयतोषिकायां अस्यां कृतौ क्लिष्टता नास्ति। साधारणजनेभ्यः अप्रचालितप्रयोगं असाधारणेन नैपुण्येन युक्तां पदावलीं समासबाहुल्यम् च ज्ञातुं न शक्यते। कादम्बरीं पूर्णतः ज्ञातुं वागर्थगम्भीर्यं ग्रहीतुं च छात्रैः न शक्यते। तदर्थं पर्याप्तः अवसरोऽपि न मिलिष्यति। अस्मिन्नवसरे कादम्बरीसंग्रहस्य कर्ता आचार्यः कृष्णमाचारी छात्रेभ्यः सहृद्भ्यश्च कादम्बरीप्रवेशनाय कथामिमां संक्षिप्य लिखितवान्। कादम्बरीसंग्रहे बाणस्य शैल्यां वाक्यघटनायाम् अलङ्कारप्रयोगे वा न्यूनता न कृता। विस्तृतां वर्णनां लघ्वीचकार इत्येव विशेषः।

अयं ग्रन्थकर्ता "अभिनवबाणभट्टः' शब्दतर्कालङ्कारविद्याभूषणः 'पण्डितराज' इत्येतैः पुरस्कारैः विश्रुतः सः। विंशतिशतकस्य प्रथमे पादे जीवितमधारयत्। कादम्बर्याः संग्रहरूपेण वर्तमाने कादम्बरीसंग्रहे शूद्रकराजं तस्य राजधानीं चाधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

शूद्रको नाम राजा - विदिशाभिधाना नगरी - नातिदूरोदितो भगवति सहस्रमरिचिमालिनि - दक्षिणपथादागता चण्डालकन्यका - प्रतीहारी तां मातङ्गकुमारीं प्रावेशयत्- सा राजानमद्राक्षीत्।

## Discussion

### 5.2.1. शूद्रकः

**1. आसीदशेष-नरपति-शिरः समभ्यार्चितशासनः पाकशासन इवापरः चतुरुदधिमेखलाया भुवो भर्ता, प्रतापानुरागावनत-समस्त-सामन्तचक्रः कर्ता महदाश्चर्याणाम् आहर्ता क्रतूनां, आदर्शः सर्वशास्त्राणाम्, उत्पत्तिः कलानाम् कुलभवनं गुणानाम्, आश्रयो रसिकानाम्, राजा शूद्रको नाम।**

(**टिप्पणिः** - अशेषा: सर्वे। नरपति : - राजा। शासनं -आदेश :। पाकशासनः -इन्द्रः। अपरः -अन्यः। भुवः भर्ता - पृथिव्याः अधिपतिः। अवनतम् - नम्रीभूतं (वशीभूतं)। सामन्तचक्रं - अधीनस्थं राजमण्डलम्। कर्ता - निष्पादकः। आहर्ता - अनुष्ठाता। क्रतूनां -यागानां। उत्पत्तिः -जन्मस्थानम्। गुणानां - दयादाक्षिण्यादि गुणानाम्)

**संक्षिप्तम् -** शूद्रकः नाम राजा आसीत्। सः अपरः इन्द्रः इवासीत्। सर्वे राजानः शूद्रकस्य पुरतः नम्रशिरस्का: अभवन्। सः शूद्रकः समुद्रपर्यन्तं व्याप्तां वसुधां बभार। प्रतापेन प्रेम्णा च सर्वान् सामान्तराजान् सः वशीकृतवान्। शत्रुपराजयाद्यद्भुतानि राजा शूद्रकः कृतवान्। सः यागादिकं चकार। नृत्यगीतादिकलानां जन्मस्थानं स एव। सः दयादाक्षिण्यादिगुणैरूपेतः आसीत्। रसिकान् सः संरक्षयामास।

**2. यश्च मनसि धर्मेण, कोपे यमेन प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन तेजसि सवित्रा च वसतः सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।**

(**टिप्पणिः** - शूद्रकस्य गुणान् वर्णयति। मनसि -चित्ते। मनसि धर्मेण इत्यस्य मनसि धर्मस्य वासः। कोपे यमेन क्रोधे यमराजस्य वासः। वाचि-वाण्यां। शशिना-चन्द्रेण। प्रज्ञायां-मनीषायां। मनसिजेन-कामेन। मनसि जातः मनसिजः, तेन मनसिजेन। सवित्रा- सूर्येण। प्रकटितविश्वरूपाकृतेः- प्रकाशितभगवद्रूपाकारस्य। प्रकटितविश्वरूपाकृतेः + अनुकरोति - प्रकटितविश्वरूपाकृतेरनुकरोति। नारायणस्य - विष्णोः। भगवतः + नारायणस्य - भगवतो नारायणस्य )

**संक्षिप्तम् -** शूद्रकस्य मनसि धर्मदेवः वसति। क्रोधे यमः वसति। प्रसन्नतायां संप्रति कुबेरः वसति। प्रतापे वह्निः बाहौ पृथ्वी नेत्रे लक्ष्मी, वाण्यां सरस्वती मुखे चन्द्रः, पौरुषे पवनः प्रज्ञायां बृहस्पतिः सौन्दर्ये कामदेवः, तेजसि सूर्यः च वसन्ति। यथा भगवतः विष्णोः विभिन्नाः देवताः वसन्ति तथा शूद्रके सर्वे गुणाः सन्ति। अतः शूद्रकः विष्णुसमानः भवति।

**3. यस्य च राज्ञः जलावागाहनगतजयकुञ्जरकुम्भ - सिन्दुर - संध्यायमानसलिलया वेत्रवत्या परिगता विदिशाभिधाना मञ्जरी राजधान्यासीत्।**

(**टिप्पणिः** - शूद्रकस्य राजधानीं वर्णयति। राज्ञः भूपतेः विदिशेति ख्याता राजधानी आसीत्। जले अवगाहनं कर्तुम् आगताः समायाताः (प्रवेशिताः) ये जयकुञ्जराः (शत्रुसमूहविदलने समर्थाः गजाः) तेषां मस्तकेषु स्थितं यत् सिन्दूरं तेन संध्यायमानजलेन युक्तया वेत्रवत्या नद्या परिगता (सर्वदिक्षु वेष्टिता) भवति विदिशा राजधानी)

**संक्षिप्तम् -** शूद्रकभूपतेः राजधानी भवति विख्याता विदिशा। सा वेत्रवत्या नद्या परिवृता भवति।

### 5.2.2 शूद्रकस्य दिनचर्या

**4. स तस्यामवजिताशेष -भुवनमण्डलतया विगतराज्यचिन्ताभारनिर्वृतः, वलयमिव लीलया भुजेन भुवनभारमुद्वहन् अमरगुरूमपि प्रज्ञयोपहसद्भिरनेककुलक्रमागतैरसकृदालोचित नीतिशास्त्र - निर्मल मनोभिरलुब्धैः स्निग्धैः प्रवृद्धैश्च अमात्यैः परिवृतः समानवयोविद्यालङ्कारैः अग्राम्योपहासकुशलै-रिङ्गिताकारवेदिभिः केसरकिशोरकैरिव विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः सुखमतिचिरमुवास।**

(**टिप्पणिः** - सः तस्यामतिचिरं सुखमुवास इति मुख्यं वाक्यम्। तस्यां स्वराज्यधान्यां। अवजितानि - स्वाधीनीकृतानि (स्वायत्तीकृतानि ) विगतराजचिन्ताभारानिर्वृतः - अपगतराज्यभारचिन्तया। सुखमनुभूतः। लीलया - क्रीडया। (क्लेशं विना) उद्वहन् - धारयन्। अमरगुरुं - बृहस्पतिं। प्रज्ञया + उपहसद्भिः + अनेककुलक्रमागतैः + असकृत् + आलोचितनीतिशास्त्रनिर्मलमनोभिः + अलुब्धैः - प्रज्ञयोपहसद्भिरनेककुलक्रमादागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः। अनेककुलक्रमा-गतैः अनेकैः वंशपरम्परागतैः। असकृत् वारं वारम्। आलोचितनीतिशास्त्रनिर्मलमनोभिः सम्यग-धीतानि यानि नीतिशास्त्राणि तैः निर्मलचित्तैः। प्रबुद्धैः + च -प्रबुद्धैश्च। समानवयोविद्यालङ्कारैः समानवयस्कैः विद्याभिः अलङ्कारैः च युक्तैः। ग्रामे भवः ग्राम्यः। न ग्राम्यः अग्राम्यः, नागरिकः उपहासः नर्मवचोविलासः। कुशलाः-समर्थाः। इङ्गितकारवेदिभिः इङ्गितं चेष्टाविशेषः आकाराः आकृतिः च तौ विदन्ति। इङ्गिताकारविदः, तैः इङ्गिताकारवेदिभिः। केसरिकिशोरकैः + इव - केसरीकिशोरकैरिव। केसरिणां (सिंहानां) किशोरैः (शिशुभिः) केसरीकिशोरकैः - विक्रमकेसरैः। प्रतिबिम्बैः + इव - प्रतिबिम्बैरिव। प्रतिबिम्बः - प्रतिमूर्तिः। रममाणः क्रीडन्। अतिचिरं - दीर्घकालम्।

**संक्षिप्तम् -** शूद्रकः स्वराज्यधान्यां विदिशायां दीर्घकालं सुखम् अवसत्। सर्वं भूमण्डलं सः स्वायत्तीकृतवान्। सः राज्यभारं प्रति चिन्तारहितः। (शत्रवः नासन् इति काराणात् ) राज्यभारं क्रीडया इव बभार। प्रज्ञया बृहस्पतिमपि तिरस्कुर्वन्तः कुलक्रमागता मन्त्रिणः तस्य सन्ति। तैः परिवृतः सः समानवयस्कैः विद्याभिः अलङ्कारैः च युक्तैः सदा वर्तते। ते सुहृदः तस्य राज्ञः इङ्गितम्

जानन्ति। सिंहस्य शिशवः इव ते पराक्रमशीलाः च आसन्। ते राज्ञः प्रतिबिमम्बमिव सदा वर्तन्ते। तैः साकं क्रीडन् राजा चिरमवसत्।

**5. तस्य अतिविजिगीषुतया महासत्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्तमानस्यापि रूपवतोऽपि सन्तानार्तिभिः अमात्यैरपेक्षितस्य अपि वनिताव्यतिकरस्यापि द्वेष इवासीत्।**

(**टिप्पणिः** - च + अतिजिगीषुतया - चातिजिगीषुतया। विजेतुमिच्छुः- विजिगीषुः। अतिशयेन विजेतुमिच्छुः अतिजिगीषुः। तस्य भावः अतिजिगीषुता तया अतिजिगीषुतया। अत्यधिकविजयेच्छुकतया। तृणम् + इव - तृणमिव। तृणं -घासादिकं। आकलयतः - संभावयतः। वर्तमानस्य + अपि - वर्तमानस्यापि। सन्तानार्थिभिः सन्तानेच्छुभिः। सन्तानार्थिभिः + अमात्यैः + अपेक्षितस्य + अपि सन्तानार्तिभिरमात्यैरपेक्षितस्यापि। द्वेषः + इव +आसीत्। द्वेष इवासीत्।

**संक्षिप्तम् -** अतिविजिगीषुः सत्यशीलः च भवति शूद्रकः। स्त्रैणं तृणमिव मन्वानः आसीत्। यौवनवस्थायां वर्तमानं सौन्दर्यसम्पन्नं तं सन्तानलाभार्थम् अमात्याः प्रेरिताः सन्नपि स्त्रीविषये सः अतत्परः आसीत्।

**6. सत्यपि लावण्यवती विनयवत्यन्वयवति हृदयहारिणी चावरोधजने स कदाचित् स्वयमारब्ध-मृदङ्गवादायः संगीतकप्रसङ्गेन कदाचित् मृगयाव्यापारेण कदाचित् काव्यप्रबन्धरचनेन कदाचिच्छा-स्त्रालापने कदाचित् आख्यानकाराख्यायिकेतिहासपुराणश्रवर्णनेन कदाचिदालेख्यविनोदेन, कदाचि द्वीणाया कदाचिद्दर्शनागतमुनिजन चरणशुश्रूषया कदाचिदक्षरच्युतक मात्राच्युतक बिन्दुमती - गूढचतुर्थपाद - प्रहेलिका - प्रदानादिभिः वनितापराङ्मुखः सुहृत्परिवृतो दिवसमनैषीत्। यथैव च दिवसमेवारब्ध विविध क्रीडा परिहास चतुरैः सुहृद्भिरूपेतो निशामनैषीत्।**

(**टिप्पणिः** - शूद्रकः अन्यकार्यव्यासक्तः न भवति। विनयती + अन्वयति - विनयवत्यान्वयवति। विनयवति संस्कारविशिष्टे। अन्वयति - सत्कुलजाते। अवरोधजने - अन्तपुरस्त्रीसमुदाये स्वयम् आत्मना एव। आरब्धमृदङ्गवाद्यः मृदङ्गवादनाय आरब्धः। कदाचित् - कस्मिश्चित्काले।

काव्यप्रबन्धरचनेन - काव्यानां प्रबन्धानां च प्रणयेन। कदाचित् + आख्यानाख्यायिकेतिहास पुराणाश्रवर्णनेन। आख्यानकं स्फुटकथा। आख्यायिका - गद्यविशेषः (वासवदत्तादिः)। इतिहासः - रामयणादिः। पुराणानि - शिवपुराणादीनि। तेषां श्रवणेन। वीणया तन्त्र्या। चरणशुश्रूषया - चरणानां (पादानां) सेवया। अक्षरच्युतकं - अक्षरस्य (वर्णस्य ) च्युतकं (राहित्यम्) अस्मिन् तत्। मात्राच्युतकं - मात्राराहित्यं यस्मिन् तत्। बिन्दुमती - अक्षरनिवेशरूपा। गूढचतुर्थपादः गुप्तः चतुर्थचरणः यस्मिन् सः। प्रहेलिका - कश्चन काव्यविनोदः। व्यक्तीकृत्य - कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र बाह्यभ्यान्तरावर्णौ कथ्यते सा प्रहेलिका। प्रदानादिभिः - उपस्थानादिभिः हेतुभिः। सुहृत्परिवृतः - मित्रैः परिवृतः परिवेष्टितः। यथा + एव - यथैव। अनैषीत् यापितवान्।

**संक्षिप्तम् -** शूद्रकस्य अन्तःपुरे विनयशीलाः सद्वंशाः अनेकाः सुन्दर्यः सन्त्यपि शूद्रकस्य चित्ते स्त्रैणचिन्ता नावर्तत। सः इतरकार्येषु सुहृद्भिः सदा व्यापृतः आसीत्। मृदङ्गवादने संगीतादिकलासु मृगयाविनोदेन काव्यरचनया शास्त्रालापेन गद्यपद्यरचनया पुराणानां इतिहासग्रन्थयोः आकर्णनेन विविधैः काव्यपरीक्षणैः (अक्षरच्युतक-मात्राच्युतक-बिन्दुमती-गूढचतुर्थपाद-प्रहेलिकाभिः) काव्य विनोदैः आगतानां मुनिजनानाम् सेवया च व्यापृतः दिवसं निनाय। तथैव रात्रिं च निनाय।

### 5.2.3 मातङ्गकुमारीप्रवेशः

**7. एकदा तु नातिदूरोदिते भगवति सहस्रमरीचिमालिनि, राजानमास्थानमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिना कौक्षेयकेण भीषणरमणीयाकृतिः प्रतिहारी समुपसृत्य क्षितितल-निहित-जानु-करकमला सविनयमब्रवीत्।**

**टिप्पणिः** - एकदा -एकस्मिन् समये। उदिते भगवति सहस्रमरीचिमालिनि ( सति सप्तमीप्रयोगः)। सहस्रमरीचिमाली सूर्यः। यदा सूर्यः उदितः तदा। अङ्गनाजनविरुद्धेन - स्त्रीजनविरुद्धेन। वामपार्श्वा-वलम्बिना - वामपार्श्वे अवतिष्ठते इति शीलेन। कौक्षेयकेण - खड्गेन। क्षितितलनिहितजानुकरकमला - भूतले धृतौ जानुकरौ यस्याः सा।

**सक्षिप्तम् -** एकस्मिन् दिने सूर्योदयानन्तरं राजा आस्थानमण्डपे निषण्णः आसीत्। तदा प्रतीहारी आगत्य राज्ञः पुरतः साष्टाङ्गं नमस्कृत्य एवमवदत्।

**8. देव, द्वारस्थिता सुरलोकामारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपतिता राजलक्ष्मीर्दक्षिण-पथादागता चण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति। सकलभुवनतलसर्वरत्नानां उदधिरिवैकभाजन देवः, विहङ्गमश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमेवमादाया-गताहमिच्छामि देवदर्शनासुखमनुभवितुम् इति। एतदाकर्ण्य देवः प्रमाणम् इत्युक्त्वा विरराम।**

**(टिप्पणिः -** प्रतीहारी किमवदिति निर्दिशति। देव - स्वामिन्। शतमश्वः - इन्द्रः। चण्डालकन्यका-मातङ्गकुमारी। सकलभुवनतलसर्वरत्नानां - निखिललोकतलेषु वर्तमानानां सर्वरत्नानाम् आश्चर्यभूतः अद्भुतस्वरूपः। विहङ्गम् + च + अयम् - विहङ्गमश्चायम्। देवपादमूलं - देवस्य चरणयोः समीपम्। अनुभवितुं साक्षात्कर्तुं विरराम व्यरमते। विरराम वि + रम् -पर-लिट् प्र.पु ए.व.।

**संक्षिप्तम् -** हे राजन् , द्वारे काचन चाण्डालकन्यका दक्षिणदेशादागता। देवलोक प्रवेष्टुं तत्परं त्रिशङ्कुं यदा कोपेन इन्द्रः निवर्तितः तदा स्वर्गलोकात् आगता स्वर्गलक्ष्मीः इव भवति इयं कुमारी। तस्याः हस्ते वर्तमाने पञ्जरे एकः शुकः वर्तते। सा भवन्तं विज्ञापयति समस्तेषु भुवनेषु श्रेष्ठः भवति भवान्। अयं शुकोऽपि अद्भुतस्वभावः। सर्वभुवनस्य रत्नमित्यतः भवतः चरणसमीपम् अहमागता। भवद्दर्शनसुखमयं अनुभवतु इति चिन्तया। इत्युक्त्वा सा विरराम।

**9. उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि 'को दोषः प्रवेश्यताम् इत्यादिदेश। अथ प्रतीहारी नरपतिकथनान्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत्।**

**(टिप्पणिः** - प्रतिहारवचनं श्रुत्वा राज्ञः प्रतिक्रियां निरूपयति। उपजातकुतूहलः - समुत्पन्नकौतुकः। उपजातं कुतूहलं यस्य सः उपजातकुतूहलः। कः + दोषः - को दोषः। प्रावेशयत् -प्रवेशनमकरोत्।

**संक्षिप्तम् -** संजाततत्परः राजा शूद्रकः समीपस्थितानां राज्ञां मुखानि अवलोक्य प्रवेश्यताम् इत्यवदत्। तदनुसृत्य प्रतीहारी मातङ्गकुमारीं सभायाम् आनिनाय।

- **शूद्रकस्य गुणाः -** बाणभट्टः स्वग्रन्थे कादम्बर्यां महाराजस्य शूद्रकस्य गुणान् सम्यक्तया वर्णयति। कृष्णमाचार्यः कादम्बरीसंग्रहे शूद्रकगुणान् एवं विशदयति। अनेकैः सामन्तराजभिः प्रशोभमानः शूद्रकः अपरः इन्द्र इव विदिशां बिभर्ति। सः राजा महाश्चर्याणां कर्ता एव। तस्य मनसि धर्मदेवः वसति। कोपे सः यमतुल्यः प्रसादे कुबेरः प्रतापे वह्निः च भवति। तेजसि सः सूर्यः। सः भगवतः विष्णोः समान एव। सः चतुरुदधिमेखलां वसुधां बिभर्ति। सौन्दर्यवान् अपि स्त्रीविषये विमुखः सन् राजपुत्रैः सह रममाण सुखमवसत्। कुलक्रमागतानां मन्त्रिप्रवराणां इच्छानुसारं नीत्यानुसारं प्रजापरिपालनमकरोत्। अतिविजिगीषुतया महासत्त्वतया च स्त्रैणं तृणमिव मन्वानः सः दिनरात्रं राज्ये श्रद्धालुरासीत्। मृदङ्गवादने संगीते मृगयाविनोदे काव्यप्रबन्धरचनायां शास्त्रचर्चादिषु च सः व्यापृतः आसीत्। दर्शनार्थमागतान् मुनीन् सः स्वीकृत्य तेषां वचांसि सश्रद्धमाकर्णयत्। विद्यायाः विनोदे साहित्यरचानयां च निष्णातः भवति शूद्रकः।

## पुनरावृत्तिः (Recap)

- कृष्णमाचार्यः कादम्बरीसंग्रहे शूद्रकगुणान् एवं विशदयति।
- अनेकैः सामन्तराजभिः प्रशोभमानः शूद्रकः अपरः इन्द्र इव विदिशां बिभर्ति।
- शूद्रके सर्वे गुणाः सन्ति। शूद्रकः विष्णुसमानः भवति।
- अतिविजिगीषुः सत्यशाली च शूद्रकः।
- सौन्दर्यवान् अपि स्त्रीविषये विमुखः सन् राजपुत्रैः सह रममाणः सुखमवसत्।
- शूद्रकः सदा राज्यकार्येषु तत्परः।
- परमसुन्दरीं चाण्डालकन्यकां मातङ्गकुमारीं वर्णयति।
- प्रतीहारी मातङ्गकुमारीं सभायाम् आनिनाय।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. कादम्बर्याः कथायाः प्रारम्भः केन राज्ञा आरभते ?

2. शूद्रकस्य मनसि कः वसति ?
3. शूद्रकस्य राजधानी का ?
4. का पञ्जरस्थं शुकं राज्ञे अदात् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।
**(Answer the following questions in one or two sentences)**

1. शूद्रकस्य राजधानी कीदृशी ?
2. केन कारणेन स्त्रैणं तृणमिव शूद्रकः चिन्तितवान् ?
3. शूद्रकस्य मन्त्रिणः कथं आसन्?
4. शूद्रकः कस्य इव तुल्यः उच्यते?

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. शूद्रकस्य गुणाः के ?
2. शूद्रकः दिनानि कथमनैषीत्?
3. प्रतीहारी आगत्य राजानं नमस्कृत्य किम् अवदत् ?

## निर्दिष्टाभ्यासः (Assignments)

1. शूद्रकभूपतेः राजधानी, तस्य दिनचर्या, मातङ्गकुमारीप्रवेशः इत्यादीन् विशदयत ।
2. शूद्रकस्य स्वभावः किं प्रकारं आसीत्? सः राजकार्ये, धर्मे, सौन्दर्ये, मित्रसङ्गे च कीदृशः आसीत्?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. शूद्रकेण ।

2. धर्मदेवः।
3. विदिशा।
4. काचन चाण्डालकन्यका पञ्जरस्थं शुकं राज्ञे अदात्।

**सूचनाग्रन्थाः (References)**

1. आचार्यः लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौकम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटानि ३३६-३६२
2. कृष्णमाचार्यः, कादम्बरीसंग्रहः, पुटानि १-९
3. बाणभट्ट, कादम्बरी व्याख्या डा. जयशङ्कर् लाल् त्रिपाठि, चौकम्बाकृष्णदास अकादमी, पुटानि २३-६३

SGOU

# Unit - 3
## मातङ्गकुमार्याः राजदर्शनम्

### उद्देश्यानि (Learning Outcomes)

- संस्कृतगद्यकाव्येषु कादम्बर्याः स्थानमवगच्छाति।
- बाणभट्टस्य वर्णनापाटवं गृह्णाति।
- कथाकथनस्य सौकुमार्यं जानाति।
- कादम्बरीसंग्रहे मातङ्गकुमार्याः शूद्रकराजदर्शनवर्णानां गृह्णाति।

### प्राग्व्यपेक्षाः (Prerequisites)

अस्मिन् भागे महाराजस्य शूद्रकस्य गुणान्, दिनचर्या, मातङ्गकुमारीप्रवेशं च सम्यक्तया वर्णयित्वा अनन्तरं मातङ्गकुमार्याः शूद्रकराजदर्शनं वर्णयति।

### मुख्यपदानि (Keywords)

मुक्ताकलापा - मणिदण्डिका - गगनसिन्धुः - इन्दुकान्तमणिपर्यङ्किका - गोरोचना।

### Discussion

**5.3.1 मातङ्गकुमार्याः राजदर्शनम्।**

10. **प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनं अवलम्बितस्थूलमुक्ताकलापस्य कनकशृङ्खला-नियमितमणिदण्डिकाचतुष्टयस्य गगनसिन्धुफेनपटलपाण्डुरस्य नातिमहतो दुकूलवितानस्याधस्ता-दिन्दुकान्तमणिपर्यङ्किकानिषण्णं, उद्धूयमानसुवर्णदण्डचामरकलापम्, अमृतफेनधवले गोरोच-नालिखितहंसमिथुनसनाथपर्यन्ते चारुचामरवायुनिवर्तितान्तदेशे दुकूले वसानम् अतिसुरभिचन्दना-नुलेपनधवलितोरःस्थलम् उपरिविन्यस्तकुङ्कुमस्थासकं, अमलकलधौतपट्टायताम् अष्टमीचन्द्र-**

**शकलाकारम्, ऊर्णासनाथललाटदेशमुद्वहन्तम् अपरिमितपरिवारजनमप्यद्वितीयम्, अविरतप्रवृत्त दानमप्यमदम् राजानमद्राक्षीत्।**

**(टिप्पणिः -** चण्डालकन्यका रजानमपश्यत्। तत्र वर्णयति। नरपतिसहस्रमध्यवर्तिनां - सहस्राणां राज्ञां मध्ये वर्तमानम्। अवलम्बिताः - समाश्रिताः। स्थूलाः - स्थविष्ठाः। मुक्ताकलापा -मणिसमूहाः यस्मिन् सः अवलम्बितस्थूलमुक्ताकलापः तस्य अवलम्बितस्थूलमुक्ताकलापस्य। मणिदण्डिका - रत्नजटिलयष्टयः। गगनसिन्धुः - मन्दाकिनी। पाण्डुरं - शुभ्रम्। इन्दुकान्तमणिपर्यङ्किका - चन्द्रकान्त-मणीनां शय्या। उद्धूयमानः - भृत्यैः संवीज्यमानः। गोरोचना - गोपित्तनामकपदार्थविशेषः। पर्यन्तः - प्रान्तभागः। प्रनर्तितः - सञ्चालितः। स्थासकः - हस्तबिम्बः। कलधौतं - सुवर्णम्। अष्टमीचन्द्रशकलकारं अष्टमतिथौ अर्धचन्द्रवदाकृतियुक्तं उर्णा भ्रुयुग्ममध्यवर्ती लोमावर्तः। अद्वितीयं - स्वतुल्यद्वितीयजनरहितम्। अविरतप्रवृत्तदानमप्यमदम्- अविरतं (निरन्तरं)प्रवर्त्तं दानं (त्यागः) यस्यैम्भूतमपि अमदं -गर्वशून्यं।

**संक्षिप्तम् -** चण्डलकन्यका राजानं शूद्रकमपश्यत्। राजा अनेकेषां राज्ञां मध्ये वर्तते। स्थुलान् मुक्ताकलापान् राजा धारयन्नासीत्। सिंहासनस्य चतुर्षु कोणेषु बद्धाः सुवर्णमयानि रत्नजटिलयष्टयः अवर्तन्त। मन्दाकिन्याः फेनसमूहमिव शुभ्रं नातिविशालं दुकूलविताम्। तस्य अधस्तात् इन्दुकान्त-मणिना रचिता शय्या। तस्यां शय्यायां राजा उपविष्टः आसीत्। भृत्याः कनकदण्डचामरेण तमुभयतः वर्तन्ते। राज्ञा धृते पट्टवसने हंसमिथुनं चित्रितं दृश्यते। सुगन्धयुक्तं चन्दनं वक्षःस्थले लेपनं कृतवानासीत्। वक्षोपरि विहिताः केसरहस्तबिम्बैर्युक्तः सुवर्णस्य पट्टवदायत वस्त्रं धृतमासीत्। अष्टम्यां तिथौ वर्धमानस्य अर्धचन्द्रस्य शोभायुक्तः आसीत् स राजा। तस्य ललाटदेशः भ्रूभुग्ममध्यवर्ति लोमावर्तस्य सनाथः आसीत्। स राज असाधारण्या राजलक्ष्म्या प्रशोभितः आसीत्। तादृशं राजानं चाण्डालकुमारी अपश्यत्।

## पुनरावृत्तिः (Recap)

- चण्डालकन्यका राजानमपश्यत्।
- तस्यां शय्यायां राजा उपविष्टः आसीत्।
- भृत्याः कनकदण्डचामरेण तमुभयतः वर्तन्ते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अतिसुरभिचन्दनानुलेपनधवलितोरस्थलः कः ?
2. स राजा असाधारण्या राजलक्ष्म्या प्रशोभितः आसीत् - राजा कः ?
3. चाण्डालकन्यका कं पश्यति स्म?
4. राज्ञः वक्षःस्थले किं लेपनं कृतम्?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. कीदृशं राजानं चाण्डालकुमारी अपश्यत्?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. राजा शूद्रकः।



SGOU

2. राजा शूद्रकः।
3. राजानं शूद्रकम्
4. सुगन्धयुक्तं चन्दनं लेपनं कृतम्।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौकम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटानि ३३६-३६२
2. कृष्णमाचार्यः, कादम्बरीसंग्रहः, पुटानि १-९
3. बाणभट्ट, कादम्बरी व्याख्या डा. जयशङ्कर् लाल् त्रिपाठि, चौकम्बाकृष्णदास अकादमी, पुटानि २३-६३

# Unit - 4

## शूद्रकस्य मातङ्गकन्यादर्शनम् - वैशम्पायनः - आर्यापाठः

### उद्देश्यानि (Learning Outcomes)

- संस्कृतगद्यकाव्येषु कादम्बर्याः स्थानमवगच्छाति ।
- बाणभट्टस्य वर्णनापाटवं गृह्णाति ।
- कथाकथनस्य सौकुमार्यं जानाति ।
- वैशम्पायननायकस्य असाधरणीं नैपुणीं अनितरसाधारणं पाटवं च जानाति ।

### प्राग्व्यपेक्षाः (Prerequisites)

अस्माकं पाठक्रमे परमसुन्दरीं मातङ्गकुमारीं वर्णयति । वैशम्पायननामकस्य शुकस्यागमनं, शुकस्य कथाकथनम् । वैशम्पायननामकस्य शुकस्य असाधारणीं नैपुणीं अनितरसाधारणं पाटवं च विशदयति ।

### मुख्यपदानि (Keywords)

चाण्डालकन्यकायाः - कृतव्यायमतया - यौवनापगमेऽप्यशिथिलशरीरसन्धिना - करतलस्पर्शक्लेशितानामवयवानामीदृशी - वैशम्पायनो नाम शुकः - स्तनयुगमश्रुस्नातम् ।

**Discussion**

### 5.4.1 शूद्रकस्य मातङ्गदर्शनं

**11. आलोक्य च सा दूरस्थितैव, वेणुलतामादाय नरपतिप्रतिबोधनार्थं सकृत् सभाकुट्टिममाजघान येन सकलमेव राजकम् एकपदे तेन वेणुलताध्वनिना युगपदालिखितवदनमवनीपालमुखादाकृव्य चक्षुस्तदभिमुखमासीत्।।**

(**टिप्पणिः** - चण्डालकन्यकायाः आचरणं प्रदर्शयति। दूरस्थिता + एव -दूरस्थितैव। सकृत् एकवारं। आजघान -ताडयामास। एकपदे तत्क्षणे एव। वेणुलताध्वनिना - वेणुलताया ताडनशब्देन। आकृष्य - आकृष्टं कृत्वा।

**संक्षिप्तम् -** मातङ्गकन्या सभाकुट्टीं ताडितवती। तेन सर्वे राजानः शूद्रकमुखात् श्रद्धां निवार्य चण्डालकन्यकायाः अभिमुखमासन्।

**12. अवनिपतिस्तु दूरात् आलोक्य इत्यभिधाय प्रतीहार्या निर्दिश्यमानां तां अनवरतकृतव्यायमतया यौवनापगमेऽप्यशिथिलशरीरसन्धिना पुरुषेणाधिष्ठितपुरोभागाम् आकुलाकुलकाकपक्षधारिणा कनकशलाकनिर्मितं पञ्जरमुद्वहता चण्डालदारकेणानुगम्यमानम् आगुल्फावलम्बिना नीलकञ्चुकेना च्छन्नशरीरं, उपरि रक्तांशुकविरचितावगुण्डना मेखलदाम्ना परिगतजघनस्थला, अतिस्थूलमुक्ताफल-घटितेन शुचिना हारेण कृतकण्डग्रहम् श्रियमिव हस्तस्थितकमलशोभां यक्षाधिपलक्ष्मीमिवा-लोकयद्धासिनीं अचिरोपरूढयौवनां अतिशयरूपाकृतिं अनिमिषलोचनो ददर्श।**

(**टिप्पणिः** - इति + अभिधाय। अभिधाय - उक्त्या। कृतव्यायामतया - कृतेन व्यायामेन। शरीरसन्धिना - शरीरबलेन। अगुल्फम् - गुल्फपर्यन्तं। गुल्फ ankle, रक्तांशुकेन - लोहितवर्णवस्त्रेण। परिगतं - समान्तात् व्याप्तम्।)

**संक्षिप्तम् -** राजा शूद्रकः चाण्डालकन्यकां प्रवेष्टुमनुमतवान्। प्रतीहारी निर्दिष्टेन मार्गेण चण्डालकुमारी सभामण्डपं प्रविवेश। तया सह कश्चन पुरुषोऽप्यवर्तत। सः तु अनवतरव्यायामतया दृढशरीरः आसीत्। सुवर्णनिर्मितं पञ्जरं वहता बालेन अनुगम्यमाना चण्डालकन्यका नीलकञ्चुकेन

आच्छदितशरीरा आसीत्। सा शिरसि लोहितवर्णवस्त्रेण मुखावरणं कृता आसीत्। सा कटिमेखलायां बन्धनरज्वा परिगतजघनसत्त्वा अभवत्। सा उज्वलमेकम् हारं कण्ठे धरति। स हारः अतिस्थूलैः मुक्ताफलैः गुम्फितः आसीत्। तस्याः हस्ते विद्यामानस्य कमलस्य शोभया सा लक्ष्मीरिव रराज। यक्षाधिपस्य कुबेरस्य अलकानगरीमिव शोभमाना आसीत्। अतिशयरूपाकृतिं तां राजा शूद्रकः कुतूहलेन ददर्श।

**13. समुपजातस्याभून्मनसि महीपतेः अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः। तथाहि यदि नामेयमात्मारूपोपहसितशेषरूपसम्पदुत्पादिता, किमर्थमपगतस्पर्शे कृतं कुले जन्म। मन्ये च मातङ्ग जातिस्पर्शदोषभयादस्पृशतेयमुत्पादिता प्रजापतिना, अन्यथा कथमियमाक्लिष्टता लावण्यस्य। "न हि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः" इति।**

**(टिप्पणिः -** चण्डालकन्यादर्शने राज्ञः प्रतिक्रियाम् प्रतिपादयति। समुपजातस्य + अभूत् + मनसि -समुपजातस्याभून्मनसि। समुपजातः-समुत्पन्नः। विधातुः-ब्राह्मणः। अस्थाने अपदे(अयोग्ये स्थाने)। रूपं सौन्दर्यं इयं चण्डालकन्यका स्वस्याः सौन्दर्येण उपहास्यास्पदीकृताः समस्ताः - सौन्दर्यसमृद्धिः। यदि उत्पादिता यदि निर्मिता तर्हि अपगतस्पर्शो दूरीकृतसंश्लेषे। मातङ्गजातिस्पर्शदोषभयाद् - चण्डालजातेः स्पर्शेन यो दोषः तस्मात् भयात्। आक्लिष्टत-क्लेशरहिता (कोमलता) करतलस्पर्शक्लेशितानाम् - पाणितलस्पर्शमर्दितानां )

**संक्षिप्तम् -** चण्डालकन्यकां दृष्ट्वा राजा शूद्रकः अतिशययुक्तः जातः। तस्य मनसि इयं चिन्ता आगता। ब्रह्मणः सौन्दर्यनिर्माणयत्नः आश्चर्यकरः। सः यत्नः अस्थाने भवति। अयोग्ये कार्ये सौन्दर्यसमृद्धिं सूचयति। इयं कन्यका स्वस्याः सौन्दर्येण समस्तं सौन्दर्यसमृद्धिम् उपहास्यास्पदीकृता। किं निमित्तं कन्यकेयं अपगतस्पर्शे चण्डालकुले जाता। राजा स्वयमेव निश्चिनोति। ब्रह्मणः मानसोत्पादिता कन्यका भवतीयम्। हि मातङ्गजातिस्पर्शदोषभयात् करतलस्पर्शमर्दितानां कुचाद्यवयवानां एतादर्शं सौकुमार्यं नैव भवति। करतलस्पर्शेन एतादृशं कदापि निर्मातुं न शक्यते इति।

**5.4.2 वैशम्पायनः**

**14. एवमादि चिन्तनमेव राजानमीषदवगलितकर्णापल्लवा प्रगल्भवनितेव कन्यका प्रणनाम। कृतप्रणामायां च तस्यां मणिकुट्टिमोपविष्टायाम् स पुरुषस्तं विहङ्गम् शुकमादाय किञ्चिदुपसृत्य राज्ञे न्यवेदयदब्रवीच्च।**

**15. देव, विदितसकलशास्त्रार्थः वेदिता गीतश्रुतीनां काव्यनाटकाख्यायिकाप्रभृतिनापरिमितानां सुभाषितानामध्येता स्वयञ्च कर्ता गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः सकलभूतलरत्नोऽयं वैशम्पायनो नाम शुकः। सर्वरत्नानाञ्च उदधिरिव देवो भाजनमिति कृत्वैनमादायागतेत्यु नरपतेः पुरो निधाय पञ्जरमसावपससार।**

**(टिप्पणिः -** शुकविषयकं पुरुषवचनं प्रतिपादयति। देव -हे राजन्। वेदिता - ज्ञाता। अपरिमितानां - असंख्यानां। लक्षणाभिज्ञानाम् - लक्षणानां विज्ञाता। उदधिः - समुद्रः। भाजनं - पात्रम्। यथा समुद्रे सर्वाणि रत्नानि सन्ति तथा भवतः समीपेऽपि सर्वोत्कृष्टवस्तूनि सन्ति। दुहिता - पुत्री। इति + उक्त्वा - इत्युक्त्वा। असौ+अपससार -असावपससार। अप+सर्+सरणे-पर-लिट्-प्र.पु-ए.व।अपससार - बहिर्जगाम।

**संक्षिप्तम् -** चण्डालाकुमार्या सहागतः पुरुषः राजानमेववदत्। हे राजन् अयं शुकः सर्वाणि शास्त्राणि जानाति। गीतानि श्रुतयः च जानाति। काव्यानि नाटकानि आख्यायिका आख्यानकानि (नलवृत्तान्तादिकानि) च जानति। बहूनि सुभाषितानि तेन पठितानि। बहूनां सुभाषितानां च कर्ता च भवति। अपि च गजतुरगपुरुषस्त्रीणां सामुद्रिकलक्षणानि जानाति। सर्वभूतलस्य रत्नं भवति। भवान् सर्वरत्नानां उदधिरिव भवति। अतः भवतः सकाशे अयं शुकः भवतु इति अस्माकं राज्ञः दुहिता अत्र आगता। एनमात्मीयः क्रियताम् इत्युक्त्वा सः पुरुषः पञ्जरं तत्र स्थाप्य बहिर्जगाम।

**5.4.3 आर्यपाठः**

**16. अपसृते च तस्मिन् स विहङ्गराजो राजाभिमुखो भूत्वा समुन्नमस्य दक्षिणं चरणम् अतिस्पष्टं भूत्वा संस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां पपाठ।**

**"स्तनयुग्ममश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः।**

**चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्।**

(**टिप्पणिः** - अद्भुतस्य शुकस्य (वैशम्पायनस्य)कार्यं निरूपयति। अपसृते - अपगते। समुन्नमस्य - सम्यक् उत्थाप्य (ऊर्ध्वं विधाय)। गिरा -वाण्या।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| राजन् हृदयशोकाग्नेः | - | हे राजन्, अश्रुभिः प्रक्षालितं हृदये भर्तुमरणजनितस्य दावानलस्य |
| समीपतरवर्त्ति अश्रुस्नातं | - | सन्निहितवर्त्ति |
| भवतः रिपुस्त्रीणां | - | भवतः (शूद्रकस्य ) शत्रुवनितानां। |
| स्तनयुगं विमुक्ताहारं चरति इव | - | कुचद्वयं परित्यक्तमौलिमालायुक्तं। आहाररहितं सोपवासं नियममासेवते इव। |

**सारः -** हे राजन्, भवतः शत्रुस्त्रीणां कुचद्वयं विमुक्ताहारं व्रतमाचरतीव वर्तते। शरीरशुद्ध्यर्थं अश्रुभिः स्नाति हृदयशोकाग्नेः समीपवर्ति, वर्जिताहारम् (विमुक्तमौलिकमालायुक्तं) च भवति।

**संक्षिप्तम् -** यदा सः पुरुषः गतः तदा सः शुकः वैशम्पायनः राजभिमुखः सन् दक्षिणं चरणमुद्धृत्य जयतु महाराजः इति अतिस्पष्टतया अक्षरशुद्ध्या स्वरशुद्ध्या संस्कारयुक्तया वाचा एकं श्लोकं पपाठ। शूद्रकस्य शत्रुस्त्रीणां कुचद्वयम् अश्रुभिः स्नात्वा भर्तुमरणजनितसमीपतरवर्ति सन् वर्जिताहारं(परित्यक्ताभरणं ) भूत्वा व्रतमासेवते।

- **मातङ्गकुमारी -** बाणभट्टः कादम्बर्यां परमसुन्दरीं मातङ्गकुमारीं वर्णयति। एकदा अस्थानमण्डपस्थितस्य शूद्रकस्य पुरतः प्रतीहार्या आनीता मातङ्गकुमारीं दृष्ट्वा राजा विस्मितवान्। प्रतीहारी तां कुमारीं दक्षिणपथादागतां राजलक्ष्मीमिव पश्यति। राजकुमार्याः हस्ते पञ्जरस्थः शुकः वर्तते। सः शुकस्तु आचार्यभूतः सकलभुवनरत्नं भवति। सर्वरत्नानां

उदधिः भवति शूद्रकः। सर्वभुवनतलरत्नं अयं शुकः राज्ञे सविधे भवतु इति चिन्तया राज्ञे शुकं अदात्।

सा मातङ्गकुमारी नीलकञ्चुनावृतशरीरा, रक्तवस्त्रावृता चासीत्। सा कटिमेखलारज्वा परिगतजघना अभवत्। सा प्रशोभमानां मालां कण्ठे धरति। सा माला अतिस्थूलैः मौक्तिकैः गुम्भिता। राजा शूद्रकः एवं चिन्तितवान् -अहो विधातुरस्थाने रूपनिष्पादनयत्नः इति। ब्रह्मणः मानससृष्टिः भवतीयम्। मातङ्गजातिस्पर्शनात् करतलस्पर्शमर्दितानां कुचाद्यवयवानां एतादृशं सौकुमार्यं नैव लभते।

- **अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः।**

शूद्रकमहाराजस्य आस्थानमण्डपे प्रतीहार्या सह आगतां मातङ्गकन्यां दृष्ट्वा तस्याः सौन्दर्ये विस्मयाकुलः राजा मनसि एवं चिन्तयति। ब्रह्मणः सौन्दर्यनिर्माणयत्नः आश्चर्यकरः। सः यत्नः अस्थाने भवति। अयोग्ये जने सौन्दर्यसमृद्धिं समर्पयति। हि चाण्डालकन्यका अस्पृष्टा अपगतस्पर्शा च। इयं कन्यका स्वस्याः सौन्दर्येण सर्वान् अतिश्शेते।

- **अन्यथा कथमियमक्लिष्टता लावण्यस्य।**

राजा शूद्रकः मातङ्गकन्यायाः सौन्दर्यं दृष्ट्वा विस्मयाकुलः सन् मनसि एवं चिन्तितवान्। ब्रह्मणः सौन्दर्यनिर्माणयत्नः आश्चर्यकरः। ब्रह्मणा इमां कन्यकां मनसा निर्मितवान्, न तु करेण। मातङ्गजातिस्पर्शभयात् अस्पृशतेयमुत्पादिता। ब्रह्मणो करतलस्पर्शेन एतादृशं सौन्दर्यं कदापि निर्मातुं न शक्यते। अस्याः कोमलत्वं करतलस्पर्शेन न सिद्ध्यति।

- **सर्वरत्नानां चोदधिरिव देवो भाजनम्**

राज्ञः शूद्रकस्य राजसदसि मातङ्गकन्यका पञ्जरस्थं शुकमादाय केनचित् पुरुषेण सह आगता। सः पुरुषः एनं शुकमधिकृत्य एवं सूचयति। सर्वभुवनतलरत्नं अयं वैशम्पायनो नाम शुकः। सः शुकः अखिलमपि शास्त्राणि जानाति। सोऽयं काव्यनाटकादीनि जानाति।

वेदश्रुतीनां वेत्ता भवति। सुभाषितानि जानाति। स्वयं निर्माति च। भवानपि सर्वरत्नानां उदधिः एव। समुद्रे यानि यानि अमूल्यानि वस्तूनि सन्ति तानि सर्वाण्यपि भवति सन्ति।

- **वैशम्पायनः नाम शुकः**

कृष्णमाचार्यः कादम्बरीसंग्रहे वैशम्पायननामकस्य शुकस्य असाधारणीं नैपुणीं अनितरसाधारणं पाटवं च विशदयति। समस्तभुवनतलरत्नमेव अयं शुकः। मातङ्गकन्यकया सहागतः पुरुष तं शुकं राज्ञे शूद्रकाय समर्प्य एवं वर्णयति। अयं शुकः विदितसकलशास्त्रार्थः गीतश्रुतीनां च वेदिता काव्यनाटकादीनां सुभाषितानां चा अध्येता च भवति। सः गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः सर्वशास्त्रपारंगतः च भवति। यदा स पुरुषः सभामण्डपं गतवान् तदा वैशम्पायनो नाम शुकः राजाभिमुखः सन् कञ्चन श्लोकं पपाठ। तस्मिन् श्लोके अक्षरशुद्धिः चावर्तत। राजानं शूद्रकं सः शुकः एवं स्तौति। हे राजन् भवतः रिपुस्त्रियः भर्तृमरणजनितशोकाग्निना दहन्ति। तासां कुचद्वयम् अश्रुभिः स्नात्वा शोकाग्रेः समीपतरवर्ति सन् वर्जिताहारं परित्यक्ताभरणं च भूत्वा व्रतमासेवते इति। अर्थगम्भीरं श्लोकं शुकस्य पाण्डित्यं स्पष्टं करोति।

- **चरति विमुक्ताहारम् व्रतमिव भवतो रिपुस्त्रीणां।**

वैशम्पायनः नाम शुकः राजानं शूद्रकमभिवन्द्य एकाम् आर्यां पपाठ। भवतः शत्रुस्त्रियः भर्तुमरणदुखेन दाहाग्नौ दहन्ति। भवतः शत्रुस्त्रीणां स्तनद्वयं अश्रुभिः स्नात्वा भर्तुमरणजनितशोकाग्रेः समीपतरवर्ति सन् वर्जिताहारं (परित्यक्ताभरणं वा) भूत्वा व्रतमासेवते इव वर्तते। यथा व्रती शरीरशुध्यर्थं स्नाति , होमाग्निसमीपे तिष्ठति वर्जितमाहारम् परित्यजति तथा कुचद्वयम् स्नाति अग्निसमीपं तिष्ठति विमुक्ताहारम् च करोति।

## पुनरावृत्तिः (Recap)

- चाण्डालकन्यकायाः आचरणं प्रदर्शयति।
- चण्डालकन्यका राजानमालोक्य दूरस्थित्वा एव वेणुलतया सर्वेषां श्रद्धामाकृष्टवती।
- राजा शूद्रकः चाण्डालकन्यकां प्रवेष्टुमनुमेने।
- प्रतीहारी निर्दिष्टेन मार्गेण चण्डालकुमारी सभामण्डपं प्रविवेश।
- मातङ्गकन्यकामनुवर्तमानः पुरुषः यौवनापगमेऽपि आशिथिलशरीरसन्धी आसीत्।
- चाण्डालकन्यका यक्षाधिपस्य कुबेरस्य अलकानगरी इव शोभमाना आसीत्।
- सकलभूतलरत्नोऽयं वैशम्पायनो नाम शुकः।
- वैशम्पायननामकस्य शुकस्य असाधारणीं नैपुणीं अनितरसाधारणं पाटवं च वर्तते।
- चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. यौवनोपगमोऽप्यशिथिलशरीरसन्धिपुरुषः कः ?
2. नीलकञ्चुकेनावच्छन्नशरीरा आसीत् - का ?
3. चाण्डालकन्यका कमलस्य शोभया कामिव रराज ?
4. का आत्मरूपोहसिताशेषरूपसहसिताशेषरूपसम्पत् युक्ता ?
5. "अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः।" अस्याः सूक्तेः वक्ता कः ?

6. स्तनयुग्ममश्रुस्नातम् - कासाम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. चण्डालकन्यका सर्वेषां श्रद्धामाकृष्टवती। कथम् ?
2. मातङ्गकुमारीं दृष्ट्वा राजा शूद्रकः एवं चिन्तितवान् - किम् ?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. मातङ्गकुमारी।
2. “अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः।” -ससन्दर्भं आशयं विशदयत।
3. “अन्यथा कथमियमाक्लिष्टता लावण्यस्य।” -ससन्दर्भं आशयं विशदयत।
4. “सर्वरत्नानां चोदधिरिव देवो भाजनम्।” -ससन्दर्भं आशयं विशदयत।
5. “चरति विमुक्ताहारम् व्रतमिव भवतो रिपुस्त्रीणाम्।” - ससन्दर्भं आशयं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. कृष्णमाचार्यकृत कादम्बरीसंग्रहे वैशम्पायननामकस्य शुकस्य असाधरणीं नैपुणीं अनितरसाधारणं पाटवं च विशदयत।

SGOU

2. चण्डालकन्यकाया राजदर्शनं तथा तस्यां प्रति शूद्रकराज्ञः भावनाः - विषयकं विस्तृतं वर्णनं कुरुत।
3. बाणभट्टस्य वर्णनापाटवं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मातङ्गकन्यकामनुवर्तमानः पुरुषः।
2. चण्डालकन्यका।
3. लक्ष्मीमिव।
4. मातङ्गकन्यका।
5. शूद्रकः।
6. शूद्रकस्य रिपुस्त्रीणाम् अवस्था।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौकम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटानि ३३६-३६२
2. कृष्णमाचार्यः, कादम्बरीसंग्रहः, पुटानि १-९
3. बाणभट्ट, कादम्बरी व्याख्या डा. जयशङ्कर् लाल् त्रिपाठि, चौकम्बाकृष्णदास अकादमी, पुटानि २३-६३

BLOCK-6

# वैशम्पायनस्य कथाकथनम्

SGOU

# Unit - 1

## शूद्रकस्य विस्मयः -तस्य व्यायामभूमिः- स्नानभूमिः-देवगृहम्-विलेपनभुमिः-भोजनम्

### उद्देश्यानि (Learning Outcomes)

- संस्कृतगद्यकाव्येषु कादम्बर्याः स्थानमवगच्छाति।
- बाणभट्टस्य वर्णनापाटवं गृह्णाति।
- कथाकथनस्य सौकुमार्यं जानाति।
- शूद्रकमहाराजस्य महत्त्वं तथा प्रकृतिसौन्दर्यं च ज्ञात्वा प्रकृतिमातुः संरक्षणकार्यम् उद्बोधयति।

### प्राग्व्यपेक्षाः (Prerequisites)

अस्मिन् खण्डे शूद्रकमहाराजस्य पुरतः प्रतीहार्या नीयमानया चण्डालकन्यया वैशम्पायनं शुकमादाय राज्ञे ददौ। शूद्रकस्य विस्मयः, तस्य व्यायामभूमिः, स्नानभूमिः, देवगृहम्, विलेपनभुमिः, भोजनम् च विशदयति।

### मुख्यपदानि (Keywords)

संजातविस्मयः - कुमारपालितः - विहङ्गमस्य - यदयमसङ्कीर्णवर्णा प्रविभागमभिव्यक्तमात्रानुस्वर संस्कारयोगं - अशिशिरकिरणः - समासन्नस्नानसमयो - व्यायामभूमिः - केयूरकोटिताटितानां - -विगलितकिरणजालैः - कृतमधुरव्यायामः - दिवसकरमभिप्रणम्य।

## Discussion

### 6.1.1 शूद्रकस्य विस्मयः

**17. राजा तु तां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनं अतिवयसमग्रजन्मानमखिलमन्त्रिमण्डले प्रधानममात्यं कुमारपालितनामानमब्रवीत्।**

**(टिप्पणिः** - श्लोकश्रवणानान्तरं किं संभूतमिति प्रतिपादयति। श्रुत्वा आकर्ण्य। संजातः विस्मयः यस्य सः संजातविस्मयः। तां पूर्वोक्तां आर्याम्। अतिवयसम् - अत्यन्तं वृद्धं (अतिवृद्धं ) अग्रजन्मानं अग्रे जन्म यस्य सः अग्रजन्मा तं अग्रजन्मानं। कुमरपालितनामानं - कुमारपालितः नाम यस्य तं कुमारपालितनामानम्।)

**संक्षिप्तम् -** वैशम्पायनस्य श्लोकमाकर्ण्य राजा विस्मितः बभूव। राजा शूद्रकः समीपवर्तिनः आत्मनः मन्त्रिषु श्रेष्ठं कुमारपालितमपृच्छत्।

**18. श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता प्रथमं तावदिदमेव महदाश्चर्यम् यदयमसङ्कीर्णवर्णा प्रविभागमभिव्यक्तमात्रानुस्वारसंस्कारयोगं विशेषसयुक्तां तिरश्चोऽपि मनुजस्येव संस्कारवती बुद्धिपूर्वा प्रवृत्तिः। तथाहि अनेन समुक्षिप्तक्षिणचरणेनोच्चार्य जयशब्दमियमार्या मामुद्दिश्य परिस्फुटाक्षरं गीता। प्रायेण हि पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति। "इदन्तु महच्चित्रम्" इति।**

**टिप्पणिः** - शूद्रकः किमवदत् इति सूचयति। विहङ्गमस्य - पक्षिणः। मधुरता-माधुर्यम्। आश्चर्यम् - अद्भुतम्। अभिव्यक्ताः - स्फुटं प्रतीयमानाः। मात्रा-ह्रस्वदीर्घप्लुतस्वरूपः। अनुस्वारः- स्वराः उदात्तादयः, संस्कारः व्याकरणसाधुत्वं च एतेषां संबन्धयुक्तम्। उदीरयति - उच्चारयति। अभिमतविषये - स्वाभीष्टे उपादेयेऽर्थे। तिरश्चोऽपि - पक्षिणोऽपि। बुद्धिपूर्वा - मतिमूलिका। अनेन - पुरोवर्तिना शुकेन। समुत्क्षिप्तः - उत्थापितः। आर्या - आर्यावृत्तयुक्तः श्लोकाः। गीता - उच्चारिता। पशवः +च -पशवश्च। पशवः - मृगाः। इदं + तु -इदन्तु।

**संक्षिप्तम् -** हे महात्मन् अस्य शुकस्य वर्णोच्चारणे स्पष्टता स्वरमाधुर्यं च भवता श्रुतं किल? इदं महदाश्चर्यमेव। अयं शुकः परस्परं वैलक्ष्यण्येन वर्तमानानां वर्णानां भेदाः मात्रानुस्वारसंस्कारयोगं वाचमुच्चरति। अपरमपि आश्चर्यमस्ति। अभिमतविषये मनुष्यस्येव संस्कारयुक्तां वाणीं बुद्धिपूर्वकम् उच्चरति। अयं दक्षिणकरमुद्धृत्य माम् अभिनन्द्य स्पष्टमेव श्लोकमुच्चारितवान्। प्रायः पक्षिणः पशवश्च भयाहारमैथुननिद्रा एव भवन्ति। इदं तु महदाश्चर्यम् इति।

**19. इत्युक्तवति भूभुजि कुमारपालितः किञ्चित् स्मितवदनो नृपमवादीत् "देव किमत्र चित्रम्। एते हि शुकसारिकाप्रभृतयः विहङ्गविशेषा यथाश्रुतं वाचमुच्चारयन्तीत्यधिगतमेव देवेन। तत्राप्यन्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायते नातिचित्रम् अन्यच्च एतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाभिधाना वागासीत्, अग्निशापत्त्वास्फुटालपता शुकानामुपजाता, करीणाञ्च जिह्वापरिवृत्तिः"।।**

**(टिप्पणिः -** मन्त्रिप्रवरः स्वाशयं प्रकटयति। इत्युक्तवति भूभुजि सतिसप्तप्रयोगः। यदा भूभुक् उक्तवान् तदा। भुवं भुनक्तीति भूभुक्। तस्मिन् भूभुजि। अवादीत् अवदत्। शुकः कीरः। सारिका - पीतपादाः पक्षिणः यथाश्रुतं वाचं तथैवरूपेण उच्चरन्ति। तस्य कारणं जन्मान्तरसंस्कृतिः परिपालक-शिक्षणं वा भवेत्। अपि च पुरा एतेषामपि मानवस्य इव शुकादीनां च वागासीत्। किन्तु अग्निशापात् शुकानाम् अस्फुटता, गजानां जिह्वापरिवृत्तिश्च संजातम्।)

शूद्रकस्य आस्थानमण्डपस्थां शिशिरमणिभूमिं मृगनाभिपरिमलेन चन्दनवारिणा प्रक्षालयति।

**20. इत्येवमुच्चारयत्येव तस्मिन्नशिशिरकिरणमम्बरतलस्य मध्यमारूढमावेदयन् नाटिकाच्छेदःप्रहत-पटुपटहनादानुसारी मध्याह्नशङ्खध्वनिनिरुदतिष्ठत्। तमाकर्ण्य च समासन्नस्नानसमयो विसर्जितराज-लोकः क्षितिपतिरास्थान मण्डपादुतस्थौ।**

**(टिप्पणिः -** मध्याह्नकालः संजातः इति सूचयति। तस्मिन् इत्येवं उच्चारयति सतिसप्तमीप्रयोगः। यदा सः (अमात्यः)एवं उच्चरत् तदा। अशिशिरकिरणः - सूर्यः। अशिशिरपाणिः उष्णानि किरणानि यस्य

सः अशिशिरकिरणः। नाटिका - समयप्राप्तिसूचिका घटिका। च्छेदः - समाप्तिः। प्रहतः - करतलताडितः। पटहः -दुन्दुभिः। समासन्नस्नानसमयः -स्नानसमयः संप्राप्तः। उत्तस्थौ - उदतिष्ठत्।

**संक्षिप्तम्** - शूद्रककुमारपालितयोः सम्भाषणसमये सूर्यः अम्बरतलस्य मध्यं प्राप। तत्समये सभा-समाप्तिसूचिका घटिका ताडिता। राज्ञः स्नानसमयः संप्राप्तः इत्यतः राजपरिजनलोकं विमुच्य राजा आस्थानमन्डपात् उदतिष्ठत्।

**21. अथ चलति महीपतावन्योन्यमतिरभससञ्चालनचालिताङ्गदपत्रभङ्गमकरकोटिपाटितां शुकपटानां गमनप्रणामलालसानाम् अहमहमिकया वक्षस्थलप्रेङ्खोलितहारलतानां उत्तिष्ठतामासीदति महान् संभ्रमो महीपतीनाम्।**

(**टिप्पणिः** - राज्ञः उत्थानवसरे जातं कोलाहलं वर्णयति। चलति महीपतौ यदा राजा अचलत् तदा। अङ्गदानि - केयूराणि। पत्रभङ्गानि - भूषणानि। मकराः - मकरकृतयः कर्णभूषणानि। पाटिताः - छिन्नाः। अहमहमिकया - अहं पूर्वं अहं पूर्वमिति चिन्तया। प्रेङ्खोल्लिताः - सञ्चालिताः।)

**संक्षिप्तम्** - यदा राजा आस्थानमन्डपात् अचलत् तदा राजपरिजनसमूहः परस्परम् अतिवेगेन अचलत्। तदा सामन्तराजानां शिरोभ्यः केयूराणि अचलन्। पत्रभङ्गकर्णभूषणाद्याभरणानां कोटिभिः वस्त्राणि छिन्नानि अभूवन्। राज्ञः प्रस्थाने तं प्रणमितुं अभिलाषिणां भूपतीनां वक्षःस्थलात् हारा संचालिताः इत्येवं रूपेण महान् सम्भ्रमः तदानीं संजातः।

**22. इतश्चेतश्च निष्पतन्तीनां स्कन्धावसक्तचामराणां चामरग्राहिणीनां पदे पदे रणितमणीनां मणिनूपुराणां निनादेन प्रतीहारीणाञ्च पुरः ससंभ्रममुत्सारितजनानां भवनप्रासादकुञ्जेषूच्चरित-प्रतिशब्दतया दीर्घतामुपगतेनालोकशब्देन प्रचलितजनचरणशतसंक्षोभभयादष्ठीयकुसुमप्रकरमुत्पा-तताञ्च मधुलिहां हुङ्कृतेनसंक्षोभादातित्वरतपदप्रवृत्तैरवनिपतिभिः केयूरकोटिताडितानां क्वणित-मुखररत्नदाम्नाञ्च मणिस्तम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।**

(**टिप्पणिः** - राज्ञः उत्थानकाले किमन्यद् घटितं तत् विशदयति। इतः +च+इतः+च-इतश्चेतश्च। इतश्चेतः - इतस्ततः। चामरग्राहिणीनां - चामरं याः गृह्णन्ति तासां स्त्रीणाम्। निनादेन - शब्देन।

ससभ्रमं - सोद्वेगं। भवनप्रासादकुञ्जरेषु - भवनानां प्रासादानां च लतान्तस्थितप्रदेशेषु। आलोकशब्देन - राज्ञां लोकयतु आलोकयतु इत्येवं शब्देन। प्रचालितानां जनानां शतस्य प्रहारभयात् पुष्पसमूहमुपेक्ष्य भ्रमराः - उड्डीयन्ते। ते हुङ्कारशब्दं उत्पादयन्ति। केयूरकोटिताडितानां केयूराणामग्रभागैः ताडितानां। रणितेन अव्यक्तध्वनिना। आस्थानभवनं आस्थानमण्डपम्।)

**6.1.2 शूद्रकस्य व्यायामभूमिः।**

**23. अथ विसर्जितराजलोको विश्राम्यतां इति स्वयमेवाभिधाय तां चण्डालकन्यकां वैशम्पायनः प्रवेश्यतामभ्यन्तरम् इति ताम्बूलकरङ्कवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिराभ्यन्तरं प्राविशत्। अपनीताभरणश्च दिवसकर इव विगलितकिरणजालैः समुपाह्लसमुचितव्यायामोपकरणानां व्यायामभूमिमासीत्।**

**(टिप्पणिः -** शूद्रकस्य व्यायामभूमिगमनं सूचयति। एव+अभिधाय -एवाभिधाय। अभिधाय - उक्त्वा। आभ्यन्तरं - भवनमध्यम्। ताम्बूलकरङ्कवाहिनी - दलपत्रवाहिनी (नागवल्ली)। प्राविशत् - प्रविवेश। प्राविशत्-प्र+विश्(वेशेन-पर-लङ्-प्रपु-ए.व) विगलिताकिरणजालः - परित्यक्तरश्मी समूहः। विगलि- तानि किरणानां जालानि यस्य सः विगलितकिरणजालः।

**संक्षिप्तम्** - पुनः शूद्रकः विश्रामं क्रियताम् इति चण्डालकन्यकाम् उक्त्वा वैशम्पायनं शुकं भवनमध्यमानेतुं करङ्कवाहिनीम् आदिश्य कतिपयैः मित्रैः साकं भवनमध्यं प्रविवेश। सूर्यः यथा विगलितकिरणजालः भवति तथा राजा आभरणानि शरीरात् प्रमार्ज्य व्यायामोपकरणानि वर्तमानं प्रकोष्ठं प्रविवेश।

**6.1.3 शूद्रकस्य स्नानभूमिः**

**24. स तस्याञ्च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः तत्कालं विरलजनेऽपि राजकुले समुत्सारणाधिकारमुचितं आचारद्भिः दण्डिभिरुपदिश्यमानमार्गः गन्धोदकपूर्णकनकमयजलद्रोणी-सनाथमध्याम्, उपस्थापितस्फाटिकस्नानपीठाम् एकान्तनिहितैरतिसुरभिगन्धसलिलपूर्णैः स्नानकल-शैरुपशोभितां स्नानभूमिमगच्छत्।**

**टिप्पणिः -** शूद्रकस्य स्नानभूमिगमनं वर्णयति। समानवयोभिः सह - समानवयस्कैः सह। सह इत्यव्ययस्य योगे 'सहयुक्तेऽप्रधाने' इति सूत्रेण तृतीया। दण्डिभिः - यष्टिधारिभिः। द्रोणी - जलकुण्डिका (बृहज्जलपात्रम्)। एकान्तनिहितैः - एकस्मिन् प्रदेशेऽवस्थापितैः। अगच्छत् - जगाम। अगच्छत् - गम्लृ (गम्) गतौ-पर-लङ्-प्रपु ए.व)

**संक्षिप्तम् -** शूद्रकः व्यायामभूमौ समानवयस्कैः राजपुत्रैः व्यायामं आचारिवान्। पुनः सः स्नान-स्थलमगगच्छत्। तत्र परिजनाः विरलाः। तथापि यष्टिधारिणः पुरुषाः आसन्। तै उपदिश्यमानमार्गः सुरभिजलैः निर्भरं सुवर्णमयं बृहज्जलपात्रं वर्तमानं स्नानागरं प्राविशत्। तत्र स्फटिकमणिमयं स्नानपीठम् अवर्तत। स्नानयोग्यानि सर्वकार्याणि एकस्मिन् प्रदेशे अवस्थापितानि सन्ति।

### 6.1.4 शूद्रकस्य देवगृहागमनम्।

**25. ततश्च क्रमेण निवर्तिताभिषेको विषधरनिर्मोकपरिलधूनी धवले परिधाय धौतवाससी अतिधवल- जलधरच्छेदशुचिना दुकूलपटपल्लवेन कृतशिरोवेष्टनः सम्भावितपितृजलक्रिया-मन्त्रपूततोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्।**

**(टिप्पणिः** - शूद्रकस्य देवगृहगमनं वर्णयति। निवर्तिताभिषेकः - सम्पादितस्नानम्। विषधरनिर्मोकपरिलघुनी सर्पाणां कञ्चुकवद् अत्यन्तसूक्ष्मे। धौतवाससी - प्रक्षालितवस्त्रे (देवपूजादौ वस्त्रद्वयधारणं धर्मशास्त्रे निर्दिष्टं) शुचिना - निर्मलेन। मन्त्रपूततोयाञ्जलि मन्त्रैः - पवित्रितेन जलपूर्णकरसम्पुटेन। देवगृहं - देवालयम्)

**संक्षिप्तम्** - अनन्तरं स्नानगृहे स्नानं कृत्वा अत्यन्तसूक्ष्मं धवलं वस्त्रद्वयं धृत्वा दुकूलपटस्य प्रान्तेन शिरोवेष्टनं च चकार। पुनः पितृभ्यः जलतर्पणादिना पवित्रितेन जलपूर्णकरसम्पुटेन सूर्यं नत्वा देवा-लयमगच्छत्।

### 6.1.5 विलेपभूमिः भक्षणं च।

**26. उपरचितपशुपतिपूजश्च निष्क्रम्य देवगृहान्निवर्तिताग्निकार्ये विलेपनभूमौ मृगमदकर्पूरकुङ्कुमवास-सुरभिणा चन्दनेनानुलिप्तसर्वाङ्गो विरचितामोदितमालतीकुसुमशेखरः कृताम्बरपरिवर्तो रत्नकर्ण**

**पूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपो निवर्तयामास।**

**टिप्पणिः -** शूद्रकस्य विलेपनभूमिगमनं भक्षणं च विशदयति। निष्क्रम्य - निर्गत्य। विलेपनभूमिः - अङ्गरागसम्पादनस्थलम्। मृगमदः - कस्तूरी। वासः - परिमलः। अनुलिप्तसर्वाङ्गः - सर्वाणि अङ्गानि अनुलिप्तानि (लोपितानि)यस्य सः। विरचितः आमोदिभिः - सुगन्धिभिः, मालतीपुष्पैः - शेखरः (शिरोभूषणं)येन सः विरचितामोदितमालतीकुसुमशेखरः। समुचितभोजनैः - योग्यैः भोजनैः। अभिमतरसास्वादनप्रीतिः - रुचिकराणां मधुरादीनां रसानामास्वादने संजाततुष्टः।

**संक्षिप्तम्** - शूद्रकः देवालयं गत्वा शिवमर्चयामास। पुनः ततः निर्गत्य विलेपनभूमिं प्राप। कस्तूरी कर्पूर - कुङ्कुमादीनां परिमलेन सुगन्धपूर्णा आसीत् विलेपनभूमिः। शरीरे चन्दनलेपनम् चकार। पुनः वस्त्रपरिवर्तनं कृत्वा कर्णाभरणमात्रशरीरः सन् राजभिः सह समुचितभोजनेन रसास्वादेन च तुष्टः बभूव।

- **"प्रायेण पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रावेदिनः"।**

सर्वशास्त्रपारंगतस्य शुकस्य वैशम्पायनस्य आर्यामाकर्ण्य शूद्रकराजः अद्भुतपरतन्त्रः बभूव। सः तस्य प्रधानामात्यं कुमारपालितं निवेदयति 'अयं शुकः अद्भुतकरः। प्रायेण पक्षिणः मृगाश्च भयमाहारमैथुनं निद्रां स्वसंज्ञां च जानन्ति। वेदानामागमः पक्षिभ्यः दुष्करमेव।

- **शूद्रकस्य विस्मयकारणम् -**

शूद्रकमहाराजस्य पुरतः प्रतीहार्या नीयमानया चण्डालकन्यया वैशम्पायनं शुकमादाय राज्ञे समर्पितम्। सः शुकः दक्षिणं करमुद्धृत्य "जयतु महाराज" इत्युक्त्वा एकाम् आर्यां पपाठ। अतिस्पष्टतया अक्षरशुद्ध्या स्वरशुद्ध्या संस्कारयुक्त्या वाचा श्लोकं पपाठ। शूद्रकस्य शत्रुस्त्रीणां कुचद्वयं अश्रुभिः स्नात्वा भर्तृमरणजनितशोकाग्नेः समीपतरवर्ति सन् वर्जिताहारं भूत्वा व्रतमासेवते इव वर्तते। ताम् आर्यां श्रुत्वा राजा संजातविस्मयः बभूव।

- **शूद्रकस्य व्यायामभूमिः**

राजा शूद्रकः कतिपयैः अमात्यपुत्रैः परिवृतः सन् भवनमध्यं प्रविवेश। सः शरीरे धृतानि आभरणानि अपनीतवान्। विगलितकिरणजालः सूर्यः इव तदा सः शुशुभे। व्यायामभूमौ कृतमधुरव्यायामः सन् व्यायामवृत्तिमाचरितवान्।

## पुनरावृत्तिः (Recap)

- वैशम्पायानस्य शुकस्य श्लोकमाकर्ण्य राजा विस्मितः बभूव।
- राज्ञस्य प्रधानमात्यः कुमारपालितः।
- शुकस्य वर्णोच्चारणे स्पष्टता स्वरमाधुर्यं च श्रुत्वा राजा महदाश्चर्यवान्।
- शूद्रककुमारपालितयोः सम्भाषणसमये सूर्यः अम्बरतलस्य मध्यं प्राप।
- चलाति महीपतौ उत्तिष्ठमासीदतिमहान् संभ्रमो महीपतीनाम्।
- राज्ञः उत्थानकाले किमन्यद् घटितं तत् विशदयति।
- शूद्रकस्य व्यायामभूमिगमनम्।
- शूद्रकस्य स्नानभूमिगमनम्।
- शूद्रकस्य देवगृहगमनम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. शूद्रकराजस्य प्रधानामात्यः कः ?
2. परिस्फुटाक्षरां गिरमुदीरयति। कः ?
3. अपनीताभरणश्च दिवसकर इव - कुत्र ?
4. शूद्रकः मन्त्रपूततोयाञ्जलिना कमभिप्रणम्य देवगृहमगमत् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. श्रुता भवद्भिरस्य विहङ्गमस्य स्पृष्टता वर्णोच्चारणे'-कस्येदं वचनम्? कं प्रति?
2. कुमारपालितमते शुकसारिकाप्रभृतयः केन कारणेन मनुष्यवद इदानीं नोच्चरन्ति?
3. उत्तिष्ठतामासीदतिमहान् संभ्रमो महीपतीनाम्। कारणं किम्?
4. शूद्रकस्य स्नानभूमिः।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. शूद्रकस्य विस्मयकारणं किम्?
2. प्रायेण पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रवेदिनः। सन्दर्भानुसारमम् आशयं विशदयत।
3. शूद्रकस्य व्यायामभूमिः - टिप्पणीं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. शूद्रकस्य व्यायामभूमिं स्नानभूमिं देवगृहगमनं च विशदयत।
2. राज्ञः शूद्रकस्य विशिष्टसंपदः, शुकस्य अद्भुतवाणीप्रसङ्गः, सभायाः शोभा च - एतेषां वर्णनं विस्तरेण कुरुत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. कुमारपालितः।
2. वैशम्पायनो नाम शुकः।
3. राज्ञः शूद्रकस्य व्यायामशाला।
4. सूर्यमभिप्रणम्य।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौकम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटानि ३३६-३६२
2. कृष्णमाचार्यः, कादम्बरीसंग्रहः, पुटानि १-९
3. बाणभट्ट, कादम्बरी व्याख्या डा. जयशङ्कर् लाल् त्रिपाठि, चौकम्बाकृष्णदास अकादमी, पुटानि २३-६३

# Unit - 2
## शूद्रकस्य आस्थानमण्डपम्-वैशम्पायनं प्रति प्रश्नः

### उद्देश्यानि (Learning Outcomes)

- संस्कृतगद्यकाव्येषु कादम्बर्याः स्थानमवगच्छाति।
- बाणभट्टस्य वर्णनापाटवं गृह्णाति।
- कथाकथनस्य सौकुमार्यं जानाति।
- शूद्रकस्य आस्थानमण्डपस्य वर्णनं जानाति

### प्राग्व्यपेक्षाः (Prerequisites)

वर्णनायां कालिदासवत् प्रशोभमानः कविरेव बाणभट्टः। 'बाणोच्छिष्टं जगत्सर्वं' इत्युक्तिं सार्थकं कर्तुं कवेरस्य प्रतिभा निदर्शनमेव। वैशम्पायननामकस्य शुकस्य शुद्धां प्रतिभायुक्तां वाणीं शूद्रकमद्भुतपरतन्त्रं चकार। सर्वगुणोपेतस्य अस्य राज्ञः आस्थानमण्डपं मनोहररीत्या कविः वर्णयति। वैशम्पायनस्य पूर्वजन्मवृत्तान्तं मित्रेभ्यः ज्ञातुं बाणभट्टेन कृता रीतिः उचितैव। अत्रान्तरे प्रकृत्या सह मानवस्य दृढबन्धं कविः सूचयति। प्रकृतिः माता। मातृसंरक्षणं पुत्राणां परमो धर्मः, अस्माकं पौराणिकाः ऋषिवर्याः एतत्कार्यं सूचितवन्तः। अगस्त्याश्रमवर्णना तथा पम्पाभिधानस्य पद्मसरसः महत्वं च कविरस्मान् स्मारयति।

### मुख्यपदानि (Keywords)

आस्थानमण्डपस्य वर्णनं - चन्दनवारिणासिक्तः प्रकोष्ठः - राजानः अमात्याः च आगच्छन्ति - वैशम्पायनमानेतुं निर्दिदेश - भवता भक्षणमास्वादितं वा इति - वैशम्पायनः उत्तरमदात् - राज शूद्रकः शुकं पृच्छति।

**Discussion**

**6.2.1 शूद्रकस्य आस्थानमण्डपम्।**

**26. परिपीतधूमवर्तिरुपसृत्य च गृहीतताम्बूलः तस्मात् प्रमृष्टमणिकुट्टिमप्रदेशादुत्थाय नातिदूरवर्तिन्या ससम्भ्रमप्रधावितया प्रतिहार्या प्रसारितं बाहुमवलम्ब्य आभ्यन्तरसञ्चारसमुचितेन परिजनेननानुगम्यमानो धवलांशुकजवनिकापरिगतपर्यन्ततया स्फटिकमणिमयभित्तिबद्धामिवोप-लक्ष्यमाणां अतिसुरभिणा मृगनाभिपरिमलेनामोदिना चन्दनवारिणा सिक्तारिशीरमणभूमिम्, उत्कीर्णाशालभञ्जिकानिवहेन गन्धसलिलक्षालितेन कलधौतमयेन स्तम्भसञ्चयेन विराजमानं कुसुममोदवासिप्रच्छादपटेन पट्टोपधानाध्यासितशिरोधाम्ना शयनेन सनाथीकृतवेदिकं आस्थान मण्डपमयासीत्। तत्र च शयने निषण्णः क्षितितलोपविष्टया शनैः शनैरुत्सङ्गनिहितासिलतया खट्गवाहिन्याः नवनलिनदलकोमलेन करसंपुटेन संबाह्यमानचरणस्तत्कालोचितदर्शनै-रवनिभिरमात्यैः मित्रैश्च सह तास्ताः कथाः कुर्वन् मुहूर्तमिवासाञ्चक्रे।**

**टिप्पणिः -** शूद्रकस्यास्थानमण्डपं वर्णयति। परिपीतधूमवर्तिः मुखसौगन्ध्यसम्पादनाय समास्वादितताम्बूलादिवृत्तिः गृहीतताम्बूलः तस्मात्-गृहीतताम्बूलस्तस्मात्। नातिदूरवर्तिन्याः - नातिविकृष्टे स्थितया। प्रधावितया शीघ्रं समास्वादितताम्बूलादिवृत्तिः। गृहीतताम्बूलः तस्मात् - गृहीतताम्बूलस्तस्मात्। नातिदूरवर्तिन्याः - नातिविप्रकृष्टे स्थितया। प्रधावितया शीघ्रं समागच्छन्त्या। अभ्यन्तरसञ्चारसमुचितेन प्रासादाभ्यन्तरे सञ्चर्तुं योग्येन। परिगतः - परिवेष्टितः। मृगनाभिपरिमलेन - कस्तूरीगन्धेन। आमोदिना - अत्यन्तसुगन्धिना। उत्कीर्णसालभञ्जिकानिवहेन - उत्कीर्यरचितेन पुत्तालिकासमूहेन। कलधौतमयेन - सुवर्णनिर्मितेन। प्रच्छन्नपटेन - आस्तारणवसनेन। अध्यासि- तमाश्रितं। शिरोधाम - शिरःस्थलं। सनाथीकृता (युक्ता) वेदिका (परिष्कृतभूमिः )यस्मिन् तत् सनाथीकृतवेदिकं। अयासीत् अगमत्। शयने - पर्यङ्के। खट्गवाहिन्याः - कृपाणधारिण्या सेविकया। संबाह्यमानौ (संमर्द्यमानौ) -चरणौ यस्य सः संवाह्यमानचरणा। कथाः - वार्तालापान् आसाञ्चक्रे - विरराज।

**संक्षिप्तम्** - भक्षणानन्तरं मुखसौगन्ध्यसम्पादनाय गृहीतताम्बूलः शूद्रकः पूर्वमधिष्ठितात् जलादिना प्रमार्जितात् मणिकुट्टिमात् उत्थाय द्वारपालिकया सेवार्थं प्रसारितम् बाहुमवलम्ब्य योग्येन परिजनेन अनुगम्यमाना सभामण्डपमगच्छत्। सभामण्डपं तु धवलांशुकेन परिवेष्टितं स्फटिकमणिमय-भित्तिबद्धं भवति। तस्मिन् कस्तूरीगन्धेन पूरितं चान्दनवारिणा सिक्तः प्रकोष्ठः आसीत्। प्रकोष्ठस्य एकस्मिन् भागे सालभञ्जिकासमूहः वर्तते। सभायां कुसुमानां परिमलेन वासितं सुवर्णरचितं आस्तारणवसनं वर्तते। अत्र काचन शय्या अस्ति। तस्यां शय्यायां शूद्रकराजः उपाविशत्। राज्ञः समीपे क्षितितले कृपाणधारिणी काचन सेविका अस्ति। सा कोमलेन करेण भूपतेः चरणौ संवाहयति। राजानं द्रष्टुं राजानः अमात्याः च आगच्छन्ति। तैः साकं वार्तालापं कुर्वन् राजा विराजते।

### 6.2.2 वैशम्पायनं प्रति प्रश्नः

**27. ततो नातिदूरवर्तिनीं अन्तपुराद्वैशम्पायनमादाया गच्छ इति। समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश। अथ मुहूर्तादिव वैशम्पायनः प्रतीहार्या गृहीतपञ्जरः कनक-वेत्रलतावलम्बिता किञ्चिदवनतपूर्वकायेन सितकञ्चुकावच्छन्नवपुषा कञ्चुकिनावगम्यमानो राजान्तिकमाजगाम।**

**टिप्पणिः -** शूद्रकः वैशम्पायनम् प्रति प्रश्नकरणयोत्सुकः सन् तमानेतुं निर्दिशति। ततः + न + अतिदूरवर्तिनीं -ततो न अतिदूरवार्तिनीं। आदाय - गृहीत्वा। समुपजातः - समुत्पन्नः प्रतिहारीं द्वारपालिकां। मुहूर्तादिव - अल्पेन समयेन इव। गृहीतपञ्जरः - धृतपक्षिवाससाधनम्। अवनत-पूर्वकायेन - नम्रीभूतशरीरपूर्वकायेन। सितः - शुभ्रः। अनुगम्यमानः - अनुव्रज्यमानः।

**संक्षिप्तम् -** राजा शूद्रः समीपवर्तीं प्रतीहारीं अन्तपुरात् वैशम्पायनमानेतुं निर्दिदेश। शुकवृत्तान्तं श्रोतुं राजा तत्परः आसीत्। अल्पेन समयेन कञ्चुकी पञ्चरस्थं वैशम्पायनं राजान्तिकमानीतवान्। सः कञ्चुकी धवलेन कञ्चुकेन आच्छादितशरीरः तथा अल्पमात्रेण नम्रीभूतपूर्वकायश्चासीत्।

**28. क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत् - देव, देव्यो विज्ञापयन्ति, देवादेशादिव वैशम्पायनः स्नातः कृताहारश्च देवापादमूलं प्रतीहार्या नीत इत्यभिधाय गते च तस्मिन् राजा वैशम्पायनमपृच्छत् -कच्चित् अभिमतमास्वादितमभ्यन्तरे भवता किञ्चिदशनजातम् ? इति ।**

(**टिप्पणिः** - कञ्चुकी किमवदत् इति विशदयति। निहितं -स्थापितम्। देव्यः महिष्यः स्नानं कृतः। देवपादमूलं भवत्समीपम्। इति + अभिधाय- इत्यभिधाय। अभिधाय उक्त्वा गते तस्मिन् - सतिसप्तमीप्रयोगः। यदा सः अगच्छत् तदा। अपृच्छत् - पृच्छ ज्ञीप्सायाम् -पर-लङ्-प्र.पु -ए.व। अभ्यन्तरे अन्तःपुरे ।)

**संक्षिप्तम्** - कञ्चुकी पञ्चरस्थं शुकं राजान्तिकम् निधाय एवमवदत्। स्नातं कृताहारं च वैशम्पायनम् प्रतीहारी राजान्तिकम् प्रापयतु इति देव्यः आज्ञापितवत्यः। तदनुसारं सर्वं कृतम्। यदा कञ्चुकी अगच्छत् तदा वैशम्पायनं प्रति अपृच्छत् 'भवता भक्षणमास्वादितं वा' इति ।

**29. सा प्रत्युवाच - देव किं वा नास्वादितम्? आत्तकोकिललोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः। हरिनखरभिन्नमत्तमातङ्गकुम्भमुक्तार्द्रमुक्ताफलत्विषि खण्डितानि दण्डिततानि स्वेच्छया प्राचीनामलकीफलानि। किं वा प्रलपितेन बहुना सर्वमेव देविभिः स्वयं करतलोपनीयमानममृतायते इति ।**

(**टिपणिः** - वैशम्पायनः प्रत्यवादीत्। देव स्वामिन्। न+आस्वादितम् -नास्वादितम्। किं वा नास्वादितं सर्वमेव सम्यक्तया आस्वादितम्। लोचनच्छविः - लोचनस्य कान्तिरिव कान्तिः यस्य सः। प्रकामं यथेष्टं। हरिः - सिंहः। मत्तमातङ्गानाम् - उन्मत्तगजानां। आर्द्राणि - रक्तानि (रुधिराणि) तैः आर्द्राणि (खिन्नानि)। मुक्ताफलत्विषि - मुक्तानि यानि मौक्तिकानि तेषां कान्तियुक्तानि। दाडिमबीजानि - दाटितमफालन्तःस्थबीजानि। प्राचीनामलकीफलानि - पक्वामल्लिफलानि (पक्वक्षीरधात्रीफलानि) प्रलापितेन कथनेन। करतलोपनीयमानं - हस्ततलेन दीयमानं (नान्येन) अमृतायते - अमृतवद् आचरति (अमृततुल्यम् )

**संक्षिप्तम्** - वैशम्पायनः उत्तरमादात्। मया भक्षणमास्वादितम्। जम्बूकफलरसः अवर्तत। स रसः मधुपानेन मादोन्मत्तस्य कोकिलस्य लोचनकान्तिः इवासीत्। पुनः दामफलान्तःस्थबीजानि अवर्त्तन्त। तानि मयोपयुक्तानि चञ्चुपटेन। नलिनीदलानि इव हरिद्वर्णानि द्राक्षाफलस्वादिनि तथा पक्वानि आमलकीफलानि चञ्च्वा चूर्णीकृत्य खादितानि। किं बहुना सर्वमेव देविभिः हस्ततलेन दीयमानं अमृतवत् प्रतिभाति इति।

**30. एवं वादिनो वचनमाक्षिप्य नरपतिरब्रवीत् -आस्तां तावत्सर्वम् अपनयतु नः कुतूहलम्। आवेदयतु भवान् आदितः प्रभृति कार्त्स्न्येनात्मनो जन्म कस्मिन् देशे ? भवान् कथं जातः ? केन वा नाम कृतम् ? का ते माता ? कस्ते पिता। कथं वेदानामागमः? कथं परिचयः ? कुतः कला आस्वादिता? किं हेतुकं जन्मान्तरानुस्मरणं ? उत वरप्रदानम्; अथवा विहगवेषधारी कश्चिच्छन्नो निवसति? क्व पूर्वमुषितम् ? कियद्वा वयः पञ्जरबन्धनम्? कथं चण्डालहस्तागमनम् ? इह वा कथमागमनम्।**

**(टिप्पणिः -** राज शूद्रकः शुकं प्रति पृच्छति। वादिनः - भाषमाणस्य शुकस्य। आक्षिप्य मध्ये एव निवार्य। आस्तां - तिष्ठतु। कार्त्स्न्येन - पूर्णेन। जातः - समुत्पन्नः। केन - केन प्राणिना। आगमः - ज्ञानम्। किं हेतुकं - किं निमित्तम्। कश्चित् + छन्नः - कश्चिच्छन्नः। छन्नः - गुप्तः। वयः - अवस्था। आगमनं - संप्राप्तिः।

**संक्षिप्तम्** - शुकः राज्ञः पुरतः भक्षणादीनां विशदीकरणमध्ये राजा अपृच्छत् -अस्माकं मनसि केचन सन्देहाः अस्ति। भवान् आदितः प्रभृति विशदयतु। भवतः जननं कः ? कुत्र, भवान् कथं समुत्पन्नः? केन प्राणिना नाम कृतम् ? माता का ? पिता कः ? कथं वेदान् अधीतवान् शास्त्राणां परिचयः कथं जातः? कलाः कुतः प्राप्ताः? किं निमित्तं जन्मान्तरस्मरणं संजातम् ? अथवा वरप्रदानं किम् ? विहगवेषधारी कः गुप्ततया भवति वर्तते ? पूर्वं कुत्र उषितम् (वासं कृतम् )कति वयः प्राप्तम् ? पञ्जरबन्धनं कथं जातम् ? चण्डालहस्तं कथं प्राप्तम् ? इह आगमनस्य कारणं किम् ?

- **"आमत्तकोकिललोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः।"**

विस्मितपरतन्त्रः शूद्रकः कृताहारं वैशम्पायनं 'भवता भक्षणमास्वादितं वा' इत्यपृच्छत्। तदानीं शुकः प्रत्युत्तरमदात् । 'देव, किं वा नास्वादितम्'? जम्बूरसः प्रकामं पीतवान्। सः जम्बूरसः आमत्तकोकिलानां लोचनाभिः नीलपाटलवर्णः कषायमधुरश्चासीत्। सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायते' इति।

- **शुकं प्रति शूद्रकस्य प्रश्नाः**

राजा शूद्रकः समीपवर्तिनीं प्रतीहारीमन्तःपुरात् शुकं वैशम्पायनमानेतुं निर्दिदेश। तदनुसारमागतः वैशम्पायनः देवीभिः स्वहस्तेन दत्तमाहारादिकं भुक्त्वा सन्तुष्टिं प्रकटयामास। तदा शुकवृत्तान्तं ज्ञातुम् इच्छुः शूद्रकः वैशम्पायनमेवमपृच्छत् । अस्माकं मनसि केचन सन्देहाः सन्ति। भवानादितः प्रभृति सर्वं विशदयतु। भवतः जन्म कुत्र? भवान् कथं समुत्पन्नः? केन नाम कृतम् ? माता का ? पिता कः ? कथं वेदान् अधीतवान् ? शास्त्राणां परिचयः कथं जातः ? कलाः कुतः प्राप्ताः ? किं निमित्तं जन्मान्तरस्मरणं जातम् ? अथवा वरदानं किम्? विहगवेषधारी कः गुप्ततया भवति वर्तते ? पूर्वं कुत्र उषितम् ? कति वयः प्राप्तम्? पञ्जरबन्धनं कथं जातम् ? चण्डालहस्तगतं कथं प्राप्तम् ? इहागमनस्य कारणं किमिति?

**पुनरावृत्तिः (Recap)**

- शूद्रकस्यास्थानमण्डपं वर्णयति।
- सभामण्डपं तु धवलांशुकेन परिवेष्टितं स्फटिकमणिमयभित्तिबद्धं भवति।
- प्रकोष्ठस्य एकस्मिन् भागे सालभञ्जिकासमूहः वर्तते।
- सभायां कुसुमानां परिमलेन वासितं सुवर्णरचितं आस्तारणवसनं वर्तते।
- राजा शूद्रकः समीपवर्तिनीं प्रतीहारीं अन्तःपुरात् वैशम्पायनमानेतुं निर्दिदेश।
- वैशम्पायनो नाम शुकः देवीभ्यः जम्बूफलरसं, दाडिमबीजम्, आमलकीफलानि च आस्वादितवान्।

- राजा शूद्रकः शुकं प्रति आगनमोद्देशं पृच्छति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. शूद्रकस्य आस्थानमण्डपस्थां शिशिरमणिभूमिं कीदृशेन जलेन प्रक्षालयति ?
2. वैशम्पायनः कः?
3. अन्तःपुरात् वैशम्पायनमानेतुं राजा कामादिदेश ?
4. शुकवृत्तान्तं श्रोतुं तत्परः आसीत्। कः?
5. किं वा प्रलपितेन बहुना-कस्येदं वचनम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. वैशम्पायनो नाम शुकः देवीभ्यः किं किं भक्षणमास्वादितवान् ?
2. "आमत्तकोकिललोचनच्छविर्नीलीनपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः।" - सन्दर्भानुसारमाशयं विशदयत।

## एकैकया खण्डिकया उत्तरं लिखत
**(Answer the following questions in a paragraph)**

1. शुकं प्रति शूद्रकस्य प्रश्नाः।

## निर्दिष्टाभ्यासः (Assignments)

1. शूद्रकस्य आस्थानमण्डपम्।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मृगनाभिपरिमलेन चन्दनवारिणा।
2. शुकः।
3. प्रतीहारीम्।
4. राजा शुद्रकः।
5. शुकस्य।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौकम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटानि ३३६-३६२
2. कृष्णमाचार्यः, कादम्बरीसंग्रहः, पुटानि १-९
3. बाणभट्ट, कादम्बरी व्याख्या डा. जयशङ्कर् लाल् त्रिपाठि, चौकम्बाकृष्णदास अकादमी, पुटानि २३-६३

# Unit - 3
## वैशम्पायनस्य कथाकथनम्-विन्ध्याटवीम्

### उद्देश्यानि (Learning Outcomes)

- संस्कृतगद्यकाव्येषु कादम्बर्याः स्थानमवगच्छाति।
- बाणभट्टस्य वर्णनापाटवं गृह्णाति।
- कथाकथनस्य सौकुमार्यं जानाति।
- वैशम्पायनस्य कथाकथनं जानाति।
- विन्ध्याटव्याःमनोहारिता गृह्णाति।

### प्राग्व्यपेक्षाः (Prerequisites)

अस्मिन् भागे सामान्येन संस्कृतगद्यपरिचयः, बाणभट्टः, बाणभट्टस्य कृतयः कादम्बर्याः संग्रहरूपेण वर्तमानः कादम्बरी संग्रहे वैशम्पायनस्य कथाकथनं विन्ध्याटवीवर्णनं चाधिकृत्य पठामः।

### मुख्यपदानि (Keywords)

शूद्रकस्य प्रश्नानामुत्तरम् - विन्ध्याटवीं - पूर्वसागरतटादारभ्य पश्चिमसागरतटे - मेखलेव - शिखरदेशलग्नं नक्षत्रगणमिव - रक्तचन्दनालंकृता - युद्धस्थलमिव।

SGOU

## Discussion

### 6.3.1 वैशम्पायानस्य कथाकथनं - विन्ध्याटवी

**31. वैशम्पायनस्तु स्वयमुपजातकौतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत् -देव, महतीयं कथा यदि कौतुकमाकर्ण्यताम्।**

**अस्ति पूर्वापरजलनिधिवेलावलग्ना मध्यदेशालङ्कारभूता मेखलेव भुवः वनकरिकुलमदजल--सेकसंवर्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणामिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता मधुमदोपरक्तकेरलीकपोलच्छविना सञ्चरद्वनदेवताचरणालक्तकरसरञ्जितेन पल्लवचयेन संच्छादिता, प्रेताधिपनगरीव सदा सन्निहितमृत्युभीषणा रक्तचन्दनालंकृता च, क्वचित् प्रलयवेलेन महावराहदंष्ट्रासमुत्सरतसवातधरणिमण्डला क्वचित् धर्मभूमिरिव शरतशरनिचिता क्वचिन्नारायणमूर्तिरिव तमालनीला क्वचित्विराटनगरीव कीचकशताकुला विन्ध्याटवी नाम।**

**(टिप्पणिः -** वैशम्पायनः शूद्रकस्य प्रश्नानामुत्तरदानाय संनद्धो भूत्वा विशदयति। तन्मध्ये प्रथमं विन्ध्याटवीं वर्णयति। सबहुमानं - सादरेण। स्वयमात्मनैव - मुहूर्तमल्पसमयम्। आदरेण सह यथा स्यात् तथा सादरम्। महती + इयम् - महदीयम्। महती - अतिविस्तृता। यदि चेत् अस्ति वर्तते। अस्ति - अस - भुवि-पर-लट्-प्र-पु-व। पूर्वापरजलनिधिवेलावलग्ना पूर्वपश्चिमसागरतटे वर्तमानकानन संबद्धा। पूर्वसागरतटादारभ्य पश्चिमसागरतटपर्यन्तं प्रसृता। मेखला+इव -मेखलेव। मेखला रसनदाम। अतिविकचधवलकुसुमनिकरं - पूर्णविकसितानां शुभ्रपुष्पाणां समूहम्। शिखरदेशे - शिरोभागे। उद्वहद्भिः - धारयद्भिः। मधुमदोपरक्तकेरलीकपोलच्छवी - मद्यमदेन ईषल्लोहितस्वरूपिणां केरलीयस्त्रीणां कपोलकोमलकान्तिः। चरणालक्तकरसरञ्जितेन - पादानां आलक्तकेन स्वीकृतेन। संछादितां आच्छादिता। सदा सर्वदा। भीषणा - भयदायिनी। कात्यायनि - सिंहवाहिनी दुर्गा। प्रचलितखड्गभीषणा राक्षसानां विनाशक संचलितेन असिना भयकारिणी। क्वचित् कस्मिश्चित् प्रदेशे। समुत्खातं सम्यक् रूपेण स्वनित्वा उपरि समानीतं। समरभूमिः +इव - समरभूमिरिव। समरभूमिः - युद्धस्थलं। निचिता - व्यप्ता। नारायणमूर्तिः - नारायणस्य विष्णोः मूर्तिः

शरीरं। विराटनगरी - मत्स्याधिपतेः राजधानी। कीचकशताकुला - निजप्रियायाः बान्धवानां शतेन परिवृताः (वेणूनां छिद्रेषु प्रविष्टवायुभिः समुत्पादितध्वनियुक्ता)

**संक्षिप्तम्** - वैशम्पायनः स्वकथां कथितुमारेभे। प्रथमं विन्ध्याटवीं वर्णयति। हे देव इयं कथा विस्तृता। यदि कौतुकं तदा आकर्णयतु भवान्। विन्ध्याटवी नाम वनम्। तद्वनं पूर्वसागरतटादारभ्य पश्चिमसागरतटे वर्तमानं काननसंबन्धं विस्तृतं भवति। तद्वनं भुवः मेखलेव वर्तते। वने हस्तिनः सन्ति तेषां मदजलसेकेन संवर्धितानि पूर्णविकसितानि पुष्पाणि उद्वहन्तः वृक्षाः सन्ति। तानि पुष्पाणि अत्युन्नतया शिखरदेशलग्नं नक्षत्रगणमिव शोभन्ते। मध्यमदेन ईषल्लोहितस्वरूपिणां केरलीयस्त्रीणां कपोलकोमलकान्तियुक्तानां वनदेवतानां पादानां आलक्तकेन स्वीकृतेन पल्लवेन संच्छादितं भवतीदं वनम्। यमनगरीव सदा संन्निहितमृत्युभीषणा महिषाधिष्ठितदुर्गा इव विन्ध्याटवीं शोभते। राक्षसानां वधाय संचलितेन खड्गेन भीषणा तथा रक्तचन्दनालंकृता दुर्गा इव भवति विन्ध्याटवी। अपि च क्वचित्स्थले वराहावतारे विष्णुः दंष्ट्राभिः सम्यक् खनित्वोपरि समानीतां धरित्रीमिव, कुत्रचित् शरशतेन व्याप्तं युद्धस्थलमिव इदं वनं प्राशोभत। क्वचित् कीचकशताकुला विराटनगरीव विन्ध्याटवी अवर्तत।

- **महतीयं कथा, यदि कौतुकमाकर्ण्यताम्।**

वैशम्पायनो नामस्य शुकस्य शुद्धां वाणीं निशम्य राजा अद्भुतपरवशः बभूव। कृताहारं तं शुकं राजा विविधान् प्रश्नानपृच्छत्। कः पिता,माता का,कथं चण्डालहस्तगतः वेदान् कुतः अधीतवान्, कियद्वा वयः इत्याद्याः प्रश्नाः। एतत्सर्वं श्रुत्वा वैशम्पायनः किञ्चित्कालं ध्यात्वा वक्तुमारेभे। हे राजन्, महती इयं कथा। यदि भवद्भिः श्रोतुमिच्छा, आकर्ण्यताम्' इति।

## पुनरावृत्तिः (Recap)

- वैशम्पायनः स्वकथां कथयितुमारेभे।
- प्रथमं विन्ध्याटवीं वर्णयति।

- विन्ध्याटवी पूर्वसागरतटादारम्भ्य पश्चिमसागरतटे वर्तमानं काननसंबन्धं विस्तृतं भवति ।
- वने अनेके हस्तिनः सन्ति ।
- रक्तचन्दनालंकृता दुर्गा इव भवति विन्ध्याटवी ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. कियत्पर्यन्ता भवति विन्ध्याटवी ?
2. तद्वनं भुवः मेखलेव वर्तते । वनस्य नाम किम् ?
3. विन्ध्याटवी किमिव शोभते ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।
**(Answer the following questions in one or two sentences)**

1. “महतीयं कथा यदि कौतुकमाकर्ण्यताम्” - सन्दर्भानुसारमाशयं विशदयत ।

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. विन्ध्याटवी नाम वनस्य मनोहारितां वर्णयत ।

## निर्दिष्टाभ्यासः (Assignments)

1. विन्ध्याटवीवर्णनस्य वैशिष्ट्यानि स्पष्टयत ।
2. ‘बाणोच्छिष्टं जगत्सर्वं’- विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. पूर्वसागरतटादारभ्य पश्चिमसागरतटपर्यन्तं व्यापृता भवति विन्ध्याटवी।
2. विन्ध्याटवी।
3. पुष्पाणि अत्युन्नतया शिखरदेशलग्नं नक्षत्रगणमिव।

## सूचनाग्रन्थाः (References)


1. आचार्यः लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौकम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटानि ३३६-३६२
2. कृष्णमाचार्यः, कादम्बरीसंग्रहः, पुटानि १-९
3. बाणभट्ट, कादम्बरी व्याख्या डा. जयशङ्कर् लाल् त्रिपाठि, चौकम्बाकृष्णदास अकादमी, पुटानि २३-६३

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE.................**

**Name........................**

**SIXTH SEMESTER B.A. SANSKRIT EXAMINATIONS**
**DISCIPLINE CORE- B21SN06DC - सन्देशकाव्यं गद्यकाव्यं च**
**( CBCS - UG )**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. ‘इन्त्यन् षेक्स्पियर्’ इति नाम्ना प्रसिद्धः कः ?
2. मेघसन्देशकाव्ये नायकः कः ?
3. अलकापुराधीशः कः ?
4. आखण्डलः कः ?
5. “प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः” अत्र यत् शब्देन कस्य ग्रहणम् ?
6. “रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय” इयं सूक्तिः कुतः उद्धृता ?
7. भगवतः स्कन्दस्य वसतिः कुत्र अस्ति ?
8. कार्तिकेयस्य वाहनं किम् ?
9. रन्तिदेवस्य मूर्तिमती का नदी ?
10. ‘तस्याः अम्भः पातुं सुरगज इव’- कस्याः अम्भः?
11. ‘वक्षस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः’-कस्य शृङ्गे ?
12. कादम्बरीसंग्रहस्य कर्ता कः ?
13. कादम्बर्याः कथायाः प्रारम्भः केन राज्ञा आरभते ?
14. शूद्रकराजस्य प्रधानामात्यः कः ?

SGOU

15. परिस्फुटाक्षरां गिरमुदीरयति । कः ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत ।** **(5x2=10)**
**(Answer any five Questions in one or two sentences)**

16. अलकापुरी कीदृशी भवति ?
17. "कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" अयं सूक्तिः कुतः उद्धृतः ?
18. मेघसञ्चरणसमये मुग्धसिद्धाङ्गनानां मनसि कः संशयः संजातः ?
19. नर्मदा कथं शोभते ?
20. गम्भीरायाः पयः कीदृशं भवति ?
21. चर्मण्वतीमुत्तीर्य सञ्चारणवेलायां किं कर्तुं यक्षः मेघं निर्दिशति?
22. "स्यादस्थानोपगतयमुनासङ्गममेवाभिरामा" - आशयं लिखत ।
23. कव्यभेदेषु गद्यकाव्यस्य प्राधान्यं किम् ?
24. शूद्रकस्य राजधानी कीदृशी ?
25. कुमारपालितमते शुकसारिकाप्रभृतयः केन कारणेन मनुष्यवद् इदानीं नोच्चरन्ति ?

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।** **(6x5=30)**
**(Answer any six Questions)**

26. मेघदूतम् अधिकृत्य लघुटिप्पणिं लिखत ।
27. कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।

    यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।। अस्य श्लोकस्यान्वयं लिखत ।

28. त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।

    सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ।।

    इति श्लोकसन्दर्भं आशयं च लिखत ।

29. छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये श्याम स्तन इव भुव शेषविस्तारपाण्डुः ॥ आशयं विशदयत।

30. गम्भीरा सरः कस्य इव दृश्यते? विशदयत।

31. तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम्॥ अस्य श्लोकस्य आशयं लिखत।

32. शिवपादविन्यासस्य माहात्म्यं वर्णयत।

33. त्वं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्माबाधेतोत्काक्षपितचमरीबालभारो दवाग्निः।
अहस्येनं शमयितुमलं वारिधारासहस्रैरापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्॥ आशयं विशदयत।

34. दण्डिनः गद्यसाहित्यग्रन्थौ अधिकृत्य विशदयत ?

35. संस्कृतसाहित्ये बाणभट्टस्य स्थानं किम् ?

36. शुकं प्रति शूद्रकस्य प्रश्नाः -विशदयत।

37. विन्ध्याटवी नाम वनस्य मनोहारितां वर्णयत।

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**
**(Write an essay on any two of the following)**

38. कालिदासस्य रचनावैशिष्ट्यम्।

39. सन्देशकाव्यस्य स्वरूपं विशदयत।

40. मेघदूतानुसारं गम्भीरा - देवगिरी - चर्मण्वती - ब्रह्मावर्त - सरस्वती - जाह्नवी - इत्यादीनां नदीनां पर्वतानां च वर्णना कुरुत।

41. भारतस्य उत्तरस्यां दिशि हिमालयः वर्तते - हिमालयपर्वतम् अधिकृत्य विशदयत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No...................** **QP CODE.................**

**Name.......................**

**SIXTH SEMESTER B.A. SANSKRIT EXAMINATIONS**
**DISCIPLINE CORE- B21SN06DC - सन्देशकाव्यं गद्यकाव्यं च**

**( CBCS - UG )**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत। (10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. रघुवंशे कति सर्गाः सन्ति ?
2. यक्षेश्वराणां वसतिः का ?
3. राजराजस्यानुचरः कः ?
4. दशार्णदेशेषु विख्याता राजधानी का ?
5. "स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु" इयं कया नद्या सम्बद्धा ?
6. "अप्यन्यस्मिन्जलधर, महाकालमासाद्य काले" इदं केन नगरेण सम्बन्धः ?
7. शरवणभवः देवः कः ?
8. क्षत्रप्रधनपिशुनं क्षेत्रं किम् ?
9. "अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः" अनेन पद्यांशेन कस्याः नद्याः संकेतः समुपलभ्यते ?
10. दशमुखोच्छ्वासिप्रस्थसन्धिः पर्वतः कः?
11. कुबेरनगरी का ?
12. अतिसुरभिचन्दनानुलेपनधवलितोरस्थलः कः ?
13. नीलकञ्चुकेनावच्छन्नशरीरा आसीत् - का ?

14. वैशम्पायनः कः ?

15. तद्वनं भुवः मेखलेव वर्तते। वनस्य नाम किम् ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**

**(Answer any five Questions in one or two sentences)**

16. सन्देशकाव्यानां भागद्वयं किम् ?
17. पटुकरणैः प्राणिभिः प्रापणीयाः के भवन्ति ?
18. मेघं कामुकतायाः संपूर्णफलं कदा प्राप्यते ?
19. 'कुसुमसुरभिष्वध्वखेदं नयेथाः'- कुत्रस्थाः ?
20. "क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः"- आशयं विशदयत।
21. दशपुरनगरनिवासिनीनां कौतूहलं वर्धयन् गन्तुं यक्षः मेघं किं निर्दिशति ?
22. मेघस्य मार्गं शरभाः लङ्घयन्ति चेत् किं करणीयम् ?
23. शूद्रकस्य मन्त्रिणः कथं आसन् ?
24. चण्डालकन्यका सर्वेषां श्रद्धामाकृष्टवती। कथम् ?
25. "महतीयं कथा यदि कौतुकमाकर्ण्यताम्" - सन्दर्भमाशयं विशदयत।

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**

**(Answer any six Questions)**

26. कामार्ता हि प्रकृतिकृपणचेतनाचेतनेषु - ससन्दर्भं आशयं विशदयत।
27. प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।

    स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥ इति श्लोकस्य सारांशं लिखत।
28. दशार्णदेशस्यावस्था कीदृशी ?
29. विदिशायाः सौन्दर्यं मेघदूते कथं वर्णितम्?
30. 'ब्रह्मावर्तं जनपदम्' एकां खण्डिकां लिखत।

31. मोक्षदायिकायाः गङ्गायाः प्राधान्यं विशदयत।

32. मेघाच्छादितः कैलासः कीदृशः वर्णितः अस्ति ?

33. अलका - लघु टिप्पणीं लिखत।

34. "अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः।" -ससन्दर्भं आशयं विशदयत।

35. "अन्यथा कथमियमाक्लिष्टता लावण्यस्य।" -ससन्दर्भं आशयं विशदयत।

36. शूद्रकस्य विस्मयकारणं किम्?

37. 'प्रायेण पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रवेदिनः"। सन्दर्भानुसारम् आशयं विशदयत।

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**
**(Write an essay on any two of the following)**

38. शिवस्य आवासभुमिं कैलासपर्वतम् अधिकृत्य वर्णयत।

39. यक्षेण सूचितं मेघमार्गं विशदयत।

40. संस्कृतगद्यसाहित्यं विविधं विपुलं च वर्तते-विशदयत।

41. संस्कृतगद्यसाहित्ये बाणभट्टः दण्डी सुबन्धुः इत्यादयः प्रमुखाः गद्यरचनाकर्तारः भवन्ति - विशदयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres

### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

NO TO DRUGS

# തിരിച്ചിറങ്ങാൻ പ്രയാസമാണ്



SOU

ആരോഗ്യ കുടുംബക്ഷേമ വകുപ്പ്, കേരള സർക്കാർ

सन्देशकाव्यं गद्यकाव्यं च

COURSE CODE: B21SN06DC

SGOU

ISBN 978-81-986822-9-1

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841